# मणिका

## संस्कृत-अभ्यास-पुस्तकम्

### प्रथमो भागः

नवमश्रेण्यै

केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

आत्मीयच्छात्राः !

यदि कश्चित्/काचिद् भवन्तं भवतीं वा अनुचितरूपेण स्पृशति, सः च स्पर्शः भवत्कृते असहजः अस्वाभाविकः वा स्यात् तर्हि मौनं मा तिष्ठतु।

1. भवान् /भवती अहमेव 'दोषी/दोषिणी' इति मा चिन्तयतु।
2. यस्मिन्/यस्यां भवान् /भवती विश्वसिति, तं/तां सर्वं वृत्तं सूचयतु।
3. भवान्/भवती **पॉक्सो ई बॉक्स** माध्यमेन राष्ट्रिय-बालाधिकार-संरक्षणायोगमपि सूचयितुमर्हति।

**यदा भवन्तं भवतीं वा कश्चित्/काचित् अनुचितरूपेण स्पृशति तदा भवान्/भवती असहजम् अनुभवितुं शक्नोति। दुविधाग्रस्तः/दुविधाग्रस्ता भवान्/भवती असहायः/असहाया अहमिति अनुभवितुं शक्नोति परं तथा चिन्तयितुम् आवश्यकता नास्ति। यतः भवतः/भवत्याः कश्चित् दोषः नास्ति।**




**एतं पिञ्जं नुदतु।**

पॉक्सो ई.बॉक्स NCPCR@gov.in इत्यत्र उपलभ्यते।

नवसमाजं प्रति
Towards a new dawn

**यदि भवतः/भवत्याः आयुः अष्टादशवर्षेभ्यः न्यूनम् अस्ति, भवान्/भवती कस्याञ्चिद् विपदि अस्ति अथवा दुविधाग्रस्तः/दुविधाग्रस्ता अस्ति। भवता भवत्या वा साकं कश्चन दुर्व्यवहारः घटितः, भवान्/भवती कस्मिंश्चित् सङ्कटे अस्ति अथवा कञ्चिद् एतादृशं बालकं काञ्चिद् एतादृशीं बालिकां वा जानाति तदा....**

**1098 इत्यस्यां सङ्ख्यायां दूरवाणीं करोतु यतः केचन उत्तमाङ्काः जीवनं परिवर्तयन्ति।**




**बाल-सहायिका सङ्ख्या 1098 विपद्ग्रस्तेभ्यः बालेभ्यः अहर्निशं निःशुल्का राष्ट्रिया आपत्कालीना दूरवाणी-सेवा, महिला एवं बाल-विकास-मन्त्रालयस्य सहयोगेन चाइल्ड इंडिया फाउण्डेशन इति संस्थायाः प्रयासः अस्ति।**

नवसमाजं प्रति
Towards a new dawn

स्वच्छम् भारतम्
एकं पदं स्वच्छतां प्रति

G20 भारत 2023 INDIA

आज़ादी का अमृत महोत्सव

# मणिका

## संस्कृत-अभ्यास-पुस्तकम्

### प्रथमो भागः

( नवमश्रेण्यै )



केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्




**प्रथमं संस्करणम्** : अक्टूबर 1999

**द्वितीयं संशोधितं संस्करणम्** : जून 2024



© CBSE



**प्रकाशकः** : निदेशकः, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्
शिक्षा-सदनम्, 17, राऊज़ एवेन्यू, नई दिल्ली-110002



This book or part thereof may not be reproduced by any person or agency in any manner.



**मुद्रकः आवरण-सज्जा च** : **लक्ष्मी प्रिंट इंडिया**
556, जी.टी. रोड, शाहदरा, दिल्ली-110032

# पुरोवाक्

## ( द्वितीयं संशोधितं मुद्रितं संस्करणम् 2024 )

भारतस्य द्वे प्रतिष्ठे वर्तेते संस्कृतं संस्कृतिश्चेति। संस्कृतस्य महत्त्वं सुविदितमेव। संस्कृतिश्च जीवनस्य श्रेयो मार्ग:। कस्या: अपि भाषाया: शिक्षणे श्रवणं, भाषणं, पठनं लेखनञ्च इत्येतेषु चतुर्षु कौशलेषु नैपुण्यम् अपेक्षितमेव भवति। परन्तु बहुभ्य: वर्षेभ्य: अथकप्रयत्नानन्तरम् अधुनापि विद्यालयेषु संस्कृतभाषाया: अध्यापनं यथा भवितव्यं तथा न जायमानं वर्तते। प्राय: सर्वत्रापि अनुवादमाध्यमेन अध्यापनं क्रियते। येन द्वादशकक्षामपि उत्तीर्णा: छात्रा: न केवलं भाषणे, वाचने अपि तु स्वतन्त्रतया लेखनेऽपि काठिन्यमनुभवन्ति उत वा असमर्था: भवन्ति। अत एव राष्ट्रियशिक्षानीति: 2020 इत्यत्रापि विशेषेण भारतीयभाषाणां संस्कृतीनाञ्च संवर्धनाय बलं प्रदत्तं विद्यते।

एतदनुभूय एव विद्यालयेषु संस्कृतस्य शिक्षणार्थम् उपयुक्तं पाठ्यपुस्तकम् अभ्यासपुस्तकं-श्रव्यदृश्योप-करणानां च निर्माणे केन्द्रियमाध्यमिकशिक्षासङ्घटनस्य शैक्षणिकविभाग: निरन्तरमेव प्रयत्नशील: विद्यते। एतदुद्दिश्य एव संस्कृतशिक्षणे सम्प्रेषणोपागममधिकृत्य अनेन सङ्घटनेन माध्यमिक-उच्चमाध्यमिककक्षाभ्य: चतुर्वर्षीयनवीनसंस्कृतपाठ्यक्रमस्य तदनुकूल-पाठानां पुस्तकानां च विकासाय एका नवीना प्रायोजना उपस्थापिता। अस्यां प्रायोजनायाम् अभ्यासपुस्तकसहितं 'मणिका' इति नाम पाठ्यपुस्तकं प्रथमपुष्परूपेण विकसितम्। नवीन-सामग्रीणां माध्यमेन विद्यार्थिन: संस्कृतभाषायां लेखनेन सह संस्कृतभाषणे अपि नैपुण्यं प्राप्स्यन्ति इति वर्तते पावनं लक्ष्यम्। संस्कृतस्य भाषिकतत्त्वानि अधिकृत्य व्याकरणस्य प्रायोगिकाभ्यासार्थम् इदम् अभ्यासपुस्तकं वर्तते। अस्य पुन: पुन: अभ्यासमाध्यमेन विद्यार्थिन: संस्कृतभाषाया: संरचनात्मकस्वरूपं ज्ञात्वा अस्या: व्यावहारिकरूपेण प्रयोगं कर्तुं समर्था: भविष्यन्ति इति विश्वसिमि।

अस्यां मणिका-अभ्यासपुस्तकस्य सम्पादन-परियोजनायां यै: अभ्याससामग्रीनिर्माणसमिति सदस्यै: अनवरतं परिश्रम: कृत:, ते नूनं साधुवादानर्हन्ति। पुनरपि एम. एल. खन्ना डी.ए.वी. पब्लिकविद्यालय:, द्वारका, नवदेहली इत्यस्य संस्कृतशिक्षक: श्रीअशोककुमार:, हंसराज मॉडल स्कूल, पञ्जाबीबाग, नवदेहली इत्यस्य सेवानिवृत्त: संस्कृतशिक्षक: डॉ. श्रीओमभारद्वाज:, अमृताविद्यालयम्, पुष्पविहारम्, नवदेहली इत्यस्य संस्कृतशिक्षक: श्रीउपेन्द्रकुमारमिश्र: इत्येतै: अभ्यासपुस्तक-संशोधनसमिति-सदस्यै: अनवरतं परिश्रम: कृत:। कालानुगुणम् आवश्यकतानुसारं पुस्तकस्य निर्माणादारभ्य अधुनायावत् नैके विद्वांस: अस्य पुस्तकस्य संवर्धनं सम्पादनं च कृतवन्त:। अस्यां प्रायोजनायां यै: अभ्यासनिर्माणसमिति-सदस्यै: पुस्तकसंशोधनसमिति-सदस्यैश्च अनवरतं परिश्रम: कृत: ते सर्वेऽपि पौन:पुन्येन साधुवादार्हा:।

अस्य अभ्यासपुस्तकस्य पुन: प्रकाशनार्थं केन्द्रीयमाध्यमिकशिक्षाबोर्ड इति सङ्घटनस्य शैक्षणिक-निदेशिका-डॉ. प्रज्ञा एम. सिंह-महोदयाया: विशिष्टं योगदानं निश्चयेन उद्देश्यं पूरयति, अत: महोदयस्य कृतेऽपि भूयांस: धन्यवादा:।

अन्यैरपि च यै: महानुभावै: अस्य पुस्तकस्य समीक्षणाय मुद्रणाय च सहयोग: प्रदत्त: तान् सर्वान् प्रति केन्द्रीयमाध्यमिक-शिक्षासङ्घटनं नूनं स्वकृतज्ञतां ज्ञापयति।

शिक्षाजगति किमपि मौलिकं कर्म अथवा अन्यविधं कार्यं वा अन्तिममिति कथयितुं न शक्यते। यत: सर्वत्र काले काले परिष्कारस्य संस्कारस्य वा अवकाश: भवत्येव। अत: अस्य पुस्तकस्य संशोधनाय परामर्शा: अपेक्षिता: स्वागतार्हा: च।

**राहुलसिंह:**, आई.ए.एस.
अध्यक्ष:, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

# सम्प्रेषणाधारितः पाठ्यक्रमः

प्रायः आधुनिकविद्यालयेषु संस्कृतस्य अध्ययनम् अध्यापनं च अनुवादसाहाय्येन एव भवति। इदम् अनुभूयते यत् अनेन मार्गेण छात्राणां संस्कृतवाचन-लेखन-भाषणनैपुण्यं सन्तोषप्रदं न अस्ति। एतेषु नैपुण्यं प्राप्तुं भूयो भूयः अभ्यासस्य आवश्यकता वर्तते। मन्यते एव 'अभ्याससारिणी विद्या' इति ।

एतदुद्दिश्य केन्द्रिय- माध्यमिकशिक्षा-सङ्घटनेन भाषा-शिक्षणे सम्प्रेषणोपागमाधिकृत्य माध्यमिक-उच्चमाध्यमिककक्षाभ्यः संस्कृतस्य चतुर्वर्षीयनवीन-पाठ्यक्रमहेतुना तदनुकूल-पाठ्यपुस्तकविकासाय एका प्रायोजना उपस्थापिता। अस्याः योजनायाः प्रमुखोद्देश्यानि सन्ति-

- राष्ट्रस्य सांस्कृतिकसमन्वये संस्कृतस्य भूमिकायाः उद्घाटनम्।
- छात्राणां मातृभाषायाः (अथवा क्षेत्रभाषायाः) संस्कृतस्य च मध्ये साम्यदर्शनम्।
- संस्कृतसाहित्ये निहितजीवनमूल्यानां प्रस्फुटनम्।
- संस्कृतवाचन-लेखन-भाषणनैपुण्यस्य विकासः।
- रुचिकरसामग्रीनिर्माणम् ।
- संस्कृते वस्तुनिष्ठ-उपयुक्त-मूल्याङ्कन-विधीनाम् आयोजनम् ।

अस्याः प्रायोजनायाः प्रमुखसोपानानि एतानि सन्ति-

(क) प्रथमचरणे पाठ्यपुस्तकस्य निर्माणम् ।

(ख) द्वितीयचरणे भाषिकतत्त्वाश्रिता कार्यपुस्तिका (अभ्यासपुस्तकम्)।

(ग) तृतीयचरणे संस्कृतध्वनिवैशिष्ट्यं विरामचिह्नवैशिष्ट्यं पाठ्यपुस्तकसामग्रीञ्च अधिकृत्य 'ऑडियोकैसेट्स' इति एषां निर्माणम्। (लिंग्वाफोनध्वनि-मुद्रिकापाठ्यपुस्तकम्)

(घ) अध्यापकनिर्देशिका इति चतुर्थचरणे ।

भाषा तु कौशलप्रधानविषयः। मन्यते यत् यथा जलतरणकौशलार्थं जलतरणम् एव उपायः तथैव वाचन-लेखन-भाषणेषु नैपुण्यं प्राप्तुं भाषायाः भूयो भूयः श्रवणम्, भाषणम्, वाचनम्, लेखनम् इत्येव उपायः। अतः भाषायाः शिक्षणस्य अधिगमनस्य च मूलं भाषिकतत्त्वानां भूयो भूयः अभ्यासे एव निहितम्। अस्य अभ्यासपुस्तकस्य निमार्णम् अनया दृष्ट्या एव कृतम्।

इदं विश्वस्यते यत् एतैः अभ्यासैः छात्राः संस्कृतमाध्यमेन सम्भाषणलेखनादिषु समर्थाः भविष्यन्ति। अस्मिन् अभ्यास-पुस्तके चित्राणां प्रचुरप्रयोगः कृतः येन विद्यार्थिनः प्रत्यक्षविधिना एव संस्कृतस्य प्रयोगं कर्तुं समर्थाः भवेयुः। अनुप्रयुक्तं व्याकरणम् एव एतेषाम् अभ्यासानाम् उद्देश्यम् अस्ति। छात्राः संस्कृतेन व्यवहारे सोत्साहाः भवेयुः इयम् एव कामना ।

**चांदकिरण सलूजा**

**संयोजकः**, पाठ्यसामग्री-निर्माण-समितिः

# मणिका-अभ्यासपुस्तकम् ( नवमश्रेण्यै )

## कृतज्ञता-ज्ञापनम्

### ( संशोधितं नूतनसंस्करणम् 2024 )


**केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड-परामर्श-समितिः**

- श्री राहुलसिंहः, आई.ए.एस., अध्यक्षः, केन्द्रीय-माध्यमिक-शिक्षाबोर्ड, नवदेहली
- डॉ. प्रज्ञा एम. सिंह, निदेशिका (शैक्षणिक-विभागः), केन्द्रीय-माध्यमिक-शिक्षाबोर्ड, नवदेहली

**पाठ्यसामग्री-निर्माणसमितिः सम्पादन-समितिः च ( संशोधित-नूतनसंस्करणस्य )**

- श्री अशोककुमारः, एम एल खन्ना डी. ए. वी. पब्लिकविद्यालयः, द्वारका, नवदेहली (संयोजकः समन्वयकश्च)
- डॉ. श्रीओमभारद्वाजः, हंसराज मॉडल स्कूल पञ्जाबीबाग, नवदेहली (सेवानिवृत्तः)
- श्री उपेन्द्रकुमारमिश्रः, अमृता-विद्यालयम् पुष्पविहारम्, नवदेहली

**पाठ्यसामग्री-निर्माणसमितिः ( प्रथमसंस्करणस्य )**

- श्री चांदकिरणसलूजा, प्राध्यापकः, शिक्षाविभागः, दिल्ली-विश्वविद्यालयः (संयोजकः) (सेवानिवृत्तः)
- डॉ. माणिकगोविन्दचतुर्वेदी, केन्द्रीय-हिन्दी-संस्थानम् (सेवानिवृत्तः)
- श्रीमती सन्तोष ठाकुर, पूर्व उप-प्रधानाचार्या, सर्वोदयविद्यालयः, पीतमपुरा, नवदेहली (सेवानिवृत्ता)
- डॉ. भास्करानन्दपाण्डेयः, प्रवक्ता राजकीय-वरिष्ठ-बालविद्यालयः, एस. पी. रोड, नांगलोई, नवदेहली (सेवानिवृत्तः)
- श्रीमती राजबत्रा, मुख्याध्यापिका, माध्यमिक-शाखा, मॉडर्न स्कूल, बाराखम्बा रोड, नवदेहली (सेवानिवृत्ता)

**सी.बी.एस.ई. समन्वयिका**

- डॉ. प्रज्ञा वर्मा (उपसचिव)




# राष्ट्रियशिक्षानीतिः 2020

अध्ययनकाले भारतीयभाषाः इति विषये षष्ठीतः अष्टमीस्तरपर्यन्तम् "एकं भारतं श्रेष्ठं भारतम्" इत्युपक्रमान्तर्गतं देशस्य प्रत्येकं विद्यार्थी आनन्ददायकपरियोजनायां गतिविधौ वा भागग्रहणं कुर्यात्। अनया परियोजनया गतिविधिना वा छात्राः अधिकांशरूपेण प्रमुखभारतीयभाषाणाम् उल्लेखनीयायाः परस्परसमानतायाः विषये जानीयुः। तदन्तर्गतं तासां सामान्यध्वन्यात्मकरूपेण वैज्ञानिकरूपेण च व्यवस्थितवर्णमालां, लिपिं, सामान्यव्याकरणसंरचनाः च अवगच्छेयुः। संस्कृतभाषातः अन्यशास्त्रीयभाषातः वा तासां शब्दावलीस्रोतसः उद्भवस्य च अन्वेषणेन सह तद्भाषाणां समृद्धेः परस्परप्रभावस्य अन्तर्भेदस्य चापि ज्ञानं भवति। ते इदमपि जानीयुः यत् कस्मिन् क्षेत्रे का भाषा भाष्यते तथा च आदिवासिभाषाणां प्रकृतिः संरचना च कीदृशी भवति। एवं भारतस्य प्रमुखभाषासु सामान्यरूपेण उच्यमानानां केषाञ्चन वाक्यानां तत्रत्यसमृद्धसाहित्यस्य च किञ्चित् परिचयं वक्तुं शक्नुयुः (आवश्यकतानुसारम् अनुवादमाध्यमेन)। एतादृग्गतिविधिना ते भारतस्य एकतायाः सुन्दरसांस्कृतिकपरम्परायाः विविधतायाः च परिचयं प्राप्नुयुः। आजीवनं ते भारतस्य अन्यभागानां जनैः सह मेलनावसरे सहजताम् अनुभवेयुः। इयं परियोजना गतिविधिः वा रुचिकरः आनन्ददायी गतिविधिः भवेत्। अपि च तत्र केनापि रूपेण मूल्याङ्कनस्य अन्तर्भावो न स्यात्। 4.16

भारतस्य शास्त्रीयभाषाणां साहित्यस्य महत्त्वं प्रासङ्गिकता सौन्दर्यञ्च कदापि हेयदृष्ट्या वीक्षितुं न शक्यन्ते। संस्कृतं संविधानस्य अष्टमानुसूच्यां वर्णिता महत्त्वपूर्णा आधुनिकभाषा विद्यते। अस्याः साहित्यम् एतादृशं विशालं विद्यते यत् लैटिन–ग्रीक–साहित्यं मेलयित्वा तुलना क्रियते चेदपि समानता न भवति। संस्कृतसाहित्ये गणितम्, दर्शनम्, व्याकरणम्, सङ्गीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कविता, कथा, (यस्य संस्कृतज्ञानप्रणाल्यां परिगणना भवति) इत्यादिविषयाणां विशालभाण्डागारो विद्यते। एतेषां साहित्यानां लेखनं भिन्नधार्मिकजनैः सह धार्मिकेतरजनैः सामाजिकार्थिकपृष्ठभूमिवर्गीयजनैः अपि सहस्रवर्षेभ्यः लिखितं विद्यते। अनया रीत्या संस्कृतं त्रिभाषासूत्रस्य मुख्याधारविकल्पेन सह विद्यालयेषु उच्चतरशिक्षायाः सर्वेषु स्तरेषु छात्राणां कृते महत्त्वपूर्णेन समृद्धेन विकल्पेन सह प्रदीयते। संस्कृतं रोचकतया अनुभवात्मकविधिना सह समकालिकप्रासङ्गिकतानुगुणं यत्र संस्कृतज्ञानप्रणाल्याः अन्तर्भावः स्यात् विशेषरूपेण ध्वनिमाध्यमेन उच्चारणमाध्यमेन च पाठ्यते। प्राथमिकस्तरस्य माध्यमिकस्तरस्य च संस्कृतपाठ्यपुस्तकानि 'संस्कृतेन संस्कृतपाठनम्' (एसटीएस) इति रीत्या पाठनीयानि। तदध्ययनम् आनन्ददायकं कर्तुं सरलमानकसंस्कृतस्य (एसएसएस) प्रयोगः कर्तुं शक्यते। 4.17



# भारत का संविधान

## उद्देशिका

हम, भारत के लोग, भारत को एक सम्पूर्ण [1]प्रभुत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक गणराज्य बनाने के लिए, तथा उसके समस्त नागरिकों को:

सामाजिक, आर्थिक और राजनैतिक न्याय,
विचार, अभिव्यक्ति, विश्वास, धर्म
और उपासना की स्वतंत्रता,
प्रतिष्ठा और अवसर की समता
प्राप्त कराने के लिए
तथा उन सब में व्यक्ति की गरिमा
[2]और राष्ट्र की एकता और अखंडता
सुनिश्चित करने वाली बंधुता बढ़ाने के लिए

दृढ़संकल्प होकर अपनी इस संविधान सभा में आज तारीख 26 नवम्बर, 1949 ई॰ को एतद्द्वारा इस संविधान को अंगीकृत, अधिनियमित और आत्मार्पित करते हैं।

1. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977) से "प्रभुत्व-संपन्न लोकतंत्रात्मक गणराज्य" के स्थान पर प्रतिस्थापित।
2. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977) से "राष्ट्र की एकता" के स्थान पर प्रतिस्थापित।

---

### भाग 4 क

# मूल कर्त्तव्य

**51 क. मूल कर्त्तव्य** – भारत के प्रत्येक नागरिक का यह कर्त्तव्य होगा कि वह –

(क) संविधान का पालन करे और उसके आदर्शों, संस्थाओं, राष्ट्रध्वज और राष्ट्रगान का आदर करे;

(ख) स्वतंत्रता के लिए हमारे राष्ट्रीय आंदोलन को प्रेरित करने वाले उच्च आदर्शों को हृदय में सँजोए रखे और उनका पालन करे;

(ग) भारत की प्रभुता, एकता और अखंडता की रक्षा करे और उसे अक्षुण्ण रखे;

(घ) देश की रक्षा करे और आह्वान किए जाने पर राष्ट्र की सेवा करे;

(ङ) भारत के सभी लोगों में समरसता और समान भ्रातृत्व की भावना का निर्माण करे जो धर्म, भाषा और प्रदेश या वर्ग पर आधारित सभी भेदभाव से परे हों, ऐसी प्रथाओं का त्याग करे जो स्त्रियों के सम्मान के विरुद्ध हैं;

(च) हमारी सामासिक संस्कृति की गौरवशाली परंपरा का महत्त्व समझे और उसका परिरक्षण करे;

(छ) प्राकृतिक पर्यावरण की जिसके अंतर्गत वन, झील, नदी, और वन्य जीव हैं, रक्षा करे और उसका संवर्धन करे तथा प्राणिमात्र के प्रति दयाभाव रखे;

(ज) वैज्ञानिक दृष्टिकोण, मानववाद और ज्ञानार्जन तथा सुधार की भावना का विकास करे;

(झ) सार्वजनिक संपत्ति को सुरक्षित रखे और हिंसा से दूर रहे;

(ञ) व्यक्तिगत और सामूहिक गतिविधियों के सभी क्षेत्रों में उत्कर्ष की ओर बढ़ने का सतत प्रयास करे जिससे राष्ट्र निरंतर बढ़ते हुए प्रयत्न और उपलब्धि की नई उंचाइयों को छू ले;

[1](ट) यदि माता-पिता या संरक्षक है, छह वर्ष से चौदह वर्ष तक की आयु वाले अपने, यथास्थिति, बालक या प्रतिपाल्य के लिये शिक्षा के अवसर प्रदान करे।

1. संविधान (छयासीवां संशोधन) अधिनियम, 2002 द्वारा प्रतिस्थापित।

# THE CONSTITUTION OF INDIA

## PREAMBLE

**WE, THE PEOPLE OF INDIA,** having solemnly resolved to constitute India into a [1]**SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC** and to secure to all its citizens :

**JUSTICE,** social, economic and political;

**LIBERTY** of thought, expression, belief, faith and worship;

**EQUALITY** of status and of opportunity; and to promote among them all

**FRATERNITY** assuring the dignity of the individual and the[2] unity and integrity of the Nation;

**IN OUR CONSTITUENT ASSEMBLY** this twenty-sixth day of November, 1949, do **HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.**

1. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "Sovereign Democratic Republic" (w.e.f. 3.1.1977)
2. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "unity of the Nation" (w.e.f. 3.1.1977)

---

# THE CONSTITUTION OF INDIA

## Chapter IV A

## FUNDAMENTAL DUTIES

**ARTICLE 51A**

**Fundamental Duties -** It shall be the duty of every citizen of India-

(a) to abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

(b) to cherish and follow the noble ideals which inspired our national struggle for freedom;

(c) to uphold and protect the sovereignty, unity and integrity of India;

(d) to defend the country and render national service when called upon to do so;

(e) to promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

(f) to value and preserve the rich heritage of our composite culture;

(g) to protect and improve the natural environment including forests, lakes, rivers, wild life and to have compassion for living creatures;

(h) to develop the scientific temper, humanism and the spirit of inquiry and reform;

(i) to safeguard public property and to abjure violence;

(j) to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement;

[1](k) to provide opportunities for education to his/her child or, as the case may be, ward between age of 6 and 14 years.

1. Subs, by the Constitution (Eighty-Sixth Amendment) Act. 2002.

# पाठानुक्रमणिका


| | | | पृष्ठाङ्काः |
|---|---|---|---|
| प्रथमः अभ्यासः | - | उच्चारणस्थानानि | 1-7 |
| द्वितीयः अभ्यासः | - | सन्धयः | |
| | | (क) स्वर-सन्धिः | 8-19 |
| | | (ख) व्यञ्जन-सन्धिः | 20-32 |
| | | (ग) विसर्ग-सन्धिः | 33-46 |
| तृतीयः अभ्यासः | - | शब्दरूपाणां प्रयोगः | |
| | | (क) अजन्तशब्दाः | 47-67 |
| | | (ख) हलन्तशब्दाः | 68-69 |
| | | (ग) सर्वनाम | 70-79 |
| | | (घ) सङ्ख्यावाचकशब्दाः | 80-84 |
| चतुर्थः अभ्यासः | - | धातुरूपाणां प्रयोगः | |
| | | (क) लट्लकारः (वर्तमानकालः) | 85-90 |
| | | (ख) लङ्लकारः (भूतकालः) | 91-94 |
| | | (ग) लृट्लकारः (भविष्यत्कालः) | 95-99 |
| | | (घ) लोट्लकारः (आदेशार्थे) | 100-103 |
| | | (ङ) विधिलिङ्लकारः (सम्भावनार्थे) | 104-108 |
| पञ्चमः अभ्यासः | - | विभक्तीनां प्रयोगाः | |
| | | (क) कारकपरिचयः | 109-110 |
| | | (ख) प्रथमा-द्वितीया-विभक्ति-प्रयोगः | 111-114 |
| | | (ग) तृतीयाविभक्तिप्रयोगः | 115-119 |
| | | (घ) चतुर्थीविभक्तिप्रयोगः | 120-122 |
| | | (ङ) पञ्चमीविभक्तिप्रयोगः | 123-126 |

| | | | |
|---|---|---|---|
| | | (च) षष्ठीविभक्तिप्रयोग: | 127–129 |
| | | (छ) सप्तमीविभक्तिप्रयोग: | 130–134 |
| | | (ज) विहङ्गावलोकनम् | 135–138 |
| षष्ठ: अभ्यास: | – | प्रत्यय-प्रयोग: | |
| | | (क) क्त्वा प्रत्यय: | 139–142 |
| | | (ख) ल्यप् प्रत्यय: | 143–148 |
| | | (ग) तुमुन् प्रत्यय: | 149–154 |
| | | (घ) क्तवतु-क्त-प्रत्ययौ | 155–164 |
| | | (ङ) शतृ प्रत्यय: | 165–172 |
| सप्तम: अभ्यास: | – | अव्ययानि | 173–175 |
| अष्टम: अभ्यास: | – | अपठितावबोधनम् | 176–183 |
| नवम: अभ्यास: | – | रचनात्मककार्यम् | |
| | | (क) पत्रलेखनम् | 184–194 |
| | | (ख) चित्रवर्णनम् | 195–199 |
| | | (ग) अनुच्छेदलेखनम् | 200–202 |
| | | (घ) कथापूर्ति: | 203–205 |
| | | (ङ) संवादलेखनम् | 206–211 |
| परिशिष्टम् | – | | |
| | | (क) शब्दरूपाणि | 212–220 |
| | | (ख) धातुरूपाणि | 221–234 |
| | | (ग) सङ्ख्या 1–100 | 235 |

# प्रथमः अभ्यासः

# उच्चारणस्थानानि

**आचार्यः** छात्राः! इदं वाक्यं पठत

| त्वं कार्यं कृत्वा विद्यालयं गच्छसि। |
|---|

अधुना कथयत – अस्मिन् वाक्ये कानि-कानि कति च पदानि सन्ति?

**अनुजः** महोदय! अस्मिन् वाक्ये त्वं | कार्यं | कृत्वा | विद्यालयं | गच्छसि इति पञ्च पदानि सन्ति।

**आचार्यः** शोभनम्! प्रत्येकं पदे के के वर्णाः सन्ति? लिखित्वा दर्शयत।

**सुरभिः**

| | |
|---|---|
| त्वं (त्वम्) | = त् + व् + अ + म् |
| कार्यं (कार्यम्) | = क् + आ + र् + य् + अ + म् |
| कृत्वा | = क् + ऋ + त् + व् + आ |
| विद्यालयं (विद्यालयम्) | = व् + इ + द् + य् + आ + ल् + अ + य् + अ + म् |
| गच्छसि | = ग् + अ + च् + छ् + अ + स् + इ |

**आचार्यः** शोभनम्! अधुना इतोऽपि अभ्यासं कुर्मः।

**शिष्याः** अस्तु महोदय!

## अभ्यासः

**1. अधोलिखितानां वाक्यानां पदानि उदाहरणानुसारं लिखित्वा वर्णविन्यासः क्रियताम्।**

क. श्रीमन्! भवान् किं कथयितुम् इच्छति?

| | पदानि | वर्णविन्यासः |
|---|---|---|
| उदाहरणम् | श्रीमन् | श् + र् + ई + म् + अ + न् |
| | ................... | ........................................................................... |
| | ................... | ........................................................................... |
| | ................... | ........................................................................... |
| | ................... | ........................................................................... |

ख. किञ्चिदपि न।

.................. ..........................................................................

.................. ..........................................................................

ग. अहा! एवम्! सूचयित्वा एव भवता तत्र गन्तव्यम्।

.................. ..........................................................................

.................. ..........................................................................

.................. ..........................................................................

.................. ..........................................................................

.................. ..........................................................................

.................. ..........................................................................

.................. ..........................................................................

घ. ब्राह्मण: सहजदारिद्र्यात् अचिन्तयत्।

.................. ..........................................................................

.................. ..........................................................................

.................. ..........................................................................

ङ. अहं भवतां कृतज्ञ: अस्मि।

.................. ..........................................................................

.................. ..........................................................................

.................. ..........................................................................

.................. ..........................................................................

**2. (क) निम्नलिखितवर्णानां संयोजनं कृत्वा पदनिर्माणं कुरुत–**

अ + ह् + अ + म् ........................................

त् + आ + न् + इ ........................................

क् + अ + म् + अ + ल् + आ + न् + इ ........................................

प् + अ + श् + य् + आ + म् + इ ........................................

**(ख) निर्मितानि पदानि संयोज्य वाक्यं लिखत।**

........................................................................................................................

........................................................................................................................

**आचार्य:** अति शोभनम्! प्रसन्नोऽस्मि! अग्रे वयं सम्पूर्णवर्णमालां पठिष्याम:।

## संस्कृतवर्णमाला

**स्वराः** – येषां वर्णानाम् उच्चारणं स्वतन्त्रतया भवति ते वर्णाः स्वराः कथ्यन्ते। स्वराः त्रिविधाः भवन्ति।

(i) ह्रस्वस्वराः (ii) दीर्घस्वराः (iii) प्लुतस्वराः

अत्र वयं केवलं ह्रस्वस्वराणां दीर्घस्वराणां च अध्ययनं करिष्यामः।

| **ह्रस्वस्वराः** (एते एकमात्राकालेन उच्चार्यमाणाः) | | **दीर्घस्वराः** (एते द्विमात्राकालेन उच्चार्यमाणाः) | **संयुक्तस्वराः (नित्यदीर्घस्वराः)** |
|---|---|---|---|
| अ | → | आ | ए |
| इ | → | ई | ऐ |
| उ | → | ऊ | ओ |
| ऋ | → | ॠ | औ |
| ऌ | – | | |

## अभ्यासः

**3. अत्र वयं पश्यामः यत् संस्कृतभाषायां**

(क) पञ्च मूलस्वराः भवन्ति = ....... ....... ....... ....... .......। एते एव ह्रस्वस्वराः सन्ति।

(ख) अष्ट दीर्घस्वराः सन्ति = ....... ....... ....... ....... ....... ....... ....... .......

(ग) ....... ....... ....... ....... इत्येतेषां दीर्घस्वराणां ह्रस्वरूपं न भवति। अतः एते नित्यदीर्घस्वराः उच्यन्ते।

एतेषु स्वरयोः योगः भवति।

| | | | | |
|---|---|---|---|---|
| ए | = | अ/आ | + | इ/ई |
| ऐ | = | .................... | + | .................... |
| ओ | = | .................... | + | .................... |
| औ | = | .................... | + | .................... |

**व्यञ्जनानि** : येषां वर्णानाम् उच्चारणं स्वरवर्णानां साहाय्येन एव सम्भवति, ते वर्णाः व्यञ्जनवर्णाः कथ्यन्ते।

| | | सङ्ख्या |
|---|---|---|
| वर्गीयव्यञ्जनानि (स्पर्शव्यञ्जनानि) | कवर्गः – क् ख् ग् घ् ङ् | 5 |
| | चवर्गः – च् छ् ज् झ् ञ् | 5 |
| | टवर्गः – ट् ठ् ड् ढ् ण् | 5 |
| | तवर्गः – त् थ् द् ध् न् | 5 |
| | पवर्गः – प् फ् ब् भ् म् | 5 |
| | | 25 |

| | | सङ्ख्या |
|---|---|---|
| अवर्गीयव्यञ्जनानि | अन्तःस्थाः – य् र् ल् व्<br>ऊष्माणः – श् ष् स् ह् | 4<br>4 |
| | | 8 |

## उच्चारणस्थानानि

- स्वराणां व्यञ्जनानां च उच्चारणं कुरुत प्रत्येकं वर्णस्य उच्चारणसमये ध्यानेन अनुभवत च।
- वर्णस्य उच्चारणसमये अस्माकं मुखस्य किम् अङ्गम् अधिकं सक्रियम् भवति?
- विशेषतः कवर्गस्य उच्चारणे कण्ठस्य स्थितिः कीदृशी अस्ति?
- विशेषतः चवर्गस्य उच्चारणे 'तालु' इति स्थानस्य कीदृशी स्थितिः अस्ति?
- विशेषतः टवर्गस्य उच्चारणे 'मूर्धा' इति स्थानस्य कीदृशी स्थितिः अस्ति?
- विशेषतः तवर्गस्य उच्चारणे 'दन्तानां' स्थितिः कीदृशी अस्ति?
- विशेषतः पवर्गस्य उच्चारणे 'ओष्ठयोः' स्थितिः कीदृशी अस्ति?

**अधुना इदं चित्रं ध्यानेन पश्यत–**

क. अलिजिह्वा
ख. स्निग्धतालु
ग. कठिनतालु
घ. मूर्धा
ङ. श्वासमार्गः
च. नासिका
छ. ओष्ठौ
ज. दन्ताः




## अभ्यासः

**4. निम्नलिखितवर्णानाम् उच्चारणं कुरुत। ध्यानेन अनुभवत यत् अस्माकं मुखे जिह्वा मुखस्य कस्य अङ्गस्य स्पर्शं करोति। तस्य अङ्गस्य नाम लिखत।**

च .............. ट .............. त .............. छ .............. न .............. थ

ज .............. ठ .............. द .............. ध .............. ण .............. झ

ड .............. ढ .............. ञ

5. निम्नलिखितपदानाम् उच्चारणं कुरुत–

कमलम्, गीतम्, गुणः, नाटकम्, भोजनम्, पीठम्, गणितम्।

6. रिक्तस्थानानां पूर्तिः क्रियताम्–

| नासिक्यवर्णाः | उच्चारणस्थानम् | | |
|---|---|---|---|
| यथा ङ् | कण्ठः | + | नासिका |
| ञ् | .......................... | + | .......................... |
| ण् | .......................... | + | .......................... |
| न् | .......................... | + | .......................... |
| म् | .......................... | + | .......................... |

## व्यञ्जन-स्वर-संयोगः

लेखने व्यञ्जनैः सह उच्चार्यमाणाः स्वराः चिह्नैः लिख्यन्ते। यथा–

| व्यञ्जनानि | + | स्वराः | (स्वरचिह्नम्) | = | व्यञ्जनम्+स्वरचिह्नम् |
|---|---|---|---|---|---|
| क् | + | आ | ( ा ) | = | का |
| क् | + | इ | ( ि ) | = | कि |
| क् | + | ई | ( ी ) | = | की |
| क् | + | उ | ( ु ) | = | कु |
| क् | + | ऊ | ( ू ) | = | कू |
| क् | + | ऋ | ( ृ ) | = | कृ |
| क् | + | ॠ | ( ॄ ) | = | कॄ |
| क् | + | ए | ( े ) | = | के |
| क् | + | ऐ | ( ै ) | = | कै |
| क् | + | ओ | ( ो ) | = | को |
| क् | + | औ | ( ौ ) | = | कौ |

| वर्णस्य उत्पत्तिस्थानम् | स्वराः | ( वर्गीयव्यञ्जनानि ) | अवर्गीयव्यञ्जनानि | | स्थानजन्यवर्णस्य नाम |
|---|---|---|---|---|---|
| | | | अन्तःस्थाः | ऊष्माणः | |
| कण्ठः | अ आ (:) | क ख ग घ ङ | | ह | कण्ठ्यः |
| तालु | इ ई | च छ ज झ ञ | य | श | तालव्यः |
| मूर्धा | ऋ ॠ | ट ठ ड ढ ण | र | ष | मूर्धन्यः |
| दन्ताः | ऌ | त थ द ध न | ल | स | दन्त्यः |
| ओष्ठौ | उ ऊ | प फ ब भ म | | | ओष्ठ्यः |
| कण्ठ-तालु | ए ऐ | | | | कण्ठतालव्यः |
| कण्ठोष्ठम् | ओ औ | | | | कण्ठोष्ठ्यः |
| दन्तोष्ठम् | | | व | | दन्तोष्ठ्यः |
| नासिका | | ङ, ञ, ण, न, म | | | नासिक्यः |

अत्र ध्यातव्यं यत् ह्रस्वस्य 'अ' वर्णस्य विशिष्टं चिह्नं नास्ति अपितु क् ख् ग् इत्यादीनां व्यञ्जनानाम् अधस्तात् विद्यमानस्य हलन्त-चिह्नस्य लोपेन एव 'अ' वर्णस्य योगः सूच्यते। यथा- क् + अ = क, च् + अ = च, म् + अ = म इत्यादयः। अधुना निम्नलिखितशब्देषु निर्देशानुसारं व्यञ्जन-स्वर-संयुक्तानि अक्षराणि चित्वा लिखत-

| | शब्दाः | | स्वरयुक्तव्यञ्जनानि | शब्दाः | | स्वरयुक्तव्यञ्जनानि |
|---|---|---|---|---|---|---|
| (क) यथा | उपर्युक्त | = | प यु त | गच्छत | = | .......................... |
| | क्रमशः | = | र म श | छात्रा | = | .......................... |
| | व्यक्त | = | .......................... | श्रीमान् | = | .......................... |
| | व्यक्ति | = | .......................... | नासिक्य | = | .......................... |
| | चिह्नम् | = | .......................... | कण्ठ्य | = | .......................... |
| | लिखित | = | .......................... | स्वरान् | = | .......................... |
| | लेखितव्यानि | = | .......................... | विद्यालय | = | .......................... |

(ख) कृत्वा, प्रसन्नः, रूपेण, करिष्यामः, नीत्वा, नवीनानि, दीर्घस्वराः, अष्ट, वर्गीकरणम्, भाषया, उच्चारणम्, जिह्वा, सदैव, मोदकौ इति शब्देषु सन्ति।

यथा 'अ' स्वरेण युक्तव्यञ्जनानि = र, स, न, ण, क, म, न, घ, व, ट, व, क, र, ण, ष, र, ण, स, व, द

'आ' स्वरेण युक्तव्यञ्जनानि = ..............................................................................

'इ' स्वरेण युक्तव्यञ्जनानि = ..............................................................................

'ई' स्वरेण युक्तव्यञ्जनानि = ..............................................................................

'उ' स्वरेण युक्तव्यञ्जनानि = ..............................................................................

'ऊ' स्वरेण युक्तव्यञ्जनानि = ..............................................................................

'ए' स्वरेण युक्तव्यञ्जनानि = ..............................

'ऐ' स्वरेण युक्तव्यञ्जनानि = ..............................

'ओ' स्वरेण युक्तव्यञ्जनानि = ..............................

'औ' स्वरेण युक्तव्यञ्जनानि = ..............................

## उच्चारणस्थानानि

**निर्देशानुसारम् उत्तरत–**

1. 'अ' वर्णस्य उच्चारणस्थानं .................. भवति।
2. क्, ग्, ह्, ध्, घ् वर्णेषु कः वर्णः कण्ठ्यः नास्ति?
3. 'अशोकः' इति पदे कः वर्णः तालव्यः?
4. 'वर्षा' इति पदे .................. वर्णस्य उच्चारणस्थानं दन्तोष्ठम् इति अस्ति।
5. 'ड्' वर्णस्य उच्चारणस्थानं लिखत।
6. 'स्' वर्णः मूर्धन्यः अस्ति दन्त्यः वा?
7. 'साधुः' इति पदे कस्य वर्णस्य उच्चारणस्थानम् ओष्ठौ इति अस्ति।
8. र्, भ्, ज्, ख्, न् इति वर्णेषु कस्य उच्चारणस्थानं मूर्धा अस्ति।
9. घ्, ज्, ण्, प् वर्णेषु कस्य उच्चारणस्थानं नासिका अस्ति?
10. कण्ठोष्ठ्यः वर्णः कः?

### अस्माभिः अधीतम्

- शब्दाः वर्णानां योगेन भवन्ति।
- संस्कृतवर्णमालायां – पञ्चमूलस्वराः सन्ति। एते ह्रस्वस्वराः अपि कथ्यन्ते। अष्टदीर्घस्वराः।
- ए, ऐ, ओ, औ – दीर्घस्वराणां ह्रस्वरूपं न भवति।
- पञ्चविंशतिः वर्गीयव्यञ्जनानि सन्ति। एतानि स्पर्शव्यञ्जनानि अपि कथ्यन्ते।
- य्, र्, ल्, व् इति अन्तःस्थाः वर्णाः।
- श्, ष्, स्, ह् इति ऊष्मव्यञ्जनानि।
- प्रत्येकं वर्णस्य विशिष्टम् उच्चारणस्थानम् अस्ति।
- लेखने व्यञ्जनैः सह उच्चार्यमाणाः स्वराः मात्राभिः योज्यन्ते।
- वर्णानां समुचितसंयोगेन शब्दाः जायन्ते शब्दैः च वाक्यानि।

# द्वितीयः अभ्यासः

# सन्धयः

## (क) स्वर-सन्धिः

**सन्धि-संयोग-भेदः**
**दीर्घसन्धिः, गुणसन्धिः,**
**वृद्धिसन्धिः, यण् सन्धिः,**
**अयादिसन्धिः**

भवद्भिः पठितं यत् वर्णानां योगेन शब्दाः भवन्ति।

यथा व् + अ + र् + ष् + आ = वर्षा

व् + इ + द् + व् + आ + न् = विद्वान्

**एवमेव अधोलिखितान् वर्णान् योजयित्वा शब्दनिर्माणं कुरुत–**

1. व् + इ + द् + य् + आ + ल् + अ + य् + अः = ..................................
2. ग् + र् + आ + म् + अ + म् = ..................................
3. अ + ग् + अ + च् + छ् + अ + त् + अ = ..................................
4. ज् + इ + ज् + ञ् + आ + स् + आ = ..................................
5. क् + ष् + अ + त् + र् + इ + य् + अः = ..................................

**उपरिलिखितेषु शब्देषु स्वराः कस्मिन् रूपे परिवर्तिताः? नूनं मात्रारूपेण व्यञ्जनैः सह संयुक्ताः। एषः वर्णसंयोगः। एवमेव अधोलिखितानि पदानि वर्णसंयोगेन योजयत–**

यथा ग्रामम् + अगच्छत् = ..................................

धनम् + आनयति = ..................................

1. संस्कृतम् + अधीते = ..................................
2. ग्रन्थम् + अधीतवान् = ..................................
3. विद्यालयम् + आगतः = ..................................
4. पठितुम् + इच्छति = ..................................
5. धनार्थम् + अगच्छत् = ..................................

एते शब्दाः वर्णसंयोगेन योजिताः। इदानीम् अधोलिखितं पदद्वयं पश्यत–

(i) हिम + आलयः (ii) विद्या + आलयः

अत्र 'हिम' शब्दे कः अन्तिमः वर्णः?

वर्णविश्लेषणं कृत्वा पश्याम:

हिम = ह् + इ + म् + अ = अन्तिमवर्ण: ..................................

एवमेव 'विद्या' इति पदस्य अन्तिमवर्णं जानीम:

विद्या = व् + इ + द् + य् + आ = अन्तिमवर्ण: ..................................

'आलय:' शब्दे क: प्रथमवर्ण: = ?

आ + ल् + अ + य् + अ: = प्रथमवर्ण: = ..................................

इदानीं पदद्वयं योजयाम:

1. हिम् + अ + आ + लय: = हिम् + आ + लय: = हिमालय:

2. विद्य् + आ + आ + लय: = विद्य् + आ + लय: = विद्यालय:

अत्र अ + आ = आ, आ + आ = आ

**संयोग: – यत्र द्वयो: पदयो: संयोगेन परिवर्तनं न भवति।**

**सन्धि: – यत्र द्वयो: पदयो: संयोगेन परिवर्तनं ( विकार: ) भवति।**

**एवमेव अधोलिखिततालिकां पश्यत–**

## दीर्घसन्धि:

| पूर्वपदस्य अन्तिम: स्वर: | + उत्तरपदस्य प्रथमस्वर: | = सन्धिस्वर: |
|---|---|---|
| अ / आ | + अ / आ | = आ |
| इ / ई | + इ / ई | = ई |
| उ / ऊ | + उ / ऊ | = ऊ |
| ऋ / ॠ | + ऋ / ॠ | = ॠ |

## अभ्यास:

**क. उपर्युक्ततालिकां दृष्ट्वा अधोलिखितपदेषु सन्धिं कुरुत–**

| | पूर्वपदम् | | उत्तरपदम् | अन्तिमस्वर: | | प्रथमस्वर: | | सन्धिस्वर: | सन्धिपदम् |
|---|---|---|---|---|---|---|---|---|---|
| यथा सूर्यास्त: | सूर्य | + | अस्त: | अ | + | अ | = | आ | सूर्यास्त: |
| भाण्डागार: | भाण्ड | + | आगार: | अ | + | आ | = | आ | भाण्डागार: |
| 1. | विद्या | + | अर्थी | ........ | + | ........ | = | ........ | .................. |
| 2. | सुख | + | अर्थी | ........ | + | ........ | = | ........ | .................. |
| 3. | महा | + | आशय: | ........ | + | ........ | = | ........ | .................. |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 4. | हरि | + | इच्छा | ........ | + | ........ | = | ........ | .................. |
| 5. | मुनि | + | ईशः | ........ | + | ........ | = | ........ | .................. |
| 6. | प्रति | + | ईक्षा | ........ | + | ........ | = | ........ | .................. |
| 7. | रजनी | + | ईशः | ........ | + | ........ | = | ........ | .................. |
| 8. | गुरु | + | उपदेशः | ........ | + | ........ | = | ........ | .................. |
| 9. | वधू | + | उत्सवः | ........ | + | ........ | = | ........ | .................. |
| 10. | पितृ | + | ऋणम् | ........ | + | ........ | = | ........ | .................. |

**पश्यत - आ, ई, ऊ, ॠ इति एते दीर्घस्वराः सन्ति।**

**अत्र अ, इ, उ, ऋ एतेषां स्वराणां समानस्वरेण सह योगः भूत्वा द्वयोः एव स्थाने एकः दीर्घः भवति। अतः अत्र दीर्घसन्धिः अस्ति।**

**ख. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. तस्य भार्या स्वबालापत्यस्य .................. + .................. रक्षार्थं तम् अवस्थाप्य स्नातुं गता।
2. सोत्साहानां नराणां न+अस्ति .................. असाध्यम्।
3. स्वदेशं स्वाधीनं .................. + .................. कर्तुं भवता किं न सोढम् ?
4. महद्भिः सुप्रतिष्ठितः अश्मा + अपि .................. देवत्वं याति।
5. अयं मुनिः क्वापि .................. + .................. नगरे ब्राह्मणगृहम् अगच्छत् ।
6. आरुणिः सर्वान् वेदान् स+अर्थान् .................. अधीतवान्।
7. वृक्षाणां फलानि अपि परार्थाय .................. + .................. भवन्ति।
8. अहमपि चिन्ता + आतुरा .................. अस्मि ।
9. मन्त्री भोजराजम् अकथयत् –'यथाज्ञापयति .................. + .................. देवः ।'
10. सैन्यविज्ञानेऽपि गभीर + अध्ययनं .................. कृत्वा अभूतपूर्वाः सिद्धयः भारतेन सम्प्राप्ताः ।
11. भारतेनास्ति .................. + .................. मे जीवनं जीवनम्।
12. हनुमान् कपि+ईशः .................. अपि कथ्यते ।
13. मुनीन्द्रः .................. + .................. सर्वान् स्नेहेन व्यवहरति।
14. मधु + उत्सवः .................. कदा भवति?
15. साधूपदेशः .................. + .................. सर्वैः श्रोतव्यः ।
16. मातृ + ऋणं .................. पितृणं च सर्वदा तिष्ठति।
17. महीशः .................. + .................. राजा भवति ।
18. भू + ऊर्जा .................. भूमौ कम्पनमपि जनयति

19. त्यागेन सुखानुभूतिः ………………… + ………………… भवति।

20. तर्कशास्त्रेण सत्य+असत्यविवेकः ………………… भवति।

21. साधूक्तं ………………… + ………………… भवता।

## गुणसन्धिः

| | | |
|---|---|---|
| अ / आ | + इ / ई | = ए |
| अ / आ | + उ / ऊ | = ओ |
| अ / आ | + ऋ / ॠ | = अर् |

**ध्यातव्यं यत् :-** अ/आ वर्णाभ्यां पश्चात् यदि इ/ई, उ/ऊ, ऋ/ॠ, लृ एतेषु वर्णेषु कश्चित् वर्णः आगच्छति तर्हि द्वयोः वर्णयोः स्थाने क्रमशः ए, ओ, अर्, अल् इति भवति।

## अभ्यासः

**क. उपर्युक्ततालिकां दृष्ट्वा अधोलिखितपदेषु सन्धिं कुरुत–**

| | पूर्वपदम् | | उत्तरपदम् | अन्तिमस्वरः | | प्रथमस्वरः | | सन्धिस्वरः | | सन्धिपदम् |
|---|---|---|---|---|---|---|---|---|---|---|
| यथा | गण | + | ईशः | अ | + | ई | = | ए | = | गणेशः |
| | महा | + | ईशः | आ | + | ई | = | ए | = | महेशः |
| 1. | महा | + | उत्सवः | ……… | + | ……… | = | ओ | = | ………………… |
| 2. | वार्षिक | + | उत्सवः | ……… | + | ……… | = | ……… | = | ………………… |
| 3. | सूर्य | + | उदयः | ……… | + | ……… | = | ……… | = | ………………… |
| 4. | महा | + | उदयः | ……… | + | ……… | = | ……… | = | ………………… |
| 5. | चन्द्र | + | उदयः | ……… | + | ……… | = | ……… | = | ………………… |
| 6. | देव | + | ऋषिः | ……… | + | ……… | = | ……… | = | ………………… |
| 7. | ग्रीष्म | + | ऋतुः | ……… | + | ……… | = | ……… | = | ………………… |
| 8. | गज | + | इन्दुः | ……… | + | ……… | = | ……… | = | ………………… |
| 9. | तव | + | लृकारः | ……… | + | ……… | = | ……… | = | ………………… |
| 10. | वर्षा | + | ऋतुः | ……… | + | ……… | = | ……… | = | ………………… |

**ख. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. 'अविवेकः परमापदां पदम्' इति पाठः हितोपदेशात् ………………… + ………………… गृहीतः।

2. सद्भिस्तु लीलया प्र+उक्तं ………………… शिलालिखितम् अक्षरं भवति।।

3. सोत्साहानां ………………… + ………………… नराणां किमपि असाध्यं न भवति।

4. राजपुत्रः राज + उचितं .................. प्रणम्य जयघोषं करोति ।

5. परमेश्वर! .................. + .................. दयस्व।' इति तृतीयः भिल्लः कथयति।

6. अस्मत्पुत्राणां नीतिशास्त्र + उपदेशाय .................. भवन्तः प्रमाणम्।

7. तस्योपरि .................. + .................. एका बलाका विष्ठाम् उदसृजत्।

8. मुने! न अहं बलाका + इति .................. सा गृहिणी अवदत्।

9. राजर्षिः .................. + .................. जनकः अष्टावक्रं गुरुं मन्यते।

10. भारते वेशभूषाशन + उपासनाः .................. पद्धतयः भिन्नाः सन्ति।

11. देवराजः सुरेन्द्रः .................. + .................. वृष्टिनियन्त्रकः भवति।

12. कार्यक्रमः हर्ष+उल्लासेन .................. सम्पन्नः अभवत्।

13. बालेन्दुः .................. + .................. कस्य चित्तं न हरति?

14. वर्षा + ऋतुः .................. मम प्रियः अस्ति।

15. जलोर्जा .................. + .................. बलीयसी भवति।

16. नर + ईशः .................. मम भ्राता अस्ति।

17. तस्य भाग्योदयः .................. + .................. अभवत्।

18. उप + इन्द्रः .................. संस्कृतशिक्षणं करोति ।

19. प्रकृतिः परोपकारं .................. + .................. करोति।

20. देव + ऋषिः .................. नारदः तत्रागच्छत्।

## मिश्रितप्रश्नाः

**अधोलिखितेषु सन्धिं कृत्वा सन्धिनाम च लिखत–**

| | पूर्वपदम् | | उत्तरपदम् | अन्तिमवर्णः | | प्रथमवर्णः | | सन्धिस्वरः | | सन्धिपदम् | नाम |
|---|---|---|---|---|---|---|---|---|---|---|---|
| यथा | वसन्त | + | आगमः | अ | + | आ | = | आ | = | वसन्तागमः | दीर्घः |
| | वसन्त | + | उत्सवः | अ | + | उ | = | ओ | = | वसन्तोत्सवः | गुणः |
| 1. | परि | + | ईक्षा | ........ | + | ........ | = | ........ | = | .................. | .................. |
| 2. | चञ्चल | + | ऊर्मिः | ........ | + | ........ | = | ........ | = | .................. | .................. |
| 3. | पर | + | उपकारः | ........ | + | ........ | = | ........ | = | .................. | .................. |
| 4. | चल | + | अचले | ........ | + | ........ | = | ........ | = | .................. | .................. |
| 5. | नियम | + | उल्लङ्घनम् | ........ | + | ........ | = | ........ | = | .................. | .................. |

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| 6. | हर्ष | + | उल्लास: | ........ | + | ........ | = | ........ | = | ................ | ................ |
| 7. | बाल | + | इन्दु: | ........ | + | ........ | = | ........ | = | ................ | ................ |
| 8. | रवि | + | इन्द्र: | ........ | + | ........ | = | ........ | = | ................ | ................ |

## वृद्धिसन्धिः

| | | |
|---|---|---|
| अ / आ | + ए / ऐ | = ऐ |
| अ / आ | + ओ / औ | = औ |

**ध्यातव्यं यत् :- अ/आ वर्णाभ्यां पश्चात् यदि ए/ऐ, ओ/औ एतेषु वर्णेषु कश्चित् वर्णः आगच्छति तर्हि द्वयोः वर्णयोः स्थाने क्रमशः ऐ, औ भवतः।**

## अभ्यासः

**क. उपर्युक्ततालिकां दृष्ट्वा अधोलिखितपदेषु सन्धिं कुरुत–**

| | पूर्वपदम् | | उत्तरपदम् | अन्तिमवर्णः | | प्रथमवर्णः | | सन्धिस्वरः | | सन्धिपदम् |
|---|---|---|---|---|---|---|---|---|---|---|
| यथा | तथा | + | एव | आ | + | ए | = | ऐ | = | तथैव |
| | न | + | एव | अ | + | ए | = | ऐ | = | नैव |
| 1. | महा | + | औषधिः | ........ | + | ........ | = | औ | = | ................ |
| 2. | मत | + | ऐक्यम् | ........ | + | ........ | = | ........ | = | ................ |
| 3. | जल | + | ओघः | ........ | + | ........ | = | ........ | = | ................ |
| 4. | वित्त | + | एषणा | ........ | + | ........ | = | ........ | = | ................ |
| 5. | अद्य | + | एव | ........ | + | ........ | = | ........ | = | ................ |
| 6. | सदा | + | एव | ........ | + | ........ | = | ........ | = | ................ |
| 7. | महा | + | ऐश्वर्यम् | ........ | + | ........ | = | ऐ | = | ................ |
| 8. | प्रार्थना | + | एषा | ........ | + | ........ | = | ........ | = | ................ |
| 9. | सा | + | एका | ........ | + | ........ | = | ........ | = | ................ |

**ख. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. सत्पुरुषाः समृद्धिभिः अनुद्धताः भवन्ति स्वभावः <u>एवैषः</u> ................ + ................ परोपकारिणाम्।
2. अहम् <u>अद्य + एव</u> ................ पात्राणां चयनं करोमि।
3. महाराज! <u>नैवं</u> ................ + ................ तावत् ।
4. <u>मम + एतत्</u> ................ सौभाग्यम्।
5. <u>एकैकम्</u> ................ + ................ अपि अनर्थाय, किमु यत्र चतुष्टयम्।

6. कथासरित्सागरात् सङ्कलिता + एषा .................. कथा।

7. दृष्टमात्रैव .................. + .................. बलाका भस्मसाद् अभवत्।

8. कर्मणा + एव .................. हि संसिद्धिम् आस्थिता जनकादय:।

9. आम्र ! छाययैव .................. + .................. दलयस्यतितापम् ।

10. यत्र + एक: .................. द्वादशवर्षीय: बालक: अष्टावक्र: जनकस्य सभासदान् ज्ञानेन अजयत् ।

11. नैकमार्गै: .................. + .................. प्रभुं चैकमाराधयद् मे भारतं भूतले भाति।

12. अष्टावक्र: परम + ओजस्वी .................. बालक: आसीत्।

13. गङ्गातटे वनौषधय: .................. + .................. भवन्ति।

14. वसुधा + एव .................. कुटुम्बकम् इति भारतीयदर्शनम् ।

15. क: उष्णौदनं .................. + .................. खादितुं न इच्छति ।

16. अहो ! तस्य महा + औदार्यम् ..................।

17. मह्यं गुड + ओदनं .................. बहु रोचते ।

18. विद्या परम + औषधि: .................. भवति ।

19. तत् पुस्तकं ममैव .................. + .................. अस्ति।

20. कौशलवान् भवितुं महौत्सुक्यम् .................. + .................. आवश्यकं भवति ।

## मिश्रितप्रश्ना:

**क. सन्धिच्छेदं कृत्वा नाम अपि लिखत–**

| | सन्धिपदम् | सन्धिच्छेद: | | | सन्धिस्वर: | | अन्तिमवर्ण: | | प्रथमवर्ण: | नाम |
|---|---|---|---|---|---|---|---|---|---|---|
| यथा– | विद्याभ्यासम् | विद्या | + | अभ्यासम् | आ | = | आ | + | अ | दीर्घ: |
| 1. | रेखाङ्कितम् | ........ | + | अङ्कितम् | आ | = | ........ | + | ........ | .............. |
| 2. | महेश: | ........ | + | .............. | ए | = | ........ | + | ........ | .............. |
| 3. | रवीन्द्र: | ........ | + | .............. | ई | = | ........ | + | ........ | .............. |
| 4. | भानूदय: | ........ | + | .............. | ऊ | = | ........ | + | ........ | .............. |
| 5. | सर्वाणीमानि | ........ | + | .............. | ई | = | ........ | + | ........ | .............. |
| 6. | महर्षि: | ........ | + | .............. | अर् | = | ........ | + | ........ | .............. |
| 7. | ममैव | ........ | + | .............. | ऐ | = | ........ | + | ........ | .............. |
| 8. | दर्शनेच्छा | ........ | + | .............. | ए | = | ........ | + | ........ | .............. |
| 9. | चापि | ........ | + | .............. | आ | = | ........ | + | ........ | .............. |
| 10. | नेदम् | ........ | + | .............. | ए | = | ........ | + | ........ | .............. |

## यण्सन्धिः

| | | | | |
|---|---|---|---|---|
| इ / ई<br>उ / ऊ<br>ऋ/ॠ<br>ऌ | + | कश्चिदपि<br>असमानस्वरः | = | इ/ई इत्यस्य स्थाने य्<br>उ/ऊ इत्यस्य स्थाने व्<br>ऋ/ॠ इत्यस्य स्थाने र्<br>ऌ इत्यस्य स्थाने ल् |

अधोलिखितपदद्वयस्य विश्लेषणं कुर्मः

**यद्यपि** = य् + अ + द् + य् + अ + प् + इ

**प्रत्येकम्** = प् + र् + अ + त् + य् + ए + क् + अ + म्

अत्र 'य्' स्थाने 'इ' लिखित्वा सन्धिच्छेदं कुर्मः

यद्यपि = य् + अ + द् + इ + अ + प् + इ

= यदि + अपि

प्रत्येकम् = प् + र् + अ + त् + इ + ए + क् + अ + म्

= प्रति + एकम्

एवमेव- सु + आगतम् = स् + व् + आगतम् = स्वागतम्

पितृ + आदेशः = पि + त् + र् + आदेशः = पित्रादेशः

## अभ्यासः

**क. अधोलिखितेषु पदेषु सन्धिच्छेदं कुर्मः**

| | सन्धियुक्तपदम् | | पूर्वपदम् | | उत्तरपदम् | अन्तिमवर्णः | + | प्रथमवर्णः | | सन्धिवर्णः |
|---|---|---|---|---|---|---|---|---|---|---|
| यथा- | इत्यादिः | = | इति | + | आदिः | इ | + | आ | = | य् + आ = या |
| | यात्विति | = | यातु | + | इति | उ | + | इ | = | व् + इ = वि |
| 1. | भ्रात्राज्ञा | = | ............... | + | ......... | ......... | = | ......... | = | .................. |
| 2. | अप्येवम् | = | ............... | + | ......... | ......... | = | ......... | = | .................. |
| 3. | गुर्वादेशः | = | ............... | + | ......... | ......... | = | ......... | = | .................. |
| 4. | प्रत्युपकारः | = | ............... | + | ......... | ......... | = | ......... | = | .................. |
| 5. | प्रत्यागमनम् | = | ............... | + | ......... | ......... | = | ......... | = | .................. |
| 6. | पित्रुपदेशः | = | पितृ | + | ......... | ......... | = | ......... | = | .................. |

**ख. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. <u>अस्ति + उज्जयिन्यां</u> .................... माधवः नाम विप्रः।

2. स्यूते कानिचित् पुस्तकानि फलानि + अपि .................. च सन्ति।

3. गच्छन् पिपीलको याति योजनानां शतान्यपि .................. + ..................।

4. सोत्साहानां नराणां नास्त्यसाध्यम् .................. + ..................।

5. भगवन्! यदि + एवं .................. तर्हि गृह्यताम् इदं देशं धर्मं च रक्षितुम्।

6. सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्धः .................. + .................. एव सः।

7. एकैकमपि + अनर्थाय .................. किमु यत्र चतुष्टयम्।

8. वरमेको गुणी पुत्रो न च मूर्खशतान्यपि .................. + ..................।

9. तदेतेषाम् अस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् इति + उक्त्वा .................. राजा तस्य करे स्वपुत्रान् समर्पितवान्।

10. लाकृतिः .................. + .................. इति यण्सन्धेः एकमुदाहरणम्।

11. स च क्रुद्धस्तां व्यलोकयत् .................. + ..................।

12. मुने! न भर्तृसेवायाः अपरं कञ्चन धर्मं करोमि + अहम् ..................।

13. श्वतेकेतो! एषु + एकं .................. बीजं भिन्धि।

14. फलान्यपि .................. + .................. परार्थाय वृक्षाः सत्पुरुषा इव।

15. अहो! एषां वरं जन्म सर्वप्राणि + उपजीवनम् ..................।

16. अष्टावक्रः मित्रैः सह क्रीडित्वा गृहं प्रत्यावृत्तः .................. + ..................।

17. इति + उक्त्वा .................. मात्रा अनुमतः अष्टावक्रः राजसभां गतः।

18. गन्तव्यमेव नास्त्युपायः .................. + ..................।

19. ननु + आश्चर्येण .................. किमपि पश्यति।

20. क्रीडनामोदसंस्कार-वृत्त्यादिषु .................. + .................. भिन्नं सदपि अभिन्नम् अस्ति मम भारतम्।

21. पुत्रेण पितृ+ उपदेशः .................. पालनीयः।

22. 'तत्र मा गच्छ' इति गुर्वादेशः .................. + .................. आसीत्।

## अयादिसन्धिः

**ए + स्वरः = ए स्थाने अय्**
**ओ + स्वरः = ओ स्थाने अव्**
**ऐ + स्वरः = ऐ स्थाने आय्**
**औ + स्वरः = औ स्थाने आव्**

ध्यातव्यं यत् :- **ए, ओ, ऐ, औ एतेभ्यः वर्णेभ्यः पश्चात् यदि कश्चन स्वरवर्णः भवति तदा ए, ओ, ऐ, औ इत्येतेषां स्थाने क्रमशः अय्, अव्, आय्, आव् इति भवन्ति।**

यथा– हरे + ए – हर् – ए + ए – हर् – अय् + ए = हरये

विष्णो + ए – विष्ण् – ए + ए – विष्ण् – अव् + ए = विष्णवे

**अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. 'आम् अहम् अद्यैव पात्राणां चयनं .................. + .................. करोमि' इति प्रकाशः अवदत्।
2. आचार्यवर! उत्सवे केषां पद्यानां गै+अनं .................. करणीयम्।
3. लक्ष्मीधरः मम राज–भवने .................. + .................. वासयितव्यः।
4. विश्वबन्धुत्वमुद्घोषयत् पौ+अनं .................. मे भारतं भूतले भाति।
5. तुङ्गभद्राविपाशादिभिः भावितं .................. + .................. मे भारतम् अनारतं भूतले भाति।
6. रात्रौ शीघ्रं शे+अनं .................. करणीयं प्रातश्च शीघ्रं जागरणीयम्।
7. पावकः .................. + .................. सर्वं दहति।
8. नौकायां केचन नौ + इकाः .................. वृद्धाः आसन्।
9. सः स्वभावेन बहु भौ+उकः .................. अस्ति।
10. तत्र मुम्बईनगरे अनेके चलचित्र–नायकाः .................. + .................. वसन्ति।
11. मन्दं मन्दं पो+अनः .................. वाति।
12. गीतस्य श्रवणं .................. + .................. करोतु।
13. लता मङ्गेशकरः एका प्रसिद्धा गै+इका .................. आसीत्।
14. रेलयाने अधस्तनी शायिका .................. + .................. मया आरक्षिता।
15. रक्षाबन्धनम् एकं पौ+अनं .................. पर्व अस्ति।
16. तस्याः नयने .................. + .................. सुन्दरे स्तः।
17. अस्य श्लोकस्य गै+अकः .................. कः अस्ति?
18. भो+इष्यं .................. कः जानाति?
19. गङ्गा पवित्रा .................. + .................. नदी अस्ति।
20. मुने + ए .................. नमः।

## मिश्रितप्रश्नाः

**क. अधोलिखितेषु रेखाङ्कितानां सन्धियुक्तपदानां सन्धिच्छेदं कुरुत–**

1. न यस्यादिः न यस्यान्तः, य मध्ये तस्य तिष्ठति। ..................................................

तवाप्यस्ति, ममाप्यस्ति, यदि जानासि, तद् वद। ..........

2. पीतं ह्यनेनापि पयः शिशुत्वे, कालेन भूयः परिमृष्टमुर्व्याम्। ..........
क्रमेण भूत्वा च युवा वपुष्मान् क्रमेण तेनैव जरामुपेतः। ..........

3. परोपदेशे पाण्डित्यं सर्वेषां सूकरं नृणाम्। ..........

4. सुखं हि दुःखान्यनुभूय शोभते। ..........

**ख. अधोलिखितेषु यत्र संयोगेन युक्तानि पदानि सन्ति, तत्समक्षं कोष्ठके ( ✔ ) इति चिह्नम् अङ्कितं कुरुत अन्यथा ( ✘ ) इति चिह्नं स्थापयत।**

| | | | | | |
|---|---|---|---|---|---|
| 1. | एकेनापि | ( ✘ ) | 2. | तर्तुमेव | ( ✔ ) |
| 3. | भास्करेणैव | ( ✘ ) | 4. | सकलमवधीत् | ( ✔ ) |
| 5. | सर्वेषामपि | ( ) | 6. | तथोच्चैः | ( ) |
| 7. | नैवास्ति | ( ) | 8. | विपरीतमेतत् | ( ) |
| 9. | योगिनामपि | ( ) | 10. | लिम्पतीव | ( ) |

**ग. शुद्धं सन्धिपदं ( ✔ ) इति चिह्नेन अङ्कयत–**

1. पितृ + इच्छा = पित्रेच्छा / पित्रिच्छा।
2. महा + ऋषिः = महर्षिः / महार्षिः
3. देव + इन्द्रः = देविन्द्रः / देवेन्द्रः
4. पर + उपकारः = परोपकारः / परूपकारः।
5. कवि + ईश्वरः = कवेश्वरः / कवीश्वरः।
6. अपि + एवम् = अप्येवम् / अप्यैवम्।
7. मधु + अत्र = मधूत्र / मध्वत्र।

**घ. अधोलिखितेषु सन्धियुक्तपदानि रेखाङ्कितानि कुरुत–**

1. अहन्यहनि भूतानि गच्छन्तीह यमालयम्।
शेषाः स्थावरमिच्छन्ति किमाश्चर्यमतः परम्।।

2. न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते।

3. सदाभिमानैकधना हि मानिनः।

4. नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता।

## अस्माभिः अधीतम्

| पूर्ववर्णः | परवर्णः | विकारः | उदाहरणम् | | सन्धिनाम |
|---|---|---|---|---|---|
| | | | सन्धिच्छेदः | सन्धिः | |
| अ/आ<br>इ/ई<br>उ/ऊ<br>ऋ/ॠ | अ/आ<br>इ/ई<br>उ/ऊ<br>ऋ/ॠ | द्वयोः स्थाने आ<br>द्वयोः स्थाने ई<br>द्वयोः स्थाने ऊ<br>द्वयोः स्थाने ॠ | जल+आगमः<br>कवि+इन्द्रः<br>भानु+उदयः<br>मातृ+ऋणम् | जलागमः<br>कवीन्द्रः<br>भानूदयः<br>मातॄणम् | दीर्घः |
| अ/आ<br>अ/आ<br>अ/आ | इ/ई<br>उ/ऊ<br>ऋ/ॠ | द्वयोः स्थाने ए<br>द्वयोः स्थाने ओ<br>द्वयोः स्थाने अर् | गज+इन्द्रः<br>चन्द्र+उदयः<br>महा+ऋषिः | गजेन्द्रः<br>चन्द्रोदयः<br>महर्षिः | गुणः |
| अ/आ<br>अ/आ<br>अ/आ<br>अ/आ | ए<br>ऐ<br>ओ<br>औ | द्वयोः स्थाने ऐ<br>द्वयोः स्थाने ऐ<br>द्वयोः स्थाने औ<br>द्वयोः स्थाने औ | जन+एकता<br>महा+ऐश्वर्यम्<br>तव+ओदनम्<br>महा+औदार्यम् | जनैकता<br>महैश्वर्यम्<br>तवौदनम्<br>महौदार्यम् | वृद्धिः |
| इ/ई<br>उ/ऊ<br>ऋ/ॠ<br>लृ | भिन्नस्वरः | 'इ/ई' स्थाने य्<br>उ/ऊ स्थाने व्<br>ऋ/ॠ स्थाने र्<br>लृ स्थाने ल् | यदि+अपि<br>लघु+इदम्<br>मातृ+आदेशः<br>लृ+आकारः | यद्यपि<br>लघ्विदम्<br>मात्रादेशः<br>लाकारः | यण् |
| ए<br>ओ<br>ऐ<br>औ | स्वरः | 'ए' स्थाने अय्<br>'ओ' स्थाने अव्<br>'ऐ' स्थाने आय्<br>'औ' स्थाने आव् | चे+अनम्<br>पो+अनः<br>गै+अकः<br>उभौ+अत्र | चयनम्<br>पवनः<br>गायकः<br>उभावत्र | अयादिः |

✸ ✸ ✸ ✸ ✸

## ( ख ) व्यञ्जन-सन्धिः

- म् स्थाने अनुस्वारः
- च् 'पूर्वात्' 'त्' स्थाने 'च्'
- 'र्' पूर्वस्य रेफस्य लोप : दीर्घस्वरत्वञ्च
- वर्गीयप्रथमाक्षराणां तृतीये परिवर्तनम्
- णत्वविधानम्
- ल् पूर्वात् 'त्' स्थाने 'ल्'

### अनुस्वार सन्धिः

**म् स्थाने अनुस्वारः – म् = ं**

**अधोलिखितं वाक्यद्वयं पठत–**

1. सौरभः वाटिकां प्रति अगच्छत् ।
2. सौरभः वाटिकामगच्छत्।

किं प्रथमे वाक्ये सन्धिपदमस्ति? आम् /न ..............................................

किं द्वितीये वाक्ये सन्धिपदमस्ति ? आम् /न ..............................................

पश्यत–

| वाटिकाम् + प्रति = वाटिकां प्रति |
|---|

अत्र सन्धिः वर्तते न वा इति पश्यामः।

वाटिकाम् इति पदे कः पदान्तः वर्णः ? ..............................................

'प्रति' इति पदे कः प्रथमवर्णः? ..............................................

पूर्वपदस्य 'म्' स्थाने किं परिवर्तनं जातम्? – अनुस्वारः। इदं परिवर्तनं 'विकार' इति मन्यते ।

अयं विकारः एव सन्धिद्योतकः अस्ति।

इदानीं द्वितीयं वाक्यं पश्यामः–

| वाटिकाम् + अगच्छत् = वाटिकामगच्छत् |
|---|

अत्र वाटिकाम् इति पदे कः पदान्तः वर्णः? ..............................................

'अगच्छत्' इति पदे कः प्रथमवर्णः? ..............................................

किमत्र 'म्' स्थाने परिवर्तनमस्ति न वा? ..............................................

**केवलं म् + अ 'म' सञ्जातः। भवद्भिः पठितमेव यत् व्यञ्जनानां स्वरैः सह मेलनं 'संयोग' इति उच्यते। अतः अत्र सन्धिः नास्ति। तर्हि सन्धिः कुत्र भवति ? शुद्धमुत्तरं चिह्नितं कुरुत–**

1. यदा पूर्वपदस्य अन्ते स्वरः भवति ।
2. यदा पूर्वपदस्य अन्ते व्यञ्जनं भवति ।

3. यदा पूर्वपदस्य अन्ते विसर्गः भवति।

4. यदा पूर्वपदस्य अन्तिमवर्णः उत्तरपदस्य प्रथमवर्णेन सह मिलति ।

5. यदा पूर्वपदान्तवर्णस्य उत्तरपदस्य प्रथमवर्णेन सह मेलनेन विकारः भवति।

**स्मरत –** **पूर्वपदस्य अन्ते यदि व्यञ्जनम्, ततः परं स्वरो वा व्यञ्जनं वा भवति, तयोः मेलनेन यः विकारः भवति सः व्यञ्जनसन्धिः।**

अतः 'म्' व्यञ्जनं कदा अनुस्वारे परिवर्तते?

स्वरात् पूर्वम् अथवा व्यञ्जनात् पूर्वम्

**नूनं व्यञ्जनात्पूर्वमेव** – अर्थात् ''म्'' इति वर्णात् परं यदि कश्चित् व्यञ्जनवर्णः आगच्छति तर्हि ''म्'' स्थाने अनुस्वारः (ं) भवति।

## अभ्यासः

### क. अधोलिखितेषु पद्येषु सन्धियुक्तपदानि रेखाङ्कितानि कुरुत–

1. परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
   वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्।।
2. सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
   एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः।।
3. आदानं हि विसर्गाय सतां वारिमुचामिव ।

### ख. अधोलिखिते अनुच्छेदे अपेक्षितं सन्धिं कृत्वा पुनः लिखत–

एकदा सिंहदम्पती भोजनम् न प्राप्तवन्तौ। तौ एकम् शृगालशिशुम् अपश्यताम्। सिंहः तम् मारयितुम् ऐच्छत्, परन्तु सिंही अवदत् मा मैवम्। एतम् न मारय। अयम् मम तृतीयः पुत्रः भविष्यति ।

### ग. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–

1. अस्ति <u>उज्जयिन्यां माधवः</u> .............................. + .............................. नाम विप्रः।
2. <u>गौरवम् + प्राप्यते</u> .............................. दानात्।
3. अन्नदातः! <u>सेवकं परित्यज्य</u> .............................. + .............................. कुत्र प्रस्थितो भवान्?
4. अत्र तु <u>दैवम् + कारणमिति</u> .............................. न उचितम्।
5. <u>किं पतिव्रतया</u> .............................. + .............................. तया इह त्वं प्रेषितः।
6. अणिम्नः <u>स्थूलम् +जगद्</u> .............................. उद्भवति ।
7. घर्मव्यथां वहति शीतभवां <u>रुजं च</u> .............................. + .............................. ।

8. अष्टावक्रः राजसभाम् + गतः .......................... ।

9. तत्र पक्षिणः स्वयं समायान्ति .......................... + ..........................।

10. जलबिन्दवः मधुरम् + सङ्गीतं .......................... जनयन्ति।

11. भारतं वर्तते .......................... + .......................... मे परं सम्बलम् ।

12. सः फलम् + खादितुम् .......................... इच्छति ।

13. गृह्यतां भगवन् .......................... + .......................... देशं धर्मं च रक्षितुम् ।

14. किं काव्यरचनां जानासि .......................... + .......................... ?

**णत्वविधानम्** (ऋ/ॠ/र्/ष् → न् = ण्)

**अधोलिखितवाक्यद्वयं पठत–**

1. देशरक्षा नराणां प्रथमं कर्त्तव्यम्।
2. वाटिकायां लतानां शोभा दर्शनीया।

**उपर्युक्तवाक्ययोः रेखाङ्कितपदयोः का विभक्तिः किं च वचनम् ?**

नराणाम् विभक्तिः .......................... वचनम् ..........................

लतानाम् विभक्तिः .......................... वचनम् ..........................

वयं पश्यामः यत् उभयोः एव पदयोः षष्ठी विभक्तिः बहुवचनं च वर्तते ।

तर्हि तत्र को भेदः?

**नराणाम्** इति पदे 'णाम्' युक्तम्, **लतानाम्** पदे 'नाम्' इति युक्तम्।

किमर्थम् अयं भेदः?

पदविश्लेषणं कृत्वा पश्यामः

नराणाम् = न् + अ + र् + आ + ण् + आ + म्।

लतानाम् = ल् + अ + त् +आ + न् + आ + म्।

कस्मिन् पदे 'नाम्' इति प्रत्ययात् पूर्वं 'र्' वर्णः विद्यते? 'नराणाम्' मध्ये अथवा 'लतानाम्' मध्ये? नूनं 'नराणाम्' मध्ये।

अतः वयम् पश्यामः यत् 'र्' वर्णात् परं यदि 'न्' वर्णः समानपदे वर्तते तर्हि तस्य स्थाने 'ण्' भवति। एवमेव ऋ/ॠ/ष् वर्णेभ्यः परः अपि 'न्' वर्णः 'ण्' वर्णे परिवर्तते।

## अभ्यासः

**क.** अधोलिखितेषु पदेषु ऋ/र्/ष् इति मध्ये केन कारणेन न् स्थाने ण् जातः इति कोष्ठके लिखित–

| | | | | | |
|---|---|---|---|---|---|
| यथा | भातॄणाम् | ( ॠ ) | | वृषेण | ( ष् ) |
| 1. | पुरुषेण | ( ) | 9. | शूर्पणखा | ( ) |
| 2. | भीषणः | ( ) | 10. | कर्णः | ( ) |
| 3. | वर्णनम् | ( ) | 11. | पोषणम् | ( ) |
| 4. | किरणाः | ( ) | 12. | परिणामः | ( ) |
| 5. | स्वसॄणाम् | ( ) | 13. | वारिणि | ( ) |
| 6. | आकर्षणम् | ( ) | 14. | अरिणा | ( ) |
| 7. | श्रवणम् | ( ) | 15. | कृष्णः | ( ) |
| 8. | रामेण | ( ) | 16. | ऋणम् | ( ) |

**ख.** अस्माभिः ज्ञातं यत् ऋ/ॠ/र्/ष् इति वर्णानां कारणेन 'न्' स्थाने 'ण्' भवति, परन्तु इदानीम् अधोलिखितपदानि पठत–

रामान्, वृषान्, पितॄन्, हरीन्, त्रीन्, ऋषीन्

अत्र 'न्' वर्णात् पूर्वं ऋ/र्/ष् मध्ये एकः वर्णः वर्तते तथापि न् स्थाने ण् कथं न जातः?

एषु पदेषु 'न्' वर्णः पदस्य कस्मिन् स्थाने प्रयुक्तः? आदौ / मध्ये / अन्ते वा

| | | | |
|---|---|---|---|
| यथा | रामान् | = र् + आ + म् + आ + न् | (अन्ते) |
| | पितॄन् | = ....... + ..... + ..... + ..... + ..... | ( ) |
| | त्रीन् | = त् + ..... + ..... + ..... | ( ) |
| | वृषान् | = व् + ऋ + ..... + ..... + ..... | ( ) |
| | हरीन् | = ह् + अ + र् + ..... + ..... | ( ) |
| | ऋषीन् | = ऋ + ..... + ई + न् | ( ) |

वयम् पश्यामः यत् अत्र 'न्' वर्णः सर्वत्र पदान्ते एव प्रयुक्तः। अतः

**ध्यातव्यं यत् – पदान्ते 'न्' स्थाने 'ण्' न भवति।**

**रिक्तस्थानानां पूर्तिः न्/ण् इति वर्णेन कुरुत–**

| | | | |
|---|---|---|---|
| यथा | परि णा मः | | गाय न म् |
| 1. | भाष.........म् । | 6. | सन्तोषे......... |
| 2. | रामचन्द्रे.........। | 7. | विश्वस.........ीयम्। |
| 3. | पितॄ.........। | 8. | समुद्रे.........। |
| 4. | कारका.........म्। | 9. | गृहा.........। |
| 5. | महारा.........ा । | 10. | द्रव्या.........ाम्। |

ग. यत्र ऋ, ॠ, र्, ष् तु वर्तन्ते परन्तु पदान्तकारणात् 'न्' स्थाने 'ण्' न जातः तत् कोष्ठके (✔) इति चिह्नेन अङ्कयत।

| | | | | | |
|---|---|---|---|---|---|
| यथा | देवान् | (✘) | | दातॄन् | (✔) |
| 1. | हरीन् | ( ) | 6. | स्पृशन् | ( ) |
| 2. | गच्छन् | ( ) | 7. | आरोहन् | ( ) |
| 3. | रक्षन् | ( ) | 8. | आरूढान् | ( ) |
| 4. | साधून् | ( ) | 9. | पालयन् | ( ) |
| 5. | विषयान् | ( ) | 10. | महर्षीन् | ( ) |

घ. व्यवधानम् → सह्यव्यवधानम् / असह्यव्यवधानम्

ऋ/र्/ष् + स. व्य. = न् → ण्
ऋ/र्/ष् + अ. व्य. = न् → न्

अधोलिखितस्तम्भयोः पदेषु कः भेदः?

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| रचना | रामायणम् |
| रत्नेन | रूप्यकाणि |
| प्रवासेन | रोगेण |
| प्रपञ्चेन | क्रमेण |
| रटन्तम् | प्रयाणम् |

अधुना अधोलिखितप्रश्नानाम् उत्तराणि लिखत-

| | |
|---|---|
| किं 'क' स्तम्भस्य पदेषु र् वर्णः अस्ति? | आम्/न |
| किं 'क' स्तम्भस्य पदेषु 'न्' वर्णः अस्ति? | आम्/न |
| किं 'क' स्तम्भस्य पदेषु 'न्' स्थाने ण् जातः? | आम् /न |
| किं 'ख' स्तम्भस्य पदेषु 'र्' वर्णः अस्ति ? | आम्/न |
| किं 'ख' स्तम्भस्य पदेषु 'न्' वर्णः अस्ति ? | आम् /न |
| किं 'ख' स्तम्भस्य पदेषु न् स्थाने 'ण्' जातः ? | आम्/न |

वयं पश्यामः यत् 'क' स्तम्भस्य पदेषु न् स्थाने ण् न जातः यद्यपि तत्र 'र्' वर्णः अस्ति परन्तु 'ख' स्तम्भस्य सर्वेषु पदेषु न् स्थाने 'ण्' जातः। किं तत्र कारणम्? सम्भवतः केचन वर्णाः एतादृशाः भवन्ति येषां कारणेन न् वर्णः ण् इति वर्णे न परिवर्तते।

**परीक्ष्य पश्यामः।**

व्यवधानम् ऋ/ॠ/र्/ष् वर्णेभ्यः परं 'न्' वर्णात् पूर्वं ये वर्णाः सन्ति ते व्यवधानानि कथ्यन्ते। व्यवधानं द्विधा-सह्यं च असह्यं च। यत्र सह्यव्यवधानं वर्तते तत्र न् - ण् भवति। यत्र च असह्यव्यवधानं वर्तते तत्र न् - न् एव

वर्तते, न च किमपि परिवर्तनं भवति।

**'क' स्तम्भस्य पदेषु व्यवधानम्**

**अधोलिखितपदेषु र् तथा न् मध्ये आगतान् वर्णान् कोष्ठकगतान् कुरुत।**

| | पदम् | व्यवधानम् |
|---|---|---|
| यथा | रचना | र् + (अ + च् + अ) + न् + आ |
| | रत्नेन | र् + ...... + ..... + ..... + ..... + ..... |
| | प्रवासेन | ........................................................ |
| | प्रपञ्चेन | ........................................................ |
| | रटन्तम् | ........................................................ |

**'ख' स्तम्भस्य पदेषु व्यवधानम्**

**र् तथा न् मध्ये आगतान् वर्णान् कोष्ठकगतान् कुरुत।**

| | | |
|---|---|---|
| यथा | रामायणम् | र् + (आ + म् + आ + य् + अ) + न् + अ + म् |
| | रूप्यकाणि | ........................................................ |
| | रोगेण | ........................................................ |
| | क्रमेण | ........................................................ |
| | प्रयाणम् | ........................................................ |

**किम् अधोलिखितवर्णाः 'क' स्तम्भस्य पदेषु र् – न् मध्ये सन्ति?**

| | पदानि | स्वराः | ल् | श् | ष् | स् | चवर्गीयाः | टवर्गीयाः | तवर्गीयाः |
|---|---|---|---|---|---|---|---|---|---|
| यथा | रचना | ✓ | ✗ | ✗ | ✗ | ✗ | ✓ | ✗ | ✗ |
| | रत्नेन | | | | | | | | |
| | प्रवासेन | | | | | | | | |
| | प्रपञ्चेन | | | | | | | | |
| | रटन्तम् | | | | | | | | |
| 'ख' स्तम्भस्य | पदानि | | | | | | | | |
| | रामायणम् | | | | | | | | |
| | रूप्यकाणि | | | | | | | | |
| | रोगेण | | | | | | | | |
| | प्रयाणम् | | | | | | | | |

अनया तालिकया वयं पश्यामः यत् अधोलिखिताः वर्णाः न् → ण् परिवर्तने बाधकाः।

| असह्यव्यवधानम् | | सह्यव्यवधानम् | |
|---|---|---|---|
| स्वराः | न कोऽपि | स्वराः | सर्वे एव |
| अन्तःस्थीयाः | ल् | अन्तःस्था | य् व् र् |
| ऊष्माणः | श् स् | कवर्गीयाः | क् ख् ग् घ् ङ् |
| चवर्गीयाः | च् छ् ज् झ् ञ् | पवर्गीयाः | प् फ् ब् भ् म् |
| टवर्गीयाः | ट् ठ् ड् ढ् ण् | ऊष्माणः | ष् ह् |
| तवर्गीयाः | त् थ् द् ध् न् | | |

## ङ. अधोलिखितपदेषु बाधकवर्णान् कोष्ठके लिखत।

| | पदम् | बाधकः वर्णः | |
|---|---|---|---|
| यथा | प्रधानम् | ध् | (तवर्गीयः) |
| 1. | ईदृशेन | .......... | (        ) |
| 2. | रक्तेन | .......... | (        ) |
| 3. | प्रलापेन | .......... | (        ) |
| 4. | मारीचेन | .......... | (        ) |
| 5. | दर्शनानि | .......... | (        ) |
| 6. | परिवर्तनम् | .......... | (        ) |
| 7. | मूर्तीनाम् | .......... | (        ) |
| 8. | गृहस्थेन | .......... | (        ) |
| 9. | प्रतिमानाम् | .......... | (        ) |

**र् पूर्वस्य रेफस्य लोपः दीर्घस्वरत्वञ्च**

**ह्रस्वस्वरः → र् + र् = पूर्वरकारस्य लोपः दीर्घस्वरत्वञ्च**

अधोलिखितसन्धिच्छेदं पश्यत

यथा– निर् + रोगः = नि + रोगः

= नीरोगः

ह्रस्वस्वरात् परं यदि र् वर्णः भवति पुनः र् वर्णस्य पश्चात् र् वर्णः एव भवति तर्हि पूर्वतनस्य 'र्' वर्णस्य लोपः भवति। तस्मात् पूर्ववर्तिनः ह्रस्वस्वरस्य च दीर्घत्वं भवति।

• **अधोलिखितानि पदानि सन्धिं कृत्वा लिखत–**

| | | | | | |
|---|---|---|---|---|---|
| यथा | अन्तर् | + | राष्ट्रिय: | = | अन्ताराष्ट्रिय: |
| 1. | निर् | + | रव: | = | ...................................... |
| 2. | गुरुर् | + | रक्षक: | = | ...................................... |
| 3. | अन्तर् | + | राज्यम् | = | ...................................... |
| 4. | निर् | + | रस: | = | ...................................... |
| 5. | निर् | + | रज: | = | ...................................... |

## जश्त्व सन्धिः

**(वर्गीयप्रथमाक्षराणां तृतीयाक्षरे परिवर्तनम्)**

**भवद्भिः वर्णानां पञ्चवर्गाः पठिताः, के च ते? तान् लिखन्तु–**

1. कवर्गः  2. ......................  3. टवर्ग  4. ......................  5. ......................

एतेषां वर्गाणां के प्रथमाः वर्णाः?

1. ......................  2. च्  3. ......................  4. ......................  5. प्

एतेषां वर्गाणां तृतीयवर्णान् लिखत।

1. ग्  2. ......................  3. ......................  4. ......................  5. ......................

यदा पूर्वपदस्य अन्तिमः वर्णः क्, च्, ट्, त्, प् एतेषु कश्चन वर्णः भवति तथा च अग्रिमपदस्य प्रथमः वर्णः कश्चन स्वरः अथवा वर्गस्य तृतीयः (ग् ज् ड् द् ब्) चतुर्थः वर्णः (घ् झ् ढ् ध् भ्) अथवा य्, र्, ल्, व्, ह् एतेषु कश्चन वर्णः भवति तदा पूर्वपदस्य अन्तिमवर्णस्य स्थाने अर्थात् क् च् ट् त् प् इत्यत्र तस्यैव वर्णस्य तृतीयः वर्णः ग्, ज्, ड्, द्, ब् क्रमशः भवन्ति।

यथा– क् च् ट् त् प् + स्वराः/तृतीयःवर्णः/चतुर्थःवर्णः/ य् र् ल् व् ह्

↓ ↓ ↓ ↓ ↓

ग् ज् ड् द् ब्

## अभ्यासः

**क. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ...................... + ......................।
2. अनन्तरं यावत् + उपसृत्य ...................... अपत्यं पश्यति तावद् बालकः सुस्थः तिष्ठति ।
3. काष्ठादग्निः ...................... + ...................... जायते मथ्यमानात्।

4. कुतः <u>तावत् + विजयः</u> ........................।

5. अस्ति <u>कश्चित् एवम्भूतो</u> .................. + .................. विद्वान् यो मम पुत्रान् नीतिशास्त्राभिज्ञान् कर्तुं समर्थः।

6. प्रतीक्षस्व क्षणं, <u>यावत् + भर्तुः</u> परिचर्यां समापये।

7. अणिम्नः स्थूलं <u>जगद् उद्भवति</u> ........................ + ........................।

8. इच्छामि भवद्भ्यः <u>किञ्चित् + दातुम्</u> ........................।

9. एतत् प्रजायाः <u>सकाशाद् आगतम्</u> ........................ + ........................।

10. राजकोषात् धनं गृहीत्वा <u>क्वचित् +अन्यत्र</u> ........................ प्रस्थानं कुरु ।

11. <u>तदनु</u> ........................ + ........................ द्वितीया विद्या शिल्पस्थानम् इति विख्याता।

12. शोषितो नात्र <u>कश्चित् + भवेत्</u> ........................ केनचित्।

13. जननी जन्मभूमिश्च <u>स्वर्गादपि</u> गरीयसी ........................ + ........................।

14. भारतं पुरा <u>जगत् + गुरुः</u> ........................ मन्यते स्म ।

15. रामः <u>अजन्तः</u> ........................ + ........................ इति शब्दः अस्ति ।

16. प्रातः <u>षट्+वादने</u> सः योगासनं करोति।

17. ह्यः तस्याः <u>वाग्दानम्</u> ........................ + ........................ इति संस्कारः जातः।

18. <u>अप् +जः</u> कमलस्य अपरं नाम भवति।

19. मम गुरुः <u>षडाचार्यः</u> ........................ + ........................ अस्ति।

20. सरस्वती <u>वाक् + देवता</u> ........................ अस्ति।

## 'त्' स्थाने 'ज्'

- **त् वर्णात् परं यदि ज् वर्णः आगच्छति तर्हि त् वर्णस्य स्थाने ज् वर्णः भवति।**

| यथा– | | | | | |
|---|---|---|---|---|---|
| | सत् | + | जनः | = | सज्जनः |
| | उत् | + | ज्वलः | = | उज्ज्वलः |
| | जगत् | + | जननी | = | जगज्जननी |
| | विद्वत् | + | जनः | = | विद्वज्जनः |
| | एतत् | + | जगत् | = | एतज्जगत् |
| | तत् | + | जालम् | = | तज्जालम् |
| | जगत् | + | जालम् | = | जगज्जालम् |
| | एतत् | + | जीवनम् | = | एतज्जीवनम् |
| | महत् | + | जाड्यम् | = | महज्जाड्यम् |
| | प्रवहत् | + | जलम् | = | प्रवहज्जलम् |

## अभ्यासः

- **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. <u>मत्+जीवनं</u> .............................. संस्कृताय अस्ति।
2. <u>प्रवहत् + जलं</u> .............................. प्रायः शुद्धं भवति ।
3. अहं भवतः <u>उज्ज्वलं</u> .............................. + .............................. भविष्यं कामये ।
4. <u>सत् + जनाः</u> .............................. परोपकारिणः भवन्ति।
5. <u>जगज्जननी</u> .............................. + .............................. मां रक्षतु।
6. <u>यावत् + जीवेत्</u> .............................. तावत् सुखं जीवेत्।
7. सः <u>विपत् + जाले</u> .............................. निमग्नः अस्ति।
8. <u>यावज्जीवति</u> .............................. + .............................. तावत् परोपकारं कुरु ।
9. यज्जुहोति .............................. + .............................. तदैव प्राप्नोति।
10. तस्य <u>महत् + ज्ञानं</u> .............................. वर्तते ।

**त् → च् ( चवर्गात् पूर्वम् )**

**त् वर्णात् परं यदि च् वर्णः आगच्छति तर्हि त् वर्णस्य स्थाने च् वर्णः भवति।**

**यथा- सत् + चित् = सच् + चित् = सच्चित्**

- **अधोलिखितसन्धिपदेषु 'त्' वर्णः कस्मिन् वर्णे परिवर्तितः।**

| | | |
|---|---|---|
| सत् + चित् | = सच्चित् | (त् – च्) |
| तत् + चित्रम् | = तच्चित्रम् | (त् – ....................) |
| एतत् + चन्द्रम् | = एतच्चन्द्रम् | (त् – ....................) |

**एवमेव सन्धिं कुरुत–**

| | | |
|---|---|---|
| अन्यत् + च | = .............................. | (                    ) |
| तत् + चिन्तयित्वा | = .............................. | (                    ) |
| एतत् + च | = .............................. | (                    ) |
| तत् + चक्राम | = .............................. | (                    ) |
| शरत् + चन्द्रः | = .............................. | (                    ) |
| सत् + चरित्रम् | = .............................. | (                    ) |

## अभ्यासः

- अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–

1. अयि सुलभे! पश्य एतत् + चित्रम् ..............................।
2. एतच्चिन्तयित्वा .............................. + .............................. राजा पण्डितसभां कारितवान् ।
3. तत् + चिन्तनं .............................. तस्य अस्ति न तु मम।
4. तच्चक्रं .............................. + .............................. पश्य।
5. एतत् + चन्द्रः .............................. अतीव शोभते ।
6. श्लोकस्य उच्चारणं .............................. + .............................. पुनः कुरु ।
7. मानवः सत् + चरित्रः .............................. भवेत् ।
8. गुरुः सत् + चिदानन्दस्वरूपः .............................. भवति ।
9. शरच्चन्द्रः .............................. + .............................. एकः विख्यातः उपन्यासकारः आसीत् ।
10. अन्यत् + च तत्र सर्वं कुशलम्?

**त् → ल् ( ल् पूर्वात् )**

**त् वर्णात् परं यदि ल् वर्णः आगच्छति तर्हि त् वर्णस्य स्थाने ल् वर्णः भवति।**

उत् + लेखः = उल्लेखः।

तत् + लयः = तल्लयः

उत् + लसितः = उल्लसितः

एवमेव अधोलिखितपदेषु सन्धिं कुरुत–

1. उत् + लिखितम् = ..............................
2. उत् + लासः = ..............................
3. उत् + लङ्घनम् = ..............................
4. तत् + लाङ्गूलम् = ..............................
5. तत् + लीनम् = ..............................

## अभ्यासः

- अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–

1. मुनिः स्वपूजाकर्मणि तत् + लीनः .............................. आसीत्।

2. केनापि नियमानाम् <u>उल्लङ्घनं</u> .............................. + .............................. नैव करणीयम् ।

3. अस्य <u>उत् + लेख:</u> .............................. गीतायामपि अस्ति।

4. पर्वणि जनानां महान् <u>उल्लास:</u> .............................. + .............................. भवति ।

5. परीक्षापरिणामं दृष्ट्वा पितरौ <u>उत् + लसितौ</u> .............................. जातौ।

6. वानरस्य <u>तल्लाङ्गूलम्</u> .............................. + .............................. अस्ति।

7. श्रीमत् + लाति = ..............................

8. जगल्लज्जते = .............................. + ..............................

9. भवगत् + लीन: = ..............................

10. पत् + लव: = ..............................

11. विद्युत् + लता = ..............................

12. तल्लय: = .............................. + ..............................

## मिश्रितप्रश्ना:

1. **अधोलिखितकथां स्थूलपदेषु सन्धिं कृत्वा पुन: लिखत–**

अथ एकदा गुरुकुले सायङ्काले कृष्ण: **यज्ञ अर्थम् काष्ठानि आनेतुम् वनम् गतवान्। सहसा एव** वृष्टि: आगता। मेघा: गर्जनं कृतवन्त:। **विद्युत् अपि अदीव्यत्। सर्वत्र अन्धकार:** जात:। सर्वां रात्रिं स **तत्र एव वृक्षस्य अध:** अतिष्ठत्। प्रात: काले तस्य गुरु: **महा ऋषि:** सन्दीपनि: तम् अन्विष्यन् तत्र आगत:। **गुरुम् दृष्ट्वा** कृष्ण: **उत् लसित:** जात:। गुरु: अपि हृदये पुन: **पुन: रमते।**

2. **अधोलिखितेषु पदेषु वर्तनीसंशोधनं कुरुत–**

**महर्षिना, पराजिताणाम्, प्रपर्न:, वृक्षेन, पराण्।**

3. **अधोलिखितसंवादे समागतानां रेखाङ्कितपदानां सन्धिच्छेदं कुरुत–**

**गुरु:** सुधे! कथं त्वं <u>विलम्बादागता</u>। अद्य तु परीक्षादिवस:।

**सुधा** गुरुवर! <u>रात्रौ अहं</u> चिरम् अपठम्। अत प्रातर्जागरणे विलम्ब: जात:।

**गुरु:** त्वं तु <u>एतज्जानासि</u> यत् परीक्षासु <u>रात्रौ अधिकं</u> न पठनीयम्। पश्य <u>वागीश:</u> <u>सत्यजिच्च</u> प्रश्नानां समाधाने <u>तल्लीना:</u> सन्ति। त्वमपि कमलया <u>साकं संस्कृतवाङ्मयस्य</u> प्रश्नानाम् उत्तराणि अथवा <u>सदाचार–वसन्तर्तु</u>–<u>कालिदासादिविषये</u> कमपि एकं <u>निबन्धं लिखत</u>।

..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

..............................................................................................................................

## अस्माभिः अधीतम्

| पूर्ववर्णः | परवर्णः | विकारः | उदाहरणम् |
|---|---|---|---|
| पदान्त म् | व्यञ्जनानि | म् → ं | रामम् + वन्दे = रामं वन्दे |
| क् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ग् | वाक् + ईशः = वागीशः<br>वाक् + दानम् = वाग्दानम् |
| च् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ज् | अच् + अन्तः = अजन्तः<br>अच् + वर्णः = अज्वर्णः |
| ट् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ड् | सम्राट् + आगतः = सम्राडागतः<br>षट् + वादने = षड्वादने |
| त् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः द् | सत् + आचारः = सदाचारः<br>सत् + गुणाः = सद्गुणाः |
| प् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ब् | अप् + जम् = अब्जम्<br>सुप् + अन्तः = सुबन्तः |
| त् | च् | त् स्थाने च् | तत् + च = तच्च |
| त् | ज् | त् स्थाने ज् | तत् + जालम् = तज्जालम् |
| त् | ल् | त् स्थाने ल् | तत् + लीनम् = तल्लीनम् |
| र् | र् | र् लोपः, पूर्वस्वरस्य दीर्घत्वम् | निर् + रोगः = नीरोगः |
| ऋ, ॠ, र्, ष्<br>पदान्त न् | **सह्यव्यवधानम्**<br>स्वराः, ह्, य्, व्, कवर्गाः, पवर्गाः | | **विकारः**<br>न् → ण्<br>न् → न् |

* * * * *

## ( ग ) विसर्ग-सन्धिः

- विसर्गस्य लोपः
- विसर्गस्य उत्वम्
- विसर्गस्य रत्वम्
- विसर्गस्य सत्वम्, शत्वम्, षत्वम् च

### विसर्गस्य लोपः

**( अ )** सः/एषः + 'अ' भिन्नवर्णः = स/एष

अधोलिखितानि उदाहरणानि पठत अवगच्छत च–

| पदम् | विसर्गात् परः वर्णः | सन्धिः |
|---|---|---|
| सः + बालकः | सः + बा | स बालकः |
| सः + आगच्छति | सः + आ | स आगच्छति |
| एषः + गच्छति | एषः + ग | एष गच्छति |

**यत्र कुत्रापि सः, एषः पदाभ्यां पश्चात् 'अ' भिन्नः कश्चिदपि वर्णः आगच्छति तर्हि विसर्गस्य लोपः भवति। विसर्गलोपात् अनन्तरम् अन्यः कश्चिदपि सन्धिः न भवति।**

अधुना अधोलिखितेषु पदेषु सन्धिं कृत्वा लिखत–

| | | | |
|---|---|---|---|
| 1. | सः इच्छति | सः + इ | स ………………………………। |
| 2. | एषः + उत्तिष्ठति | एषः + उ | ……………………………… उत्तिष्ठति। |
| 3. | एषः + ईक्षते | एषः + …………… | एष ………………………………। |
| 4. | सः + गच्छति | …………… + …………… | ………………………………। |
| 5. | एषः + विचरति | …………… + व् | ………………………………। |
| 6. | एषः + नमति | …………… + …………… | ………………………………। |

**( आ )** अ ➡ : + 'अ' भिन्नस्वराः = : ➡ लोपः

उदाहरणानुसारम् अधोलिखितपदेषु सन्धिं कृत्वा लिखत–

| | | | | | |
|---|---|---|---|---|---|
| यथा– | रामः + आगच्छति | अः + आ | = | राम | आगच्छति। |
| | कृष्णः + एति | अः + ए | = | ……………… | ……………… |
| | हरीशः + इच्छति | अः + ……… | = | ……………… | ……………… |
| | मृगः + इति | अः + ……… | = | ……………… | ……………… |

| | | | | | |
|---|---|---|---|---|---|
| सिंहः + इदानीम् | अः + ....... | = | .................... | .......................... |
| गजः + उत्सहते | अः + ....... | = | .................... | .......................... |
| बालः + उत्तिष्ठति | अः + ....... | = | .................... | .......................... |

**यत्र अवर्णात् परं विसर्गः भवति विसर्गात् परं च 'अ' भिन्नस्वराः भवन्ति तत्र विसर्गस्य लोपः भवति। विसर्गलोपात् अनन्तरम् अन्यः कश्चिदपि सन्धिः न भवति।**

(इ)

**आ ➡ : + स्वराः/ वर्गीयः तृतीयः वर्णः**
**चतुर्थः वर्णः**
**पञ्चमः वर्णः = विसर्गस्य (:) ➡ लोपः**
**य्, र्, ल्, व्, ह्**

**उदाहरणानुसारम् अधोलिखितेषु पदेषु सन्धिं कृत्वा लिखत–**

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | लताः + अ | आः | + अ | | लता | अत्र |
| | ताः + गच्छन्ति | आः | + ग | | ता | गच्छन्ति |
| 1. | बालाः + यान्ति | ............. | + | ............. | ............. | ......................... |
| 2. | वृक्षाः + वर्धन्ते | ............. | + | ............. | ............. | ......................... |
| 3. | बालाः + जाग्रति | ............. | + | ............. | ............. | ......................... |
| 4. | तरुणाः + नमन्ति | ............. | + | ............. | ............. | ......................... |
| 5. | गोपालाः + हसन्ति | ............. | + | ............. | ............. | ......................... |
| 6. | वृद्धाः + अत्र | ............. | + | ............. | ............. | ......................... |

**यत्र 'आ' वर्णात् परं विसर्गः भवति विसर्गात् परं च स्वराः, वर्गीयः तृतीयः, चतुर्थः, पञ्चमः वर्णः, य्, र्, ल्, व्, ह् च वर्णाः भवन्ति तत्र विसर्गस्य लोपः भवति।**

## अभ्यासः

• **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. अत उच्यते ............. + ............. सहसा विदधीत न क्रियाम्।
2. स्वभाव एव ............. + ............. एषः परोपकारिणाम् ।
3. सः + तं ............. व्यापाद्य खण्डशः कृतवान्।
4. स तु ............. + ............. भवति दरिद्रो यस्य तृष्णा विशाला।
5. धन्याः + वयं ............. स्मः, समयश्च धन्यः।

6. वृक्षम् आरुह्य दृश्यतां कः एष शब्दापयति .............. + .............. ?

7. विद्याहीनाः + न .............. शोभन्ते निर्गन्धा इव किंशुकाः ।

8. स मुनिः .............. + .............. तां कोपदृष्ट्या दृष्टवान्।

9. कर्मणैव हि संसिद्धिम् आस्थिताः + जनकादयः ..............।

10. हे सौम्य! स एव .............. + .............. आत्मा।

11. सः + सर्वान् .............. वेदान् सार्थान् अधीतवान्।

12. फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ..............।

13. धन्या महीरुहाः + येभ्यो .............. निराशा यान्ति नार्थिनः।

14. सर्वे विद्वांसः स्तब्धा अभवन् .............. + ..............।

15. एते पण्डिताः + मम .............. वक्रदेहं दृष्ट्वा हसन्ति।

16. भवादृशा विद्वांसः मम पण्डितपरिषदं विभूषयेयुः।

17. राजा तन्तुवायाय स्वर्णमुद्राः + अर्पयति ..............।

18. वृक्षायुर्वेदे वृक्षाणां पर्णैः क्रियमाणा विविधाः .............. + .............. क्रियाः वर्णिताः।

19. तद्धनं शङ्करः + इच्छति ..............।

20. सः + ग्रामं .............. गच्छति।

## विसर्गस्य उत्वम्

**( अ ) अधोलिखितम् उदाहरणं पठत अवगच्छत च–**

सः + अस्ति → स उ + अस्ति

स् अ उ + अस्ति → ओ → सो + अस्ति

स् ओ + अ स्ति (ऽ) → ओ → सोऽस्ति

**एवमेव अन्यानि उदाहरणानि पश्यत–**

एषः + अपि = एषोऽपि

सः + अवसत् = सोऽवसत्

एषः + अवदत् = एषोऽवदत्

**यत्र सः, एषः इत्येताभ्यां पदाभ्यां पश्चात् 'अ' वर्णः आगच्छति। तत्र सः, एषः इत्येतयोः पदयोः विसर्गस्य स्थाने 'उ' भवति। पुनः गुणसन्धेः नियमानुसारम् 'अ + उ' मिलित्वा 'ओ' भवति। पुनश्च पूर्वरूपसन्धेः नियमानुसारम् ओकार-उत्तरवर्तिनः 'अ' वर्णस्य पूर्वरूपम् ( ओ ) भवति अवग्रहः ( ऽ ) च आगच्छति।**

**अधोलिखितानि उदाहरणानि पठत**

| | | |
|---|---|---|
| सः + अस्ति | = | सोऽस्ति। |
| एषः + अपि | = | एषोऽपि। |
| सः + अवसत् | = | सोऽवसत्। |

उपरिलिखितेषु उदाहरणेषु विसर्गस्य (:) स्थाने कः विकारः जातः?

सः + अ = ....................................

एषः + अ = ....................................

**अत्र सः स्थाने 'सो' जातः ततः 'अ' कुत्र गतः? 'अ' 'ऽ' भूत्वा 'ओ' इति स्वरे मिश्रितः। एवमेव अधोलिखितेषु पदेषु सन्धिं कुरुत–**

| | | | |
|---|---|---|---|
| **यथा–** | सः + अपतत् | सः + अ | सोऽपतत् |
| 1. | एषः + अधावत् | ............. + ............. | .................................... |
| 2. | सः + अत्र | ............. + ............. | .................................... |
| 3. | एषः + अत्र | ............. + ............. | .................................... |
| 4. | सः + अपि | ............. + ............. | .................................... |
| 5. | एषः + अपि | ............. + ............. | .................................... |
| 6. | सः + अतीव | ............. + ............. | .................................... |
| 7. | एषः + अतीव | ............. + ............. | .................................... |

**(आ)**

अ ➡ : + अ = [अ : → अ उ = ओ + अ → ऽ]

अ ➡ : + [वर्गीयः तृतीयः वर्णः/ चतुर्थः वर्णः/ पञ्चमः वर्णः/ य्/र्/ल्/व्/ह्] = [अ : → अ उ → ओ]

**नियम :**

- यत्र 'अ' वर्णात् परं विसर्गः भवति विसर्गात् पश्चात् 'अ' वर्णः भवति तत्र विसर्गस्य स्थाने उत्वं भवति पुनः गुणसन्धेः नियमानुसारम् (अ + उ) मिलित्वा ओ भवति पुनश्च पूर्वरूपसन्धेः नियमानुसारम् ओकारोत्तरवर्तिनः अकारस्य पूर्वरूपम् (ओ) भूत्वा अवग्रहः (ऽ) आगच्छति।
- अपि च विसर्गात् परं यदि कस्यचिदपि वर्गस्य तृतीयः, चतुर्थः, पञ्चमः वर्णः, य्, र्, ल्, व्, ह् वर्णः भवति तर्हि विसर्गस्य स्थाने उत्वं भवति पुनः गुणसन्धिः भूत्वा 'ओ' भवति।

उदाहरणानि–

| | | | | |
|---|---|---|---|---|
| रामः | + | अस्ति | अः + अ | = रामोऽस्ति |
| कृष्णः | + | अपि | अः + अ | = कृष्णोऽपि। |
| राघवः | + | गच्छति | अः + ग | = राघवो गच्छति |

**एवमेव सन्धिं कुरुत–**

1. बालः + अस्ति = ..............................
2. नृपः + अतीव = ..............................
3. मृगः + अपि = ..............................
4. सिंहः + अत्र = ..............................
5. चन्द्रः + अयम् = ..............................
6. पुरुषः + अपि = ..............................

**इदानीम् अधोलिखितेषु सन्धिं कृत्वा लिखत–**

**यथा–**

| | | | |
|---|---|---|---|
| 1. | रामः + अयम् | अः + अ | = रामोऽयम् |
| 2. | कृष्णः + अस्ति | अः + अ | = .............................. |
| 3. | सिंहः + गर्जति | अः + ग | = .............................. |
| 4. | मयूरः + नृत्यति | अः + न | = .............................. |
| 5. | गजः + धावति | अः + .......... | = .............................. |
| 6. | तरुणः + नमति | अः + .......... | = .............................. |
| 7. | वृक्षः + वर्धते | अः + .......... | = .............................. |
| 8. | गोपालः + हसति | अः + .......... | = .............................. |
| 9. | कः + अपि | अः + .......... | = .............................. |
| 10. | वृद्धः + अत्र | अः + .......... | = .............................. |

## अभ्यासः

◆ **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. किन्तु बालस्य अत्र <u>रक्षकः + नास्ति</u> ..........................।
2. अगच्छन् <u>वैनतेयोऽपि</u> ............. + ............. पदमेकं न गच्छति।
3. नास्ति <u>शोकसमः + रिपुः</u> ..........................।
4. अत्रान्तरे <u>ब्राह्मणोऽपि</u> ............. + ............. श्राद्धं गृहीत्वा गृहम् उपावृत्तः।

5. सेवकं परित्यज्य कुत्र प्रस्थितः + भवान् .......................?

6. परिवर्तिनि संसारे मृतः को वा ............ + ............ न जायते।

7. माता शत्रुः पिता वैरी येन बालः + न ....................... पाठितः ।

8. आसीत् पुरा कोऽपि ............ + ............ महातपा नाम मुनिः।

9. ततस्ते श्रेयो भविष्यति ............ + ............।

10. सः च सर्वश्रेष्ठः + अहम् ....................... इति मन्यमानः उद्धतस्वभावः अभवत्।

11. शाखादिमान् न्यग्रोधो वटः ............ + ............ उत्पन्नः सन् तिष्ठति।

12. तस्मै वदान्यगुरवे तरवे नमः + अस्तु ....................... ।

13. महीरुहाः धन्याः येभ्यो निराशाः ............ + ............ यान्ति नार्थिनः।

14. आत्मा शरीरस्य अध्यक्षः + न ....................... भवान्।

15. क्षणो नास्ति लभ्यो यदा ............ + ............ कल्पनायाः।

16. महाराज! आनीतः + अयं ....................... कुविन्दः।

17. यत्र जलपूर्णं सरो भवति ............ + ............ तत्र पक्षिणः स्वयं समायान्ति।

18. एकदा मुनिः पिपासया पीडितः + अभवत् ....................... ।

19. व्याधिना पीडितो नो ............ + ............ भवेत्कश्चन।

20. शोषितः + नात्र ....................... कश्चिद् भवेत् ।

## मिश्रितप्रश्नाः

**सन्धिच्छेदं कुरुत–**

1. मृग इति = ....................... + .......................
2. रामोऽस्ति = ....................... + .......................
3. सोऽतीव = ....................... + .......................
4. एषोऽस्मि = ....................... + .......................
5. स आगच्छति = ....................... + .......................
6. मेघो गर्जति = ....................... + .......................
7. एष राकेशः = ....................... + .......................
8. लता वर्धन्ते = ....................... + .......................
9. वृद्धा हसन्ति = ....................... + .......................
10. बालिका नमन्ति = ....................... + .......................

## विसर्गस्य रत्वम्

अ/आ–भिन्नस्वरः ➡ : + स्वराः / वर्गीयः तृतीयः वर्णः / चतुर्थः वर्णः / पञ्चमः वर्णः / य् / र् / ल् / व् / ह् = विसर्गस्य (:) ➡ र्

**यथा–** स्थितिः + उच्चैः = स्थितिरुच्चैः

स्थितिः + उच्चैः

↓

र् + उच्चैः

अग्निः + जायते = अग्निर्जायते

अग्निः + जायते

↓

र् + जायते

**नियमः**

- **यत्र अ/आ इति वर्णौ अतिरिच्य कस्मादपि स्वरवर्णात् परं विसर्गः भवति विसर्गात् पश्चात् च कश्चिदपि स्वरः, वर्गस्य तृतीयः, चतुर्थः, पञ्चमः वर्णः, य्, र्, ल्, व्, ह् भवति तत्र विसर्गस्य रेफः (र्) भवति।**
- **अधोलिखितपदेषु सन्धिं कृत्वा लिखत।**

**इदानीम् अधोलिखितेषु सन्धिं कृत्वा लिखत–**

**यथा–** महिषीः + इति = महिषीरिति : ➡ र् + इ = रि

मुनिः + गच्छति = ..............................

तैः + भक्ष्यते = ..............................

धेनुः + धावति = ..............................

एतैः + नम्यते = ..............................

जनैः + गम्यते = ..............................

पत्युः + गृहम् = ..............................

धेनुभिः + आगतम् = ..............................

**अपवादः–** **क्वचित्, अव्ययसम्बद्धविसर्गः + स्वराः / वर्गीयतृतीयः / चतुर्थः / पञ्चमवर्णः / ह्, य्, व्, र्, ल् = विसर्गस्य स्थाने 'र्' भवति।**

**यथा–** प्रातः + गच्छति = ..............................

पुनः + उपविशति = ..............................

पुनः + आस्ते = ..............................

प्रातः + उत्तिष्ठति = ..............................

प्रातः + वन्दनीयः = ..............................

## अभ्यासः

1. काष्ठाद् अग्निः + जायते .......................... मथ्यमानात्।

2. स्थितिरुच्चैः ............. + ............. पयोदानाम्।

3. धन्योऽस्ति राणा, पुनः + अस्ति .......................... मन्त्री।

4. धन्यं पुनर्दशनम् ............. + ............. अस्ति पुण्यम्।

5. कः मम पुत्राणां पुनः + जन्म .......................... कारयितुं समर्थः?

6. एकः चन्द्रः तमो हन्ति न च तारागणैरपि ............. + .............।

7. राजा सविनयं पुनः + अवदत् ..........................।

8. ब्रह्मन्! अहं मातापित्रोर्भक्तः ............. + .............।

9. तत् आकर्ण्य स मुनिः + विस्मितः .......................... तम् अवदत्।

10. अष्टावक्रः उच्चैर्हसितुम् ............. + ............. आरभत।

11. अनुकूलः शुचिः + दक्षः .......................... कविर्विद्वान् सुदुर्लभः।

12. दिनकरदीप्तिरिव ............. + ............. भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु।

13. अस्माकं जीवनदृष्टेः + अनुरूपमेव .......................... तत् विज्ञानमपि सर्वहिताय सर्वसुखाय च आसीत्।

14. भानुजानर्मदा–वीचिभिर्लालितम् ............. + ............. ।

15. विश्वविन्द्यैः चरित्रैः + जगत्पावयत् ..........................मे भारतं भूतले भाति।

16. वनं प्रति मुनिर्गच्छति ............. + .............।

17. तत्रैव मम पत्युः + गृहम् .......................... अपि अस्ति।

18. गुरुः प्रातर्वन्दनीयः ............. + ............. भवति।

19. भास्करः प्रातः + उदेति ..........................।

20. जनैर्गम्यते ............. + ............. तत्र।

## विसर्गस्य सत्वम्, शत्वम्, षत्वम्

: + स् / त् / थ् = : ➡ स्

**यथा–** पुत्र : + सेवते
↓
स् + सेवते = पुत्रस्सेवते

इत : + ततः
↓
स् + ततः = इतस्ततः

**नियमः**

विसर्गात् (:) परं यदि स्/त्/थ् आगच्छति तर्हि विसर्गस्य स्थाने 'स्' भवति।

### अभ्यासः

◆ **अधोलिखितपदेषु सन्धिं कृत्वा लिखत।**

1. विप्रः + तथाविधं .......................... तं दृष्ट्वा नकुलं व्यापादितवान्।
2. ततस्तेन ............. + ............. नकुलेन बालसमीपम् उपसर्पन् कृष्णसर्पः दृष्टः।
3. सद्भिः + तु .......................... लीलया प्रोक्तं शिलालिखितमक्षरम्।
4. खन्यमाना भूमिस्तोयं ............. + ............. ददाति।
5. कुतः + तावत् .......................... विजयः?
6. मेवाडाधिपतिः विश्वासपात्रैः भटैस्सह ............. + ............. अरण्ये अतिष्ठत्।
7. अश्मापि देवत्वं याति महद्भिः + सुप्रतिष्ठितः ..........................।
8. स च क्रुद्धस्तां ............. + ............. व्यलोकयत्।
9. मुनिः + तां .......................... कोपदृष्ट्या दृष्टवान्।
10. यतस्सौम्य! ............. + ............. अस्मत्कुलीनः अनधीत्य न भवति।
11. कः + ते .......................... उपाध्यायात् अतिशयः प्राप्तः?
12. गायन्तु मूढमनुजास्तव ............. + ............. दोषगाथाः।
13. आम्र! यद्यपि गता दिवसाः + ते ..........................।
14. अष्टावक्रः पण्डितैस्सह ............. + ............. शास्त्रार्थं कृत्वा तान् अजयत्।
15. भवतः मनः + तु .......................... मम अधीनम्।
16. कुतस्समागमनम् ............. + ............. अत्र भवताम्?
17. तव गृहे एष पण्डितवरः + सकुटुम्बः .......................... स्थास्यति।

18. रेखागणिते यस्सिद्धान्तः ............. + ............. पाइथागोरस इति नाम्ना विख्यातः सः पूर्वमेव शुल्वसूत्रेषु निरूपितः।

19. विभुः + तरति .......................... गङ्गायाम्।

20. रामः + सेवते .......................... पितरम्।

: + श् / च् / छ् = : ➡ श्

**यथा–** योग्यः + शिष्यः → श् + शिष्यः = योग्यश्शिष्यः

कः + चित् → श् + चित् = कश्चित्

उत्तमैः + छात्रैः → उत्तमै श् + छात्रैः = उत्तमैश्छात्रैः

**नियमः**

विसर्गात् (:) परं यदि श्/च्/छ् आगच्छति तर्हि विसर्गस्य स्थाने 'श्' भवति।

## अभ्यासः

- **अधोलिखितपदेषु सन्धिं कृत्वा लिखत।**

1. अन्यः कश्चित् ............. + ............. श्राद्धार्थं वृतः भवेत्।
2. असद्भिः + शपथेन अपि जले लिखितमक्षरम्।
3. धन्या वयं स्मः समयश्च ............. + .............धन्यः।
4. ततः विष्णुशर्मा प्रेरणाप्रदाभिः + च ............. कथाभिः राजकुमारान् शिक्षितवान्।
5. ततश्च ............. + ............. सा साध्वी भिक्षामादाय मुनेः अन्तिकम् आगता।
6. धर्मव्याधः + च .......................... दृष्ट्वा एव तम् अभाषत।
7. आरुणेः पुत्रश्श्वेतकेतुः ............. + ............. आसीत्।
8. मूलं भुजङ्गैः + शिखरं .......................... प्लवङ्गैः आश्रितम्।
9. निराकारश्च ............. + ............. आत्मा कथं न दृश्यते।
10. शिल्पिनः + श्रमिकाः .......................... अपि ललितां काव्यरचनां कुर्वन्ति।

11. लक्ष्मीधरनामा कश्चित् ............ + ............ विद्वान् द्वारदेशम् अध्यास्ते।

12. तेन कः + चन ........................ आह्लादकरः शब्दः श्रुतः।

13. शोषितो नात्र कश्चिद् ............ + ............ भवेत् केनचित् ।

14. गुरुकुले पुरा शिक्षा निश्शुल्कं ............ + ............ भवति स्म ।

15. नैकैः + छात्रैः ........................ तत्र गन्तव्यम्।

16. सीता रामश्च ............ + ............ गुरुं नमतः ।

17. क्षीरसागरे हरिः + शेते ........................।

18. भक्तः + शोभते ........................ स्वकर्मभिः ।

19. सिंहशावकश्चलति ........................ तत्र ।

20. वस्त्रेण छात्रः + छादयति ........................ वृष्ट्याम्।

**: + ष् / ट् / ठ् = : ➡ ष्**

**यथा–**

चतु : + ष्टिः → चतु ष् + ष्टिः = चतुष्षष्टिः

डयमानः + टिट्टिभः → डयमानष् + टिट्टिभः = डयमानष्टिट्टिभः

रुप्यकैः + ठनठनायते → रुप्यकैष् + ठनठनायते = रुप्यकैष्ठनठनायते

**नियम :**

विसर्गात् (:) परं यदि ष्/ट्/ठ् आगच्छति तर्हि विसर्गस्य (:) स्थाने 'ष्' भवति।

## अभ्यासः

◆ **अधोलिखितपदेषु सन्धिं कृत्वा लिखत।**

1. वनं प्रति रामः + टीकते ........................।

2. डयमानष्टिट्टिभः ............ + ............ शस्यं दृष्ट्वा मोदते।

3. धावनप्रतिस्पर्धायां स गजः + षष्ठः ........................ अस्ति।

4. अर्जुनस्य धनुः + टङ्कारं ........................ श्रुत्वा एव भीष्मः अर्जुनं परिचिनोति।

5. एतां लेखनीम् अहं <u>चतुष्षष्टिः</u> .............. + .............. रूप्यकैः क्रीतवान्।

6. यदा <u>रूप्यकैः + ठनठनायते</u> ............................ तदा श्रेष्ठी प्रसीदति।

7. तेषु <u>एकः + षष्टिः</u> ............................ रूप्यकाणि कामयते।

8. <u>सतीशष्टिप्पणिं</u> .............. + .............. लिखति।

9. <u>सेवकः + टनटन्</u> ............................ इति घण्टां नादयति।

10. <u>जगदीशष्ठाकुरः</u> .............. + .............. कुत्र वसति।

## तालिकाम् आश्रित्य सन्धिं कुरुत–

**यथा–**

| | | | |
|---|---|---|---|
| 1. | बालः + तत्र | = बाल + स् + तत्र | = बालस्तत्र |
| 2. | रामः + च | = .............. + श् + .............. | = .......................................... |
| 3. | कृष्णः + तदा | = .............. + स् + .............. | = .......................................... |
| 4. | गोपालः + तथैव | = .............. + स् + .............. | = .......................................... |
| 5. | शावकः + चलति | = .............. + श् + .............. | = .......................................... |
| 6. | डयमानः + टिट्टिभः | = .............. + ष् + .............. | = .......................................... |
| 7. | धनुः + टङ्कारः | = .............. + ष् + .............. | = .......................................... |
| 8. | भक्तः + सेवते | = .............. + स् + .............. | = .......................................... |
| 9. | भक्तः + शोभते | = .............. + श् + .............. | = .......................................... |
| 10. | भक्तः + चलति | = .............. + श् + .............. | = .......................................... |

## मिश्रितप्रश्नाः

**क. अधोलिखितपद्येषु स्थूलपदानां सन्धिच्छेदं कुरुत–**

1. अर्थो हि कन्या **परकीय एव।**
2. अर्थस्य **पुरुषो दासो दासस्त्वर्थो** न कस्यचित्। **अतोऽर्थाय यतेतैव** सर्वदा यत्नमास्थितः।
3. प्राप्तव्यमर्थं लभते मनुष्यो **दैवोऽपि** न लङ्घयितुं न शक्तः।
   तस्मात् न शोचामि न **विस्मयो मे यदस्मदीयं** न हि तत्परेषाम्।
4. **आलस्यं** हि मनुष्याणां **शरीरस्थो महान्** रिपुः।

**सन्धिं कुरुत–**

1. बालः + हसति = ..................................
2. बालाः + हसन्ति = ..................................
3. मृगः + धावति = ..................................
4. मृगाः + धावन्ति = ..................................
5. सिंहः + गर्जति = ..................................
6. सिंहाः + गर्जन्ति = ..................................
7. वृक्षः + वर्धते = ..................................
8. वृक्षाः + वर्धन्ते = ..................................
9. पादपः + फलति = ..................................
10. पादपाः + फलन्ति = ..................................
11. बालकः + इच्छति = ..................................
12. बालकाः + इच्छन्ति = ..................................
13. मृगः + इति = ..................................
14. मृगाः + इति = ..................................

## सन्धिमिश्रिताभ्यासः

**रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

1. विप्रः + तथाविधं .......................... नकुलं दृष्ट्वा 'बालकः अनेन खादितः' इति विचार्य नकुलं व्यापादितवान्।
2. मेवाडाधिपतिः ............. + ............. महाराणा प्रतापः आसीत्।
3. शोकः + नाशयते .......................... सर्वम्।
4. एतच्चिन्तयित्वा ............. + ............. राजा पण्डितसभां कारितवान्।
5. एकदा महातपा तरुच्छाया + उपविष्टः .......................... आसीत्।
6. हे श्वेतकेतो! गुरुं प्रति ............. + ............. गच्छ।
7. आम्रवृक्षः छायया + एव .......................... अतितापं दलयति।
8. अहं भवद्दर्शनैः ............. + ............. आत्मानं धन्यं मन्ये।
9. कविः + विद्वान् .......................... स्वामी सुदुर्लभः।
10. मा कश्चिद् ............. + ............. दुःखभाग्भवेत् ।

## अस्माभिः अधीतम्

| विसर्गात् पूर्ववर्णः | विसर्गः | विसर्गात् परवर्णः | परिणामः | उदाहरणम् |
|---|---|---|---|---|
| यः कोऽपि वर्णः भवेत्। | : | क्/ख् | विकारः न भवति | कः कृन्तति। / शिशुः खेलति। |
| | : | प्/फ् | विकारः न भवति | बालः पठति। / तरुः फलति। |
| | : | श्/च्/छ् | विसर्गस्य स्थाने श् | हरिश्चलति / रामश्शेते। |
| | : | ष्/ट्/ठ् | विसर्गस्य स्थाने ष् | कष्टीकते / गजष्षठः। |
| | : | स्/त्/थ् | विसर्गस्य स्थाने स् | विभुस्तरति / समीरस्सुप्तः। |
| अ | : | अ | विसर्गस्य स्थाने 'ओ' | बालः + अवदत् = बालोऽवदत् |
| अ | : | अकारं विहाय सर्वे स्वराः | विसर्गलोपः | बालः + आगच्छत् = बाल आगच्छत् |
| अ | : | वर्गाणां तृतीयः/चतुर्थः/ पञ्चमः वर्णः / य् / र् / ल् / व् / ह् | विसर्गस्थाने 'ओ' | रामः + गच्छति = रामो गच्छति |
| आ | : | स्वराः/वर्गाणां तृतीयः/ चतुर्थः/पञ्चमः वर्णः / य् / र् / ल् / व् / ह् | विसर्गलोपः | छात्राः + आगताः = छात्रा आगताः |
| अ-आ स्वरौ विहाय अन्ये स्वराः | : | स्वराः/वर्गाणां तृतीयः/ चतुर्थः/पञ्चमः वर्णः / य् / र् / ल् / व् / ह् | विसर्गस्थाने 'र्' | शिशुः + हसति = शिशुर्हसति |
| स | : | ह्रस्वः अकारः | विसर्गस्थाने 'ओ' | सः + अहसत् = सोऽहसत् |
| एष | : | ह्रस्वः अकारः | विसर्गस्थाने 'ओ' | एषः + अक्रीडत् = एषोऽक्रीडत् |
| स | : | अकारं विहाय सर्वे वर्णाः | विसर्गलोपः | सः + वदति = स वदति |
| एष | : | अकारं विहाय सर्वे वर्णाः | विसर्गलोपः | एषः + आयाति = एष आयाति |

# तृतीयः अभ्यासः

# शब्दरूपाणां प्रयोगः

## (क) अजन्तशब्दाः

### अकारान्तपुँल्लिङ्गशब्दाः

**भवन्तः अधोलिखितं संवादं पठन्तु, रेखाङ्कितपदानि च ध्यानेन पश्यन्तु–**



**विवेकः:** पितामह! प्रणमामि।

**पितामहः:** प्रसन्नः भव। आगतः विद्यालयात्?

**विवेकः:** आम्।

**पितामहः:** किं दिनेशः अपि आगतः?

**विवेकः:** नहि सः तु पठितुं विद्यालये एव स्थितः।

**पितामहः:** तव द्वितीयसत्रस्य परीक्षायाः कः परिणामः?

**विवेकः:** अहं सर्वाधिकान् अङ्कान् प्राप्य उत्तीर्णः अभवम्।

**पितामहः:** साधु साधु। विद्यालये तव कीदृशी दिनचर्या प्रचलति?

**विवेकः:** अहं विद्यालयं गत्वा सर्वप्रथमं शिक्षकान् नमामि। प्रार्थनास्थले महापुरुषाणां विषये अपि किञ्चित् वदामि। कठिनविषयं च सविनयं शिक्षकं पृच्छामि। समस्तैः छात्रैः सह मम शोभनः व्यवहारः अस्ति।

**पितामहः:** शोभनम्। त्वं सर्वेषु छात्रेषु श्रेष्ठः न केवलम् अध्ययने व्यवहारे अपि।

**क. उपर्युक्तसंवादे रेखाङ्कितानां पदानां मूलशब्दान् अवलोकयन्तु।**

| यथा– पदम् | मूलशब्दः | पदम् | मूलशब्दः | पदम् | मूलशब्दः |
|---|---|---|---|---|---|
| पितामह! | पितामह | दिनेशः | दिनेश | अङ्कान् | अङ्क |

एवमेव निम्नलिखितानां पदानाम् अपि मूलशब्दान् लिखन्तु।

| पदानि | मूलशब्दाः | पदानि | मूलशब्दाः |
|---|---|---|---|
| विद्यालये | ............................ | महापुरुषाणाम् | ............................ |
| परिणामः | ............................ | छात्रैः | ............................ |
| शिक्षकान् | ............................ | व्यवहारे | ............................ |

**अत्र वयं पश्यामः यत् एतेषां शब्दानाम् अन्ते 'अ' अस्ति।**
**('अ' इति वर्णः अकारः अपि कथ्यते) अतः ईदृशाः सर्वे शब्दाः अकारान्ताः कथ्यन्ते।**

**अधुना अधोलिखितं श्लोकं ध्यानेन पठत अवगच्छत च–**

**रामो** राजमणिः सदा विजयते **रामं** रमेशं भजे।
**रामेण**ाभिहता निशाचरचमू **रामाय** तस्मै नमः।।
**रामान्**नास्ति परायणं परतरं **रामस्य** दासोऽस्म्यहम्।
**रामे** चित्तलयः सदा भवतु मे **भो राम** मामुद्धर।।

**उपर्युक्तश्लोके रेखाङ्कितानि पदानि ध्यानेन पठत अवगच्छत च यत् शब्दः तु 'राम' इत्येव परं प्रतिपदं किञ्चित् परिवर्तनं दृश्यते तस्य कारणं विभक्तिः एव अर्थात् विभक्तिरूपाणां कारणेन प्रतिपदं किञ्चित् परिवर्तनं सर्वेषु पदेषु दृश्यते।**

**अधुना श्लोकात् रेखाङ्कितानि पदानि चित्वा अधः प्रदत्तानि रिक्तस्थानानि पूरयत–**

**विभक्तिः**

प्रथमा ..........................
द्वितीया ..........................
तृतीया ..........................
चतुर्थी ..........................
पञ्चमी ..........................
षष्ठी ..........................
सप्तमी ..........................
सम्बोधनम् ..........................

**अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | देवः | देवौ | देवाः |
| द्वितीया | देवम् | देवौ | देवान् |
| तृतीया | देवेन | देवाभ्याम् | देवैः |
| चतुर्थी | देवाय | देवाभ्याम् | देवेभ्यः |
| पञ्चमी | देवात् | देवाभ्याम् | देवेभ्यः |
| षष्ठी | देवस्य | देवयोः | देवानाम् |
| सप्तमी | देवे | देवयोः | देवेषु |
| सम्बोधनम् | हे देव! | हे देवौ! | हे देवाः! |

ख. अधोलिखितपट्टिकासु चतुर्विंशतिः अकारान्तपुँल्लिङ्गशब्दाः क्रमेण लिखिताः। उपरि लिखितानि अकारान्तपुँल्लिङ्गशब्दस्य रूपाणि पठित्वा तेनैव क्रमेण यथानिर्दिष्टं रिक्तस्थानानि पूरयत–

यथा

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | 1. रामः | 2. अमरौ | 3. सुराः |
| द्वितीया | 4. .................... | 5. .................... | 6. .................... |
| तृतीया | 7. .................... | 8. .................... | 9. .................... |
| चतुर्थी | 10. .................... | 11. .................... | 12. .................... |
| पञ्चमी | 13. .................... | 14. .................... | 15. .................... |
| षष्ठी | 16. .................... | 17. .................... | 18. .................... |
| सप्तमी | 19. .................... | 20. .................... | 21. .................... |
| सम्बोधनम् | 22. .................... | 23. .................... | 24. .................... |

1. राम
2. अमर
3. सुर
4. नर
5. मानव
6. जन

7. सर्प
8. नकुल
9. माधव
10. भट
11. वानर
12. सैनिक

13. वृक्ष
14. पादप
15. पर्वत
16. आम्र
17. वट
18. खग

19. अश्व
20. गज
21. सिंह
22. मयूर
23. काक
24. कपोत

✱ ✱ ✱ ✱ ✱

## इकारान्तपुँल्लिङ्गशब्दाः

**अधोलिखितं संवादं पठन्तु।**



(शिविः रवेः सहपाठी। स एकदा मित्रेण रविणा सह भ्रमन् यदा एकम् आश्रमम् अगच्छत् तदा एवमभवत् तयोर्मध्ये वार्तालापः।)

**रविः** मित्र! अत्र मुनेः आश्रमः। मुनिः महातपस्वी।

**शिविः** महातपस्वी सः।

**रविः** आम्। अत्र मुनिना पशूनां हिंसा निषिद्धा।

**शिविः** शोभनम्

**रविः** अन्यदपि पश्यतु या जलधारा भूमेः निर्गता वहति, सा अपि मुनेः प्रभावात् एव।

**शिविः** आश्चर्यम्। रवे! पश्यतु इतः सिंह-व्याघ्र-मृगादयः पशवः निर्वैराः भ्रमन्ति। कपीनाम् तु का कथा।

**रविः** आम्, अत्र सर्वे स्नेहेन वसन्ति। अयम् अपि मुनेः प्रभावः।

**शिविः** महत् आश्चर्यम्। पश्यतु-बन्धो! कश्चित् बटुभ्यः वस्त्राणि, मुनिभ्यः च फलानि यच्छति।

**रविः** शिवे! कश्चन श्रद्धालुः अस्ति। जनानां मुनौ श्रद्धा अस्ति।

**शिविः** अधुना तु सायङ्कालः। रवेः किरणाः न दृश्यन्ते।

**रविः** अतएव मुनयः ऋषयः बटवः च अग्नौ हवनं कुर्वन्ति। जनाः मुनिं प्रणमन्ति।

**शिविः** अस्तु अधुना गृहं चलावः।

**क. उपर्युक्ते संवादे कानिचित् रेखाङ्कितानि पदानि सन्ति। तेषु कतिपयानि अत्र दत्तानि अत्र प्रत्येकं पदस्य मूलशब्दः कः? प्रत्येकं शब्दस्य च अन्तिमः वर्णः कः इति लिखन्तु।**

| क. | पदानि | मूलशब्दाः | मूलशब्दस्य अन्तिमवर्णः |
|---|---|---|---|
| यथा | मुनिः | मुनि | इ |
| 1. | मुनौ | ........................ | ........................ |
| 2. | कपीनाम् | ........................ | ........................ |
| 3. | अग्नौ | ........................ | ........................ |
| 4. | ऋषयः | ........................ | ........................ |
| 5. | रवेः | ........................ | ........................ |

**एतेषां सर्वेषां शब्दानाम् अन्तिमः वर्णः 'इ' अस्ति।**
**अतः एते शब्दाः इकारान्ताः कथ्यन्ते।**

◆ अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | शिविः | शिवी | शिवयः |
| द्वितीया | शिविम् | शिवी | शिवीन् |
| तृतीया | शिविना | शिविभ्याम् | शिविभिः |
| चतुर्थी | शिवये | शिविभ्याम् | शिविभ्यः |
| पञ्चमी | शिवेः | शिविभ्याम् | शिविभ्यः |
| षष्ठी | शिवेः | शिव्योः | शिवीनाम् |
| सप्तमी | शिवौ | शिव्योः | शिविषु |
| सम्बोधनम् | हे शिवे! | हे शिवी! | हे शिवयः! |

◆ अधोलिखितशब्दानां रूपाणि लिखित्वा रिक्तस्थानानि पूरयत–

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| विधि | प्रथमा | .................... | .................... | .................... |
| कवि | द्वितीया | .................... | .................... | .................... |
| ऋषि | तृतीया | .................... | .................... | .................... |
| अग्नि | चतुर्थी | .................... | .................... | .................... |
| अञ्जलि | पञ्चमी | .................... | .................... | .................... |
| हरि | षष्ठी | .................... | .................... | .................... |
| कपि | सप्तमी | .................... | .................... | .................... |
| नृपति | सम्बोधनम् | .................... | .................... | .................... |

* * * * *

## उकारान्तपुँल्लिङ्गशब्दाः

ख.

| | पदानि | मूलशब्दाः | मूलशब्दस्य अन्तिमवर्णः |
|---|---|---|---|
| यथा | पशूनाम् | पशु | उ |
| 1. | बन्धो | ........................ | ........................ |
| 2. | पशवः | ........................ | ........................ |
| 3. | वटुभ्यः | ........................ | ........................ |
| 4. | श्रद्धालुः | ........................ | ........................ |
| 5. | भानोः | ........................ | ........................ |
| 6. | साधुः | ........................ | ........................ |

एतेषां सर्वेषां शब्दानाम् अन्तिमः वर्णः 'उ' अस्ति। अतः एते शब्दाः उकारान्ताः कथ्यन्ते।

◆ अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | शिशुः | शिशू | शिशवः |
| द्वितीया | शिशुम् | शिशू | शिशून् |
| तृतीया | शिशुना | शिशुभ्याम् | शिशुभिः |
| चतुर्थी | शिशवे | शिशुभ्याम् | शिशुभ्यः |
| पञ्चमी | शिशोः | शिशुभ्याम् | शिशुभ्यः |
| षष्ठी | शिशोः | शिश्वोः | शिशूनाम् |
| सप्तमी | शिशौ | शिश्वोः | शिशुषु |
| सम्बोधनम् | हे शिशो! | हे शिशू! | हे शिशवः! |

ग. अधोलिखितशब्दानां रूपाणि लिखित्वा रिक्तस्थानानि पूरयत–

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| गुरु | प्रथमा | .................... | .................... | .................... |
| भानु | द्वितीया | .................... | .................... | .................... |
| शम्भु | तृतीया | .................... | .................... | .................... |
| श्रद्धालु | चतुर्थी | .................... | .................... | .................... |
| साधु | पञ्चमी | .................... | .................... | .................... |
| वटु | षष्ठी | .................... | .................... | .................... |
| सूनु | सप्तमी | .................... | .................... | .................... |
| बन्धु | सम्बोधनम् | .................... | .................... | .................... |

घ. अधोलिखिते अनुच्छेदे 'सूर्य' शब्दस्य स्थाने 'रवि' शब्दं प्रयुज्य अनुच्छेदं पुनः लिखत–

1. सूर्यः संसारं प्रकाशयति। सूर्यस्य अरुणः प्रकाशः दर्शनीयः। चन्द्रः सूर्यात् एव प्रकाशं लभते। सूर्ये एव आश्रितं जगत्। सूर्येण एव वयं जीवितुं शक्नुमः। जनाः सूर्याय सादरम् अर्घ्यं प्रयच्छन्ति।

   रविः संसारं प्रकाशयति। ........................................................................................................

   ........................................................................................................................................

   ........................................................................................................................................

2. एवमेव 'सूर्य' शब्दस्य स्थाने 'भानु' शब्दं प्रयुज्य अनुच्छेदं पुनः लिखत–

   ........................................................................................................................................

   ........................................................................................................................................

✱ ✱ ✱ ✱ ✱

## ऋकारान्तपुँल्लिङ्गशब्दाः

**क. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां मूलशब्दान् लिखत।**

| | | मूलशब्दः |
|---|---|---|
| **यथा–** | सृष्टेः भर्ता अस्माकं भरणं कुर्यात्। | भर्तृ |
| 1. | अहं विद्यायाः दातारं गुरुं नमामि। | ...................... |
| 2. | परोपकारः पुण्याय इति महाभारतस्य कर्त्रा लिखितम्। | ...................... |
| 3. | सर्वोपनिषदः गावः दोग्धा गोपालनन्दनः। | ...................... |
| | पार्थो वत्सः सुधीः भोक्ता दुग्धं गीतामृतं महत्।। | ...................... |
| 4. | रामायणस्य रचयितुः नाम महर्षिः वाल्मीकिः। | ...................... |
| 5. | राष्ट्रस्य निर्मातारः शिक्षकाः सम्मान्याः। | ...................... |
| 6. | देशस्य रक्षितृभ्यः सैनिकेभ्यः नमः। | ...................... |
| 7. | प्रातः भ्रमणकर्तृषु क्व रोगः? | ...................... |
| 8. | हे विधातः! सर्वे भवन्तु सुखिनः। | ...................... |

1. एते शब्दाः ऋकारान्ताः कथ्यन्ते यतः एतेषाम् अन्ते 'ऋ' वर्णः अस्ति।
2. एतेषां रूपाणि कर्तृवत् भवन्ति।

- **अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

**कर्तृ**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कर्ता | कर्तारौ | कर्तारः |
| द्वितीया | कर्तारम् | कर्तारौ | कर्तॄन् |
| तृतीया | कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| चतुर्थी | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| पञ्चमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| षष्ठी | कर्तुः | कर्त्रोः | कर्तॄणाम् |
| सप्तमी | कर्तरि | कर्त्रोः | कर्तृषु |
| सम्बोधनम् | हे कर्तः! | हे कर्तारौ! | हे कर्तारः! |

ख. अधोलिखितशब्दानां रूपाणि लिखित्वा रिक्तस्थानानि पूरयत–

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| नेतृ | प्रथमा | .................... | .................... | .................... |
| श्रोतृ | द्वितीया | .................... | .................... | .................... |
| वक्तृ | तृतीया | .................... | .................... | .................... |
| विधातृ | चतुर्थी | .................... | .................... | .................... |
| गन्तृ | पञ्चमी | .................... | .................... | .................... |
| दातृ | षष्ठी | .................... | .................... | .................... |
| क्रेतृ | सप्तमी | .................... | .................... | .................... |
| भर्तृ | सम्बोधनम् | .................... | .................... | .................... |

उदाहरणम् 1. विद्यालयं गन्ता छात्रः – विद्यालयं गन्तारः छात्राः (बहुवचने परिवर्तनम्)

2. नाटकस्य द्रष्टारः बालकाः। – नाटकस्य द्रष्टा बालकः (एकवचने परिवर्तनम्)

- उपर्युक्तम् उदाहरणद्वयम् अनुसृत्य अधोलिखितानि वाक्यानि यथानिर्देशं परिवर्त्य लिखत–

1. देशस्य रक्षिता सैनिकः। (बहुवचने) 1. ........................................
2. विज्ञानस्य वेत्तारः वैज्ञानिकाः। (एकवचने) 2. ........................................
3. शत्रूणां हन्ता वीरः। (बहुवचने) 3. ........................................
4. कवितानां रचयितारः कवयः (एकवचने) 4. ........................................
5. रामायणस्य वक्ता साधुः। (बहुवचने) 5. ........................................
6. कक्षायाः श्रोतारः भक्ताः (एकवचने) 6. ........................................

- अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे पितः! | हे पितरौ! | हे पितरः! |

एवमेव भ्रातृशब्दस्य रूपाणि अपि भवन्ति।

## आकारान्तस्त्रीलिङ्गशब्दाः

**अम्बा** – अयि सुधे! कथं कोलाहलः श्रूयते?

**सुधा** – अम्ब! स्वतन्त्रतायाः अमृतकालस्य शोभायात्रा अस्ति। मम सखी सुजाता अपि तत्र आगता अस्ति।

**अम्बा** – शोभनं तावत्। वयम् अपि शोभायात्रां पश्यामः।

**सुधा** – अहह! विशाला शोभायात्रा।

**सुजाता** – शोभायात्रायां के के सम्मिलिताः?

**सुधा** – पश्यतु यः अग्रे अग्रे चलति सः अस्माकं मुख्यमन्त्री। पृष्ठतः च अनेके नेतारः, युवकाः, युवतयः, बालकाः, बालिकाः, समाजसेविकाः च गच्छन्ति।

**सुजाता** – सुधे! एषः कः? जनाः यस्य पुष्पमालाभिः स्वागतं कुर्वन्ति?

**सुधा** – सः तु स्वतन्त्रतासेनानी। महिलाभ्यः उद्योगप्रशिक्षणशाला अनेन एव स्थापिता।

**अम्बा** – बाढम्! सम्प्रति शोभायात्रायाम् उच्चैः जयघोषः भवति।

**सर्वे** – जयतु भारतम्। जयतु भारतम्। वन्दे मातरम्।

**क. उपर्युक्ते संवादे रेखाङ्कितानां पदानां मूलशब्दं विभक्तिं वचनं च लिखत।**

| | पदानि | मूलशब्दाः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| यथा | बालिकाः | बालिका | प्रथमा | बहुवचनम् |
| 1. | सुधे! | ........................ | ........................ | ........................ |
| 2. | अम्ब | ........................ | ........................ | ........................ |
| 3. | स्वतन्त्रतायाः | ........................ | ........................ | ........................ |
| 4. | शोभायात्रा | ........................ | ........................ | ........................ |
| 5. | सुजाता | ........................ | ........................ | ........................ |
| 6. | समाजसेविका | ........................ | ........................ | ........................ |
| 7. | पुष्पमालाभिः | ........................ | ........................ | ........................ |
| 8. | महिलाभ्यः | ........................ | ........................ | ........................ |
| 9. | प्रशिक्षणशाला | ........................ | ........................ | ........................ |
| 10. | शोभयात्रायाम् | ........................ | ........................ | ........................ |

**उपर्युक्ताः शब्दाः आकारान्ताः। यतः तेषाम् अन्ते 'आ' वर्णः अस्ति। एते सर्वे स्त्रीलिङ्गाः।**

◆ **अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |

| | | | |
|---|---|---|---|
| **तृतीया** | रमया | रमाभ्याम् | रमाभिः |
| **चतुर्थी** | रमायै | रमाभ्याम् | रमाभ्यः |
| **पञ्चमी** | रमायाः | रमाभ्याम् | रमाभ्यः |
| **षष्ठी** | रमायाः | रमयोः | रमाणाम् |
| **सप्तमी** | रमायाम् | रमयोः | रमासु |
| **सम्बोधनम्** | हे रमे! | हे रमे! | हे रमाः। |

**ख. प्रत्येकं वाक्यस्य समक्षं कोष्ठके विकल्पद्वयम् अस्ति, उचितपदेन वाक्यपूर्तिं कुरुत–**

**उदाहरणम्**– नरः (विद्यया) शोभते (विद्याम्/विद्यया)

1. त्वम् अस्य उत्तरं ...................... पृच्छ। (लताम्/लतायाः)
2. अध्यापिका ...................... उपहारं यच्छति। (वन्दनाम्/वन्दनायै)
3. मालाकारः ...................... पुष्पाणि आनयति। (वाटिकायाः/वाटिकया)
4. भीष्मः ...................... पुत्रः आसीत्। (गङ्गाम्/गङ्गायाः)
5. अशोकः ...................... अतीव कुशलः। (चित्रकलायाम्/चित्रकलाम्)

**ग. अत्र चित्रैः सह वाक्यानि लिखितानि सन्ति। तानि दृष्ट्वा कोष्ठकगते शब्दे उचितविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत–**

**उदाहरणम्**– इयं पाठशाला अस्ति।
सा बालिका (पाठशालायाम्) अस्ति।



1. सुधा ...................... नमति। (शिक्षिका)



2. अध्यापिका ...................... पुस्तकं यच्छति। (बालिका)



3. ...................... समीपे वाटिका अपि अस्ति। (पाठशाला)



4. वसुन्धरा ...................... प्रधानाचार्यायाः स्वागतं करोति। (माला)



5. सुधा ...................... लेखं लिखति। (पत्रिका)



6. ...................... पुष्पाणि सन्ति। (वाटिका)

**घ. अधोलिखितवाक्येषु अकारान्तपुँल्लिङ्गशब्दानां स्थाने आकारान्तस्त्रीलिङ्गशब्दान् प्रयुज्य रिक्तस्थानानि पूरयत–**

1. बालकौ धावत:। बालिके धावत:। (बालिका)
2. बालक: मूषकान् पश्यति। बालक: ........................ पश्यति। (मूषिका)
3. चटका: चटकै: सह उत्पतन्ति। चटका: ........................ सह उत्पतन्ति। (चटका)
4. माता सुताय दुग्धं यच्छति। माता ........................ दुग्धं यच्छति। (सुता)
5. पुष्पाणि वृक्षात् पतन्ति। पुष्पाणि ........................ पतन्ति। (लता)
6. इदम् आचार्यस्य गृहम्। इदम् ........................ गृहम्। (आचार्या)
7. पादपस्य शोभां पश्य। ........................ शोभां पश्य। (शाखा)
8. हारे पुष्पाणि गुम्फितानि। ........................ पुष्पाणि गुम्फितानि। (माला)

✸ ✸ ✸ ✸ ✸

## इकारान्ता: स्त्रीलिङ्गा: शब्दा:

**दीपिका** – प्रीते! वयं संस्कृतं पठाम:। संस्कृतस्य विशिष्टं महत्त्वं किम्?

**सुधा** – किं त्वं न जानासि यत् 'संस्कृति: संस्कृताश्रिता'।

**दीपिका** – आम्, जानामि यत् संस्कृतेन एव वयं स्वसंस्कृतिं जानीम:।

**प्रीति:** – अधुना संस्कृतं प्रति तव अधिका प्रीति: स्वाभाविकी । यत: संस्कृते व्यावहारिक्य: प्रेरणाप्रदा: सूक्तय: अपि सन्ति।

**दीपिका** – तर्हि ता: सूक्ती: मां श्रावयतु ।

**प्रीति:** – श्रूयताम्

i. सम्पत्तौ विपत्तौ च महताम् एकरूपता।

ii. यादृशी भावना यस्य सिद्धि: भवति तादृशी ।

iii. विधिरहो बलवान् इति मे मति:।

**दीपिका** – बाढम्। एषा कीर्ति: अपि आगता। प्रीते! इदानीं कीर्त्या सह आपणं चलाव: तत: सूक्तीनां सङ्ग्रहद्वयं क्रेतव्यम्।

**प्रीति:** – सङ्ग्रहद्वयं किमर्थम्?

**दीपिका** – एकं तु कीर्त्यै दास्यामि।

**प्रीति:** – अस्तु चलाम:। जयतु संस्कृतम्। जयतु भारतम्।

◆ **अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गति: | गती | गतय: |
| द्वितीया | गतिम् | गती | गती: |

| | | | |
|---|---|---|---|
| तृतीया | गत्या | गतिभ्याम् | गतिभिः |
| चतुर्थी | गतये/गत्यै | गतिभ्याम् | गतिभ्यः |
| पञ्चमी | गतेः/गत्याः | गतिभ्याम् | गतिभ्यः |
| षष्ठी | गतेः/गत्याः | गत्योः | गतीनाम् |
| सप्तमी | गतौ/गत्याम् | गत्योः | गतिषु |
| सम्बोधनम् | हे गते! | हे गती! | हे गतयः! |

क. उपर्युक्ते संवादे यानि रेखाङ्कितानि पदानि सन्ति तानि अत्र विभक्तिक्रमेण दत्तानि सन्ति। तेषां मूलशब्दं निर्दिश्य अवशिष्टरूपाणि 'गति' शब्दवत् रिक्तस्थानेषु लिखत–

सम्बोधने

उदाहरणम् मूलशब्दः (प्रीति) – हे प्रीते! हे प्रीती! हे प्रीतयः!

### प्रथमा विभक्तिः

| मूलशब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| ...................... | संस्कृतिः | ...................... | ...................... |
| ...................... | प्रीतिः | ...................... | ...................... |
| ...................... | सिद्धिः | ...................... | ...................... |
| ...................... | ...................... | ...................... | सूक्तयः |

### द्वितीया विभक्तिः

| | | | |
|---|---|---|---|
| ...................... | संस्कृतिम् | ...................... | ...................... |
| ...................... | प्रीतिम् | ...................... | ...................... |
| ...................... | ...................... | ...................... | सूक्तीः |

### तृतीया विभक्तिः

| | | | |
|---|---|---|---|
| ...................... | कीर्त्या | ...................... | ...................... |

### चतुर्थी विभक्तिः

| | | | |
|---|---|---|---|
| ...................... | कीर्त्यै | ...................... | ...................... |

### पञ्चमी विभक्तिः

| | | | |
|---|---|---|---|
| ...................... | मतेः | ...................... | ...................... |

### षष्ठी विभक्तिः

........................ ........................ ........................ सूक्तीनाम्

### सप्तमी विभक्तिः

........................ सम्पत्तौ ........................ ........................

........................ विपत्तौ ........................ ........................

> उपर्युक्ताः शब्दाः इकारान्ताः सन्ति। यतः एतेषाम् अन्ते 'इ' वर्णः अस्ति। अत एते सर्वे इकारान्ताः स्त्रीलिङ्गाः सन्ति।

**ख.** **अधः प्रदत्ते आरेखे सुनीतिः किं किं करोति इति लिखितम् अस्ति। विभक्तिक्रमेण तत् रिक्तस्थानेषु लिखन्तु–**




**यथा** 1. सुनीतिः प्रातः उत्तिष्ठति।

2. ........................................................................

3. ........................................................................

4. ........................................................................

5. ........................................................................

6. ........................................................................

7. ........................................................................

8. ........................................................................

**ग. समक्षं कोष्ठके कानिचित् पदानि लिखितानि सन्ति। तानि प्रयुज्य उत्तराणि लिखत–**

1. रमा – अत्र का पठति?
   दीप्तिः – ..............................
2. रमा – सा किं पठति?
   दीप्तिः – ..............................
3. रमा – सा कया सह पठति?
   दीप्तिः – ..............................
4. रमा – सा कस्याः पुत्री अस्ति?
   दीप्तिः – ..............................
5. रमा – सा कस्यै फलानि यच्छति?
   दीप्तिः – ..............................
6. रमा – तस्याः कस्यां विश्वासः?
   दीप्तिः – ..............................

| |
|---|
| 1. शान्त्या |
| 2. रुचिः |
| 3. प्रीतेः |
| 4. सूक्तीः |
| 5. कान्त्यै |
| 6. प्रीतौ |

**घ. अधोलिखितवाक्येषु आकारान्तस्त्रीलिङ्गशब्दाः रेखाङ्किताः सन्ति। तेषु या विभक्तिः प्रयुक्ता, तस्यामेव विभक्तौ कोष्ठके दत्तैः इकारान्तस्त्रीलिङ्गशब्दैः रिक्तस्थानपूर्तिं कुरुत–**

**यथा** वाटिकायां वृक्षाः सन्ति। संस्कृतौ भारतस्य प्रतिष्ठा अस्ति। (संस्कृति)

1. वृक्षः लतया सह शोभते। कान्तिः .................. सह शोभते। (मति)
2. सुतायै भोजनं यच्छ। .................. सर्वदा प्रयत्नं कुरु। (प्रगति)
3. शाखायाः खगाः उत्पतन्ति। .................. भयं न कर्तव्यम्। (विपत्ति)
4. सः मालानां विक्रेता। सः .................. विक्रेता। (भूमि)
5. शोभायात्रायां बालिकाः अपि सन्ति। सा .................. विश्वसिति। (रुचि)

✸ ✸ ✸ ✸ ✸

## ईकारान्तस्त्रीलिङ्गशब्दाः

◆ **भवन्तः अधोलिखितानि वाक्यानि पठन्तु।**

1. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।
2. सत्पुत्राः जननीं नमन्ति जनन्याः च आशीर्वादं गृह्णन्ति।
3. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

4. भारतस्य राजधानी दिल्ली अस्ति।
5. ऐतिहासिकं रक्तदुर्गं दिल्ल्याम् एव।
6. विद्वांसः सरस्वत्याः वन्दनां कुर्वन्ति ।
7. भारतदेशस्य अनेकेषु ग्रामेषु जनाः देववाण्या एव संवादं कुर्वन्ति ।
8. हे पुत्रि! त्वम् अतीव धन्या यतः त्वं जले निमज्जनात् शिशुं रक्षितवती ।
9. रक्षाबन्धने भ्राता भगिन्यै उपहारं यच्छति ।
10. नगरीषु काशी प्रसिद्धा अस्ति।

**क. उपर्युक्तानां रेखाङ्कितानां पदानां मूलशब्दं विभक्तिं वचनं च लिखन्तु–**

| | पदानि | मूलशब्दाः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| यथा | जननी | जननी | प्रथमा | एकवचनम् |
| 1. | राजधानी | ........................ | ........................ | ........................ |
| 2. | जननीम् | ........................ | ........................ | ........................ |
| 3. | देववाण्या | ........................ | ........................ | ........................ |
| 4. | भगिन्यै | ........................ | ........................ | ........................ |
| 5. | जनन्याः | ........................ | ........................ | ........................ |
| 6. | सरस्वत्याः | ........................ | ........................ | ........................ |
| 7. | देहल्याम् | ........................ | ........................ | ........................ |
| 8. | नार्यः | ........................ | ........................ | ........................ |
| 9. | नगरीषु | ........................ | ........................ | ........................ |
| 10. | हे पुत्रि! | ........................ | ........................ | ........................ |

◆ **अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सरस्वती | सरस्वत्यौ | सरस्वत्यः |
| द्वितीया | सरस्वतीम् | सरस्वत्यौ | सरस्वतीः |
| तृतीया | सरस्वत्या | सरस्वतीभ्याम् | सरस्वतीभिः |
| चतुर्थी | सरस्वत्यै | सरस्वतीभ्याम् | सरस्वतीभ्यः |
| पञ्चमी | सरस्वत्याः | सरस्वतीभ्याम् | सरस्वतीभ्यः |
| षष्ठी | सरस्वत्याः | सरस्वत्योः | सरस्वतीनाम् |
| सप्तमी | सरस्वत्याम् | सरस्वत्योः | सरस्वतीषु |
| सम्बोधनम् | हे सरस्वति! | हे सरस्वत्यौ! | हे सरस्वत्यः! |

ख. अत्र चित्रं दृष्ट्वा कोष्ठकगते शब्दे उचितविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुर्वन्तु–



1. क. इयं .............. अस्ति। (सरस्वती)
   ख. .............. हस्ते वीणा अस्ति। (सरस्वती)



2. क. इयं मम .............. उमा अस्ति। (सखी)
   ख. सा .............. पत्रं लिखति। (लेखनी)



3. क. एषा .............. अस्ति। (गृहिणी)
   ख. सा .............. पचति। (रसवती*)



4. क. एषा .............. अस्ति। (मार्जारी)
   ख. रमा .............. दुग्धं यच्छति। (मार्जारी)



5. क. एषा .............. अस्ति। (जननी)
   ख. पुत्री .............. नमति। (जननी)



6. क. एषा .............. अस्ति। (स्थाली)
   ख. .............. फलानि सन्ति। (स्थाली)



7. क. एषा .............. लक्ष्मीबाई अस्ति। (राज्ञी)
   ख. .............. पूर्वनाम 'मनुबाई' आसीत् (राज्ञी)

---
* पाकशाला

ग. अधोलिखितवाक्येषु 'भ्रातृ' स्थाने 'भगिनी' शब्दस्य प्रयोगं कृत्वा वाक्यानां पुनर्लेखनं कुर्वन्तु–

| | | |
|---|---|---|
| **यथा–** | सः मम भ्राता। | सा मम भगिनी। |
| 1. | तव भ्रातुः नाम किम्? | ................................................ |
| 2. | किं त्वं भ्रात्रा सह क्रीडसि? | ................................................ |
| 3. | अहं भ्रात्रे उपहारं यच्छामि | ................................................ |
| 4. | अहं भ्रातुः वेदं पठामि। | ................................................ |
| 5. | मम भ्रातरि असीमश्रद्धा वर्तते। | ................................................ |
| 6. | अहं प्रातः उत्थाय भ्रातरं नमामि | ................................................ |

✸ ✸ ✸ ✸ ✸

## अकारान्त–नपुंसकलिङ्गशब्दाः

**अवधेयम :–** प्रथमा – फलम् फले फलानि

द्वितीया – फलम् फले फलानि

**शेषं पुँल्लिङ्गवत्**

तथैव पुष्प–उद्यान–मुख–नेत्र–सुख–दुःख–गृह–मित्र–पुस्तक–पत्र–जल–नगर–चित्र–वस्त्र–ज्ञान–उत्तर–आदयः।

✸ ✸ ✸ ✸ ✸

## उकारान्तनपुंसकलिङ्गशब्दाः

**संज्ञाशब्दाः–**मधु–वस्तु–वसु–आदयः।

**अधोलिखितं संवादं पठन्तु।**

**(एकदा रघुनाथः स्वमित्रं वागीशं मेलितुं तस्य गृहम् आयाति।)**

**वागीशः** – आगच्छ आगच्छ मित्र! हृदयेन स्वागतम्। उपविश किमर्थं विलम्बात् आगतः असि?

**अम्बा** – अहो! काशी–नगरात् रघुनाथः आगतः।

**रघुनाथः** – प्रणमामि अम्ब!

**अम्बा** – चिरञ्जीव। आस्यताम्।



**वागीशः** – मित्र! इदं जलम्। इदं प्रौञ्छवस्त्रम्। प्रथमं जलेन मुखं हस्तौ च प्रक्षालय।

**रघुनाथः** – (मुख–हस्त–पाद–प्रक्षालनानन्तरम्) अहो! अतीव–सुन्दरं गृहम्।

**वागीशः** – धन्यवादः, अधुना जलपानं कुरु।

**अम्बा** – कृतं जलपानम्। वागीश! अधुना गृहं दर्शय।

**वागीशः** – पश्यत तावत् मम अध्ययनकक्षम्। इदं दूरदर्शनम्।

इदं ध्वनिमुद्रिकायन्त्रम्, इतः च पुस्तकानि, समाचारपत्राणि पत्रिकाः च सन्ति।





**रघुनाथः** – तव गृहे बहूनि वस्तूनि। शोभनम्।

**वागीशः** – पश्य इमां वाटिकाम्।

**रघुनाथः** – अहो सुन्दराणि पुष्पाणि। भ्रमराः मधु पिबन्ति। दर्शनीया वाटिका। सुन्दरं तव गृहम्।

**वागीशः** – मित्र! आगच्छ! आवां भोजनं कुर्वः।

**अम्बा** – पुत्र! इमानि आम्रफलानि अपि *स्वमित्राय* यच्छ।

**क. एतस्मिन् संवादे कानिचित् पदानि रेखाङ्कितानि सन्ति। तेषां पदानां मूलशब्दं विभक्तिं वचनं च लिखन्तु।**

| | पदानि | मूलशब्दाः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| **यथा** | हृदयेन | हृदय | तृतीया | एकवचनम् |
| 1. | उपवस्त्रम् | ........................ | ........................ | ........................ |
| 2. | पुस्तकानि | ........................ | ........................ | ........................ |
| 3. | सुन्दराणि | ........................ | ........................ | ........................ |
| 4. | जलेन | ........................ | ........................ | ........................ |
| 5. | आम्रफलानि | ........................ | ........................ | ........................ |
| 6. | समाचारपत्राणि | ........................ | ........................ | ........................ |
| 7. | नगरात् | ........................ | ........................ | ........................ |
| 8. | मित्राय | ........................ | ........................ | ........................ |
| 9. | गृहे | ........................ | ........................ | ........................ |
| 10. | मधु | ........................ | ........................ | ........................ |
| 11. | बहूनि | ........................ | ........................ | ........................ |
| 12. | वस्तूनि | ........................ | ........................ | ........................ |

◆ **अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | मित्रम् | मित्रे | मित्राणि |
| **द्वितीया** | मित्रम् | मित्रे | मित्राणि |
| **तृतीया** | मित्रेण | मित्राभ्याम् | मित्रैः |
| **चतुर्थी** | मित्राय | मित्राभ्याम् | मित्रेभ्यः |
| **पञ्चमी** | मित्रात् | मित्राभ्याम् | मित्रेभ्यः |
| **षष्ठी** | मित्रस्य | मित्रयोः | मित्राणाम् |
| **सप्तमी** | मित्रे | मित्रयोः | मित्रेषु |
| **सम्बोधनम्** | हे मित्र! | हे मित्रे! | हे मित्राणि! |

◆ अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| सम्बोधनम् | हे फल! | हे फले! | हे फलानि! |

◆ अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधनम् | हे मधो/मधु! | हे मधुनी! | हे मधूनि! |

**ख. चित्रं दृष्ट्वा वाक्यानि पूरयन्तु।**

**उदाहरणम्–** एषः फलविक्रेता। सः फलानि विक्रीणाति।









1. एषः जलाशयः।
जलाशये ………… विकसितानि सन्ति।

2. एषः आम्रवृक्षः
आम्रवृक्षे ………… सन्ति।

3. एतत् उद्यानम् अस्ति।
एतस्मिन् उद्याने ………… सन्ति।

4. एषः पत्रवाहकः अस्ति।
सः ………… वितरति।





5. एतत् बसयानम्।
जनाः ………… यात्रां कुर्वन्ति।

**ग. अधः मञ्जूषायाम् अकारान्तशब्दाः उकारान्तशब्दाः च लिखिताः सन्ति। एतेषु के पुँल्लिङ्गाः के च नपुंसकलिङ्गाः? उचित स्थाने पृथक् पृथक् लिखन्तु।**

बालक, पुत्र, मित्र, वृक्ष, फल, पत्र, खग, पुष्प, सुर, फल, सुरेश, सुख, दुःख, जलाशय, हृदय, जल, नगर, देव, गृह, गुरु, वस्तु, साधु, मधु, वसु।

| अकारान्तशब्दाः | | उकारान्तशब्दाः | |
|---|---|---|---|
| पुँल्लिङ्गाः | नपुंसकलिङ्गाः | पुँल्लिङ्गाः | नपुंसकलिङ्गाः |
| ………………………… | ………………………… | ………………………… | ………………………… |
| ………………………… | ………………………… | ………………………… | ………………………… |
| ………………………… | ………………………… | ………………………… | ………………………… |
| ………………………… | ………………………… | ………………………… | ………………………… |
| ………………………… | ………………………… | ………………………… | ………………………… |

## अजन्तशब्दाः

### अस्माभिः अधीतम्

- राम – अमर-नर-वृक्ष-आम्र-वट-पर्वत-अश्व-आदयः शब्दाः अकारान्तपुँल्लिङ्गाः यतः एतेषां सर्वेषां शब्दानाम् अन्ते 'अ' स्वरः विद्यते।
- येषां शब्दानाम् अन्ते 'इ' स्वरः भवति ते इकारान्ताः कथ्यन्ते। रवि-कवि-ऋषि-आदयः शब्दाः इकारान्ताः पुँल्लिङ्गाः एतेषां रूपाणि शिविवत् भवन्ति।
- येषां शब्दानाम् अन्ते 'उ' वर्णः भवति ते उकारान्ताः कथ्यन्ते। यथा भानु-गुरु-शम्भु-आदयः। एतेषां रूपाणि शिशुवत् भवन्ति।
- दातृ-भोक्तृ-गन्तृ-वक्तृ-आदयः शब्दाः ऋकारान्तपुँल्लिङ्गाः। यतः एतेषाम् अन्ते 'ऋ' वर्णः। कर्तृशब्दवत् एतेषां रूपाणि भवन्ति।
- येषां शब्दानाम् अन्ते 'आ' वर्णः भवति ते आकारान्ताः कथ्यन्ते। यथा बालिका-सुजाता-पत्रिका-वसुन्धरा-माला-आदयः शब्दाः आकारान्ताः स्त्रीलिङ्गाः। यतः एतेषाम् अन्ते 'आ' वर्णः। लताशब्दवत् एतेषां रूपाणि

भवन्ति।

- प्रीति-कीर्ति-भूमि-कान्ति-आदयः शब्दाः इकारान्ताः स्त्रीलिङ्गाः। यतः एतेषाम् अन्ते 'इ' वर्णः। एतेषां रूपाणि 'मति' शब्दवत् भवन्ति।
- येषां शब्दानाम् अन्ते 'ई' स्वरवर्णः भवति, ते ईकारान्ताः कथ्यन्ते। देवी-जननी-नगरी-नदी-काशी-आदयः शब्दाः ईकारान्ताः स्त्रीलिङ्गाः। एतेषां शब्दरूपाणि सरस्वतीवत् भवन्ति।
- फल-उद्यान-पत्र-मित्र-पुष्प-आदयः शब्दाः अकारान्तनपुंसकलिङ्गाः। मधु-वस्तु-वसु-आदयः च उकारान्त-नपुंसकलिङ्गाः । एतेषां प्रथमा-द्वितीया-विभक्त्योः रूपाणि समानानि भवन्ति। प्रथमा-द्वितीया-सम्बोधनं च विहाय 'फल' शब्दस्य बालकशब्दवत् उकारान्तनपुंसकलिङ्गशब्दानां च रूपाणि मधुशब्दवत् भवन्ति।

✸ ✸ ✸ ✸ ✸

## ( ख ) हलन्तशब्दाः

### हलन्तपुँल्लिङ्गशब्दाः

**अधोलिखिते संवादे रेखाङ्कितान् शब्दान् ध्यानेन पश्यन्तु–**

**योगेशः** – सत्येन्द्र! '<u>जीवन्</u> नरः कल्याणं पश्यति' इति <u>वदन्</u> शीघ्रं शीघ्रं कः गच्छति?

**सत्येन्द्रः** – कश्चन <u>विद्वान्</u> एव।

**योगेशः** – भो <u>विद्वन्</u>! तिष्ठतु भवान्। शृणोतु।

**विद्वान्** – अयि! <u>गच्छन्तं</u> मां किं प्रष्टुम् इच्छति <u>भवान्</u>?

**योगेशः** – क्षम्यताम्। 'जीवने कीदृशः व्यवहारः भवेत्' यं <u>विद्वांसः</u> अपि प्रशंसन्तु।

**विद्वान्** – शृणोतु–
1. <u>आत्मनः</u> प्रतिकूलानि परेषां न समाचरेत्।
2. <u>आत्मना</u> उद्धरेत् <u>आत्मानम्</u>।
3. मानो हि <u>महतां</u> धनम्।

<u>श्रीमन्</u> इत्येव समुचितः व्यवहारः।

**क. एतस्मिन् संवादे रेखाङ्कितानां पदानां मूलशब्दान् उदाहरणानुसारं लिखन्तु।**

| | पदानि | मूलशब्दाः |
|---|---|---|
| यथा | जीवन् | जीवत् |
| | वदन् | वदत् |
| | विद्वान् | ...................... |
| | विद्वन् | ...................... |
| | गच्छन्तम् | ...................... |
| | भवान् | ...................... |
| | विद्वांसः | ...................... |
| | आत्मनः/आत्मना/आत्मानम् | ...................... |
| | महताम् | ...................... |
| | श्रीमन् | ...................... |

**उपर्युक्तेषु शब्देषु अन्तिमः वर्णः व्यञ्जनवर्णः ( हल् वर्णः ) अस्ति। अतः एते व्यञ्जनान्ताः ( हलन्ताः ) कथ्यन्ते। जीवत्, गच्छत्, विद्वस्, भवत्, वदत्, आत्मन् शब्दाः हलन्ताः ( व्यञ्जनान्ताः ) सन्ति। अत्र एतानि पदानि पुँल्लिङ्गे सन्ति।**

◆ अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |
| सम्बोधनम् | भवन्! | भवन्तौ! | भवन्तः! |

ख. अधोलिखितशब्दानां यथानिर्दिष्टविभक्तिषु रूपाणि लिखन्तु।

| शब्दाः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| भवत् | प्रथमा | .................... | .................... | .................... |
| विद्वस् | द्वितीया | .................... | .................... | .................... |
| गच्छत् | तृतीया | .................... | .................... | .................... |
| राजन् | चतुर्थी | .................... | .................... | .................... |
| आत्मन् | पञ्चमी | .................... | .................... | .................... |
| भवत् | षष्ठी | .................... | .................... | .................... |
| विद्वस् | सप्तमी | .................... | .................... | .................... |
| राजन् | सम्बोधनम् | .................... | .................... | .................... |

**अस्माभिः अधीतम्**

- येषां शब्दानाम् अन्ते व्यञ्जनवर्णः भवति ते हलन्ताः (व्यञ्जनान्ताः) शब्दाः कथ्यन्ते।
- राजन्, भवत्, आत्मन्, विद्वस्, गच्छत्, वदत् शब्दाः हलन्ताः शब्दाः यतः एतेषाम् अन्तिमः वर्णः व्यञ्जनम् अस्ति।

* * * * *

## (ग) सर्वनामशब्दाः

**क. अधः दत्तानि चित्राणि दृष्ट्वा उदाहरणम् अनुसृत्य वाक्यानि पूरयन्तु–**



यथा– 1. (बालकः) पठति।
किं बालकः पठति?
आम्, **सः** पठति।



2. (बालकौ) पठतः।
किं **तौ** लिखतः?
न, तौ पठतः।



3. (बालकाः) क्रीडन्ति।
किं **ते** ......................?
आम्, ......................।



4. (बालिका) पठति।
किं **सा** ......................?
आम्, ......................।



5. (बालिके) हसतः।
किं **ते** ......................?
आम्, ......................।



6. (बालिकाः) नृत्यन्ति।
किं **ताः** ......................?
आम्, ......................।



7. (पुस्तकम्) अस्ति।
किं **तत्** फलम् अस्ति?
नहि, ............. तु फलं नास्ति,
............. तु ............. अस्ति।



8. **ते** (पुस्तके) स्तः।
किं **ते** आम्रे स्तः?
नहि ..........................।



9. **तानि** (पुष्पाणि) सन्ति।
किं **तानि** आम्राणि सन्ति?
नहि, ..........................।

**उपर्युक्तानि स्थूलानि पदानि 'तद्' सर्वनामशब्दस्य रूपाणि सन्ति। त्रिषु लिङ्गेषु एतस्य रूपाणि भिन्नानि भवन्ति।**

**ख. एवमेव अधोलिखितम् उदाहरणम् अनुसृत्य संज्ञापदानां स्थाने सर्वनामपदानि लिखन्तु।**

**यथा** 1. छात्रः लिखति – सः लिखति।

2. उमा पठति – सा पठति।

3. मम हस्ते पुस्तकम् अस्ति। – तत् (पुस्तकम्) नवमकक्षायाः अस्ति।

| | | | |
|---|---|---|---|
| क. | रमेशः नाटकं पश्यति। | = | ………………… नाटकं पश्यति। |
| ख. | बालकाः धावन्ति। | = | ………………… धावन्ति। |
| ग. | बालिकाः नमन्ति। | = | ………………… नमन्ति। |
| घ. | सौम्या हसति। | = | ………………… हसति । |
| ङ. | उद्याने पुष्पाणि सन्ति। | = | उद्याने ………………… अहं पश्यामि। |
| च. | सुन्दरम् उद्यानम् अस्ति। | = | ………………… तडागस्य समीपे अस्ति। |

## यद्-तद् सर्वनामशब्दयोः प्रयोगः

**अधोलिखितानि वाक्यानि पठत-**

1. यः सदाचारी **सः** एव सुखी।
2. **या** अर्थकरी विद्या **सा** एव श्रेष्ठा।
3. **यत्** भोजनं स्वास्थ्यवर्धकं **तत्** एव श्रेष्ठम् ।
4. **यस्य** तृष्णा विशाला **सः** तु दरिद्रः भवति।
5. **यस्य** नास्ति स्वयं प्रज्ञा, शास्त्रं **तस्य** करोति किम्?
6. **यत् यत्** आचरति श्रेष्ठः, **तत् तत्** इतरः जनः अपि करोति।

**एवम् उपरिलिखितेषु वाक्येषु "यद्-तद्" शब्दयोः प्रयोगाः त्रिषु लिङ्गेषु दृश्यन्ते। यत्र 'यद्' शब्दस्य प्रयोगः भवति तत्र 'तद्' शब्दस्यापि प्रयोगः कर्तव्यः।**

**क. अधोलिखितेषु वाक्येषु 'यद्-तद्' शब्दयोः उचितरूपैः रिक्तस्थानपूर्तिं कुर्वन्तु–**

**यथा** अत्र **यः** उपदिशति **सः** अस्माकं गुरुः।

1. अत्र ………………… अग्रे अग्रे गच्छति ………………… अशोकः।
2. तत्र ………………… पितरौ नमति ………………… कामना।
3. ………………… छात्राः परिश्रमेण पठन्ति ………………… सफलतां प्राप्नुवन्ति ।
4. ………………… किमपि लक्ष्यं न भवति ………………… जीवनं व्यर्थम्।
5. ……………… विद्या, दानं, ज्ञानं, शीलं किमपि न भवति ………………… पृथिव्यां भाररूपाः भवन्ति।
6. ………………… गृहे अतिथीनां सत्कारः भवति ………………… गृहे देवाः निवसन्ति।

7. .................... जनं सज्जनाः परित्यजन्ति .................... जनं धिक्।
8. .................... सह त्वं विद्यालयं गच्छसि .................... कः?
9. .................... धावनक्रीडायां सर्वोत्तमः .................... पुरस्कारः दीयते।
10. .................... वृक्षे कोकिलः कूजति .................... आम्रस्य वृक्षः।
11. .................... उपकारं कुर्वन्ति .................... नराः धन्याः।
12. .................... पुस्तकानि नवमकक्षायाः सन्ति .................... सर्वाणि मया पठितानि।

**अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

### ''तत्'' पुंलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

### ''तत्'' स्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

### ''तत्'' नपुंसकलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |

| | | | |
|---|---|---|---|
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## ''इदम्'' सर्वनाम्नः प्रयोगः

**क. अत्र चित्रं वीक्ष्य रिक्तस्थानपूर्तिं कुर्वन्तु।**



यथा–1. अयं कपोतः।
किम् इदानीम् अयम् उत्पतति?
नहि, अयं भूमौ तिष्ठति।



2. इमौ शुकौ।
किम् इमौ पञ्जरे स्तः?
न, इमौ ........................।



3. इमे मयूराः।
किम् इमे नृत्यन्ति?
आम्! ........................।



4. इयं महिला।
किम् इयं लिखति?
न, ........................।



5. इमे बालिके।
किम् इमे वार्तालापं कुरुतः?
आम्! ........................।



6. इमाः नार्यः।
किम् इमाः पचन्ति?
आम्! ........................।



7. इदं गृहम्।
किम् इदं कुटीरम्?
नहि! .................. तु भवनम्।



8. इमे पुष्पे।
किम् इमे लतायाम् स्थिते?
नैव! इमे ..................।



9. इमानि आम्राणि।
किम् इमानि वृक्षे संलग्नानि?
आम्! .........।

''इदम्'' शब्दस्य रूपाणि अपि त्रिषु लिङ्गेषु भवन्ति। संज्ञाया: विशेषणरूपेण अपि अस्य शब्दस्य प्रयोग: भवति। संज्ञाशब्दे यत् लिङ्गं यद् वचनं या च विभक्ति: भवति, तदेव विशेषणशब्दे (सर्वनामशब्दे) अपि भवति।

**अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

### ''इदम्'' पुंलिङ्गम्

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम् | इमौ | इमान् |
| तृतीया | अनेन | आभ्याम् | एभि: |
| चतुर्थी | अस्मै | आभ्याम् | एभ्य: |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्य: |
| षष्ठी | अस्य | अनयो: | एषाम् |
| सप्तमी | अस्मिन् | अनयो: | एषु |

### ''इदम्'' स्त्रीलिङ्गम्

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | इयम् | इमे | इमा: |
| द्वितीया | इमाम् | इमे | इमा: |
| तृतीया | अनया | आभ्याम् | आभि: |
| चतुर्थी | अस्यै | आभ्याम् | आभ्य: |
| पञ्चमी | अस्या: | आभ्याम् | आभ्य: |
| षष्ठी | अस्या: | अनयो: | आसाम् |
| सप्तमी | अस्याम् | अनयो: | आसु |

### ''इदम्'' नपुंसकलिङ्गम्

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् | इमे | इमानि |
| तृतीया | अनेन | आभ्याम् | एभि: |
| चतुर्थी | अस्मै | आभ्याम् | एभ्य: |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्य: |

| | | | |
|---|---|---|---|
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |

## ''किम्'' पुंलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

## ''किम्'' स्त्रीलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

## ''किम्'' नपुंसकलिङ्गम्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

**ख. अधोलिखितेषु वाक्येषु 'इदम्' शब्दस्य उचितरूपेण रिक्तस्थानपूर्तिं कुर्वन्तु। रूपाणि समक्षं मञ्जूषायां दत्तानि सन्ति–**

| |
|---|
| इमे, अनेन, अयम्, इयम्, अस्या:, इमानि, अस्मिन्, अस्यै |

**यथा** 1. (अस्य) नाम रमेश:।

2. (अस्याम्) कक्षायां विज्ञानस्य छात्रा: पठन्ति।

1. ...................... देवदत्त:। स: गणिते अतीव कुशल:।
2. ...................... आम्रवृक्षा:।
3. ...................... कमलानि तडागेषु विकसन्ति।
4. अशोक: विद्यालयं गच्छति। ...................... सह रमा अपि गच्छति।
5. गीता अद्य वीरतापुरस्कारं प्राप्स्यति। ...................... पुरस्कारं तु मुख्यमन्त्री दास्यति।
6. ...................... जन्मोत्सवे बहव: जना: सम्मिलिता:।
7. ...................... बालिका अयोध्यात: समागता। ...................... नाम मीनाक्षी अस्ति।

## युष्मद्-अस्मद्-प्रयोग:

**वन्दना कस्मिंश्चित् आदर्शविद्यालये नवमकक्षायां प्रवेशम् इच्छति। सा स्वभ्रात्रा 'अनुरागेण' सह प्रधानाचार्यं मिलति।**

**वन्दना** – श्रीमन्! किम् अहम् अन्त: आगच्छानि ?

**प्रधानाचार्य:** – आम्, आगच्छ, आगच्छ।

**वन्दना** – धन्यवाद:। श्रीमन्! इदं मम प्रार्थनापत्रम्।

**प्रधानाचार्य:** – तव किं नाम?

**वन्दना** – श्रीमन्! मम नाम 'वन्दना'। पितु: नाम च श्रीधर्मेन्द्र: ।

**प्रधानाचार्य:** – त्वम् अत्र किमर्थं प्रवेशम् इच्छसि ?

**वन्दना** – अत्र संस्कृतमाध्यमेन पठितुम् इच्छामि।

**प्रधानाचार्य:** – एवम्। समक्षं भित्तौ एक: श्लोक: लिखित:, पठतु।

**वन्दना** – **सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो, मोक्षयिष्यामि मा शुच:**

**प्रधानाचार्य:** – साधु पठितम्। किं त्वया कोऽपि पुरस्कार: प्राप्त: ?

**वन्दना** – आम् श्रीमन्! मह्यं 'प्रतिभापुरस्कारं' शिक्षानिदेशक: दत्तवान्।

**प्रधानाचार्य:** – बाढम्। त्वया सह अन्य: क: आगत: ?

**वन्दना** – श्रीमन्! मया सह मम भ्राता अनुराग: आगत:। स बहि: स्थित:।

**प्रधानाचार्य:** – अस्तु गच्छ। तव प्रवेश: भविष्यति ।

क. युष्मद्-अस्मद्-शब्दयोः रूपाणि त्रिषु लिङ्गेषु समानानि भवन्ति।

अधुना संवादे रेखाङ्कितपदानि युष्मद्-अस्मद्-शब्दयोः रूपाणि सन्ति। तेषां पदानाम् अत्र बहुवचनरूपाणि लिखन्तु–

| | पदानि | बहुवचनरूपाणि | | पदानि | बहुवचनरूपाणि |
|---|---|---|---|---|---|
| यथा | अहम् | वयम् | 4. | त्वया | ............................ |
| 1. | त्वम् | ............................ | 5. | मह्यम् | ............................ |
| 2. | त्वाम् | ............................ | 6. | तव | ............................ |
| 3. | माम् | ............................ | 7. | मम | ............................ |

अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–

### युष्मद्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्/त्वा | युवाम्/वाम् | युष्मान्/ वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्/ ते | युवाभ्याम्/वाम् | युष्मभ्यम्/ वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव/ते | युवयोः/वाम् | युष्माकम्/वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

### अस्मद्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्/मा | आवाम्/नौ | अस्मान्/नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्/मे | आवाभ्याम्/नौ | अस्मभ्यम्/नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम/मे | आवयोः/नौ | अस्माकम्/नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

**ख. अधोलिखितसंवादं ''युष्मद्-अस्मद्'' शब्दरूपैः पूरयन्तु–**

(दिनकरः ग्रीष्मावकाशे स्वमातुलस्य गृहं गच्छति। तत्र मातुलस्य पुत्री निवेदिता अपि अस्ति। तदा दिनकर-निवेदितयोः मध्ये संवादः प्रचलति।)

**दिनकरः** – अयि भगिनि! अधुना कस्यां कक्षायां पठसि?

**निवेदिता** – दिनकर! अहं तु दशमकक्षायां पठामि। किं .................... अष्टमकक्षा उत्तीर्णा?

**दिनकरः** – आम् भगिनि! .................... अष्टमकक्षा प्रथमश्रेण्या उत्तीर्णा। सम्प्रति नवमकक्षायां पठामि।

**निवेदिता** – साधु साधु! वर्धापनं वर्धापनम्। तर्हि .................... किं दत्तवान् पिता।

**दिनकरः** – पिता तु .................... सङ्गणकं क्रीत्वा दत्तवान्।

**निवेदिता** – अहो सुन्दरं पारितोषिकम्। अनुज! .................... विशिष्टः गुणः कः?

**दिनकरः** – भगिनि, .................... आत्मविश्वासः एव विशिष्टः गुणः अस्ति।

**निवेदिता** – शोभनम्। अधुना माता .................... .................... च भोजनाय आह्वयति।

**दिनकरः** – अस्तु, चलावः।

## अभ्यासः

**क. उचितविकल्पेन रिक्तस्थानानि पूरयत–**

1. .............................. भार्या स्नातुं गता आसीत्।

(क) माधवः (ख) माधवम्

(ग) माधवस्य (घ) माधवाय

2. .............................. फलोद्गमैः नम्राः भवन्ति।

(क) तरवः (ख) तरुम्

(ग) तरवे (घ) तरोः

3. स्वचक्षुषा स्वदेशस्य .............................. द्रष्टुं न शक्नोमि।

(क) दुर्दशा (ख) दुर्दशाम्

(ग) दुर्दशया (घ) दुर्दशायाः

4. .............................. नाम सुदर्शनः आसीत्।

(क) भूपतिः (ख) भूपतये

(ग) भूपतेः (घ) भूपतिम्

5. किं त्वं .............................. इह प्रेषितः?

(क) पतिव्रता (ख) पतिव्रतया

(ग) पतिव्रतायाः (घ) पतिव्रतायाम्

**ख. कोष्ठकात् उचितविकल्पं चित्वा रिक्तस्थानानि पूरयत–**

1. .............................. तां कोपदृष्ट्या दृष्टवान्। (मुनिम्/मुने:/मुनि:)
2. .............................. ! न्यग्रोधफलम् आहर। (श्वेतकेतु:/श्वेतकेतो/श्वेतकेतो:)
3. .............................. वदान्यगुरवे तरवे नमोऽस्तु। (स:/तस्मै/तस्मात्)
4. .............................. ! अलं चिन्तया। (जननि/जननी/जनन्याम्)
5. पश्यतु एव ..............................। तन्तुसंयोजने व्यग्रोऽहं कथं काव्यं कुर्याम्? (भवत्/भवन्त:/भवान्)

**ग. प्रदत्तशब्दे उचितां विभक्तिं योजयित्वा रिक्तस्थानपूर्तिं कुरुत–**

1. अहं .............................. (तन्तुसंयोजन) व्यग्रः अस्मि।
2. .............................. (पर्वत) जलबिन्दवः पतन्तः सङ्गीतं जनयन्ति।
3. .............................. (अस्मद्) जीवनदृष्टेः अनुरूपमेव विज्ञानं सर्वहिताय भवेत्।
4. पण्डितलक्ष्मीधरः मम .............................. (राजभवन) वासयितव्यः।
5. एषु एकं .............................. (बीज) भिन्धि।

**अस्माभिः अधीतम्**

- सर्व, इदम्, यत्, किम्, तत् इत्यादीनां "सर्वनाम" शब्दानां रूपाणि त्रिषु लिङ्गेषु भवन्ति।
- 'सर्वनाम' शब्दानां प्रयोगः संज्ञायाः स्थाने, संज्ञायाः विशेषणरूपेण च भवति।
- 'युष्मद्-अस्मद्' शब्दयोः रूपाणि त्रिषु लिङ्गेषु समानानि भवन्ति।
- उपर्युक्तेषु सर्वनामशब्देषु सम्बोधनस्य रूपाणि न भवन्ति।

✸ ✸ ✸ ✸ ✸

## ( घ ) सङ्ख्यावाचकशब्दाः

### ( एक-द्वि-त्रि-चतुर्-पञ्चन् )

**क. अत्र चित्रं वीक्ष्य यथोदाहरणं वाक्यानि पूरयन्तु-**



यथा- एकः बालकः।
अत्र कति बालकाः?
अत्र तु एकः एव बालकः।



एका बालिका।
अत्र कति बालिकाः?
अत्र ...............................।



एकं पुस्तकम्।
अत्र कति पुस्तकानि?
अत्र एकम् एव ....................।



द्वौ वानरौ तिष्ठतः।
कौ तिष्ठतः?
.......... वानरौ ..............।



द्वे बालिके पठतः।
के पठतः?
.........................।



अत्र द्वे पुस्तके स्तः।
अत्र कति पुस्तकानि?
अत्र ........................।



त्रयः वानराः।
अत्र कति वानराः?
अत्र ..................।



तिस्रः महिलाः।
अत्र कति महिलाः?
...............................।



त्रीणि पुस्तकानि।
अत्र कति पुस्तकानि?
...............................।



चत्वारः वृक्षाः।
अत्र कति वृक्षाः?
...............................।



चतस्रः महिलाः।
अत्र कति महिलाः?
...............................।



चत्वारि कदलीफलानि।
अत्र कति कदलीफलानि?
...............................।



पञ्च मूषकाः

अत्र कति मूषकाः?

..............................।



पञ्च मार्जार्यः

अत्र कति मार्जार्यः?

..............................।



पञ्च पात्राणि

अत्र कति पात्राणि?

..............................।

**उपर्युक्तानि रेखाङ्कितपदानि सङ्ख्यावाचकानि सन्ति। एतेषां प्रयोगः संज्ञायाः विशेषणरूपेण भवति। अतः सङ्ख्यावाचकपदेषु लिङ्ग-विभक्ति-वचनानि संज्ञानुसारं भवन्ति। परम् एतत् परिवर्तनम् एकतः 'चतुर्' सङ्ख्यापर्यन्तम् एव भवति। इतः परं पञ्चन् शब्दे संज्ञानुसारं लिङ्गपरिवर्तनं न दृश्यते। एवमेव अन्येषु अपि सङ्ख्यावाचकशब्देषु बोद्धव्यम्।**

**ख. यथा 'एकः' इति पदस्य मूलशब्दः 'एक' इति अस्ति, तथैव अधोलिखितानां पदानाम् अपि मूलशब्दान् लिखन्तु।**

| | पदानि | मूलशब्दाः | | पदानि | मूलशब्दाः |
|---|---|---|---|---|---|
| 1. | एकम् | .............................. | 5. | चत्वारः | .............................. |
| 2. | द्वौ | .............................. | 6. | चत्वारि | .............................. |
| 3. | त्रयः | .............................. | 7. | चतस्रः | .............................. |
| 4. | तिस्रः | .............................. | 8. | पञ्च | .............................. |

- **अधोलिखितानि रूपाणि ध्यानेन पठत अवगच्छत स्मरत च–**

**सङ्ख्यावाची 'एक' शब्दः (नित्यमेकवचनान्तः)**

| विभक्तिः | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| **प्रथमा** | एकः | एका | एकम् |
| **द्वितीया** | एकम् | एकाम् | एकम् |
| **तृतीया** | एकेन | एकया | एकेन |
| **चतुर्थी** | एकस्मै | एकस्यै | एकस्मै |
| **पञ्चमी** | एकस्मात् | एकस्याः | एकस्मात् |
| **षष्ठी** | एकस्य | एकस्याः | एकस्य |
| **सप्तमी** | एकस्मिन् | एकस्याम् | एकस्मिन् |

## सङ्ख्यावाची 'द्वि' शब्दः ( नित्यं द्विवचनान्तः )

| विभक्तिः | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| प्रथमा | द्वौ | द्वे | द्वे |
| द्वितीया | द्वौ | द्वे | द्वे |
| तृतीया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| चतुर्थी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| पञ्चमी | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| षष्ठी | द्वयोः | द्वयोः | द्वयोः |
| सप्तमी | द्वयोः | द्वयोः | द्वयोः |

## सङ्ख्यावाची 'त्रि' शब्दः ( नित्यं बहुवचनान्तः )

| विभक्तिः | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| प्रथमा | त्रयः | तिस्रः | त्रीणि |
| द्वितीया | त्रीन् | तिस्रः | त्रीणि |
| तृतीया | त्रिभिः | तिसृभिः | त्रिभिः |
| चतुर्थी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| पञ्चमी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| षष्ठी | त्रयाणाम् | तिसृणाम् | त्रयाणाम् |
| सप्तमी | त्रिषु | तिसृषु | त्रिषु |

## सङ्ख्यावाची 'चतुर्' शब्दः ( नित्यं बहुवचनान्तः )

| विभक्तिः | पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| प्रथमा | चत्वारः | चतस्रः | चत्वारि |
| द्वितीया | चतुरः | चतस्रः | चत्वारि |
| तृतीया | चतुर्भिः | चतसृभिः | चतुर्भिः |
| चतुर्थी | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| पञ्चमी | चतुर्भ्यः | चतसृभ्यः | चतुर्भ्यः |
| षष्ठी | चतुर्णाम् | चतसृणाम् | चतुर्णाम् |
| सप्तमी | चतुर्षु | चतसृषु | चतुर्षु |

## ग. अधोलिखितानि वाक्यानि पठन्तु–

1. **एकः** छात्रः **एका** छात्रा च **एकं** पुस्तकं पठतः।
2. **द्वौ** बालकौ **एकेन** कन्दुकेन क्रीडतः।
3. **तिस्रः** बालिकाः **एकस्मिन्** उद्याने भ्रमन्ति।

घ4. अस्मिन् नगरे **चत्वारः** जलाशयाः **चत्वारि** च उद्यानानि सन्ति।

5. **चतुर्षु** महानगरेषु दिल्ली एव भारतस्य राजधानी अस्ति।
6. कालिदासजयन्तीसमारोहे कालिदासस्य **त्रयाणां** नाटकानां मञ्चनं भविष्यति।
7. अद्य अस्माकं विद्यालयस्य छात्राः **त्रिभिः** बसयानैः भ्रमणाय गमिष्यन्ति।
8. अभिवादनशीलस्य आयुः विद्या यशः बलम् इति **चत्वारि** वर्धन्ते।

◆ **उपर्युक्तानि स्थूलानि पदानि केषाञ्चित् पदानां विशेषणानि सन्ति। तानि केषां पदानां विशेषणानि इति लिखन्तु।**

| | विशेषणपदानि | विशेष्यपदानि | | विशेषणपदानि | विशेष्यपदानि |
|---|---|---|---|---|---|
| **यथा**– | एकः | छात्रः | | | |
| 1. | एका | .............................. | 7. | चत्वारः | .............................. |
| 2. | एकम् | .............................. | 8. | चत्वारि | .............................. |
| 3. | द्वौ | .............................. | 9. | चतुर्षु | .............................. |
| 4. | एकेन | .............................. | 10. | त्रयाणाम् | .............................. |
| 5. | तिस्रः | .............................. | 11. | त्रिभिः | .............................. |
| 6. | एकस्मिन् | .............................. | | | |

## घ. अधोलिखितेषु वाक्येषु कोष्ठके यः मूलशब्दः अस्ति तस्मिन् उचितविभक्तिं प्रयुज्य वाक्यपूर्तिं कुर्वन्तु।

**यथा**–नरस्य द्वौ हस्तौ भवतः। (द्वि)

1. हस्ते .............................. अङ्गुल्यः भवन्ति। (पञ्चन्)
2. वर्तमान-भूत-भविष्यत् इति .............................. कालाः भवन्ति। (त्रि)
3. मासे .............................. पक्षौ भवतः शुक्लपक्षः कृष्णपक्षः च। (द्वि)
4. वेदाः .............................. भवन्ति। (चतुर्)
5. कालिदासस्य .............................. नाटकानि सन्ति। (त्रि)

## अभ्यासः

**उचित-सङ्ख्यापदैः रिक्तस्थानानि पूरयत–**

1. भामाशाहः .................... (12) वर्षाणि यावत् .................... (25)-सहस्र-सैनिकानां पालयित्रीं सम्पत्तिं प्रतापाय समर्पयति।
2. .................... (1) चन्द्रस्तमो हन्ति, न च तारागणैरपि।
3. वरम् .................... (1) गुणी पुत्रः न च मूर्खशतान्यपि।
4. अहं भवत्पुत्रान् .................... (6) मासाभ्यन्तरे नीतिशास्त्राऽभिज्ञान् करिष्यामि।
5. तदा तस्योपरि .................... (1) बलाका विष्ठाम् उदसृजत्।
6. श्वेतकेतुः आचार्यम् उपेत्य यावत् .................... (24)-वर्षः अभवत् तावत् वेदान् अधीतवान्।
7. .................... (1) बीजं भिन्धि।
8. नालन्दाविश्वविद्यालये सप्तवर्षीयः सन् छात्रः .................... (5) विद्याः अधीतवान्।
9. नैकमार्गैः .................... (1) प्रभुं आराधयन्ति।
10. उद्याने .................... (16) आम्रवृक्षाः सन्ति।
11. महाभारतस्य युद्धम् .................... (18) दिनानि यावत् प्राचलत् ।
12. सप्ताहे .................... (7) दिवसाः भवन्ति।
13. दशरथस्य .................... (3) राज्यः आसन्।
14. .................... (88) जनाः कायक्रमे आसन्।
15. .................... (96) जनाः निमन्त्रणपत्राणि प्राप्तवन्तः।
16. .................... (24) छात्राः प्रतिस्पधार्याम् उपस्थिताः आसन्।
17. कृपया .................... (44) रूप्यकाणि यच्छतु।
18. सः .................... (75) रूप्यकाणि इष्टवान्।
19. .................... (26) छात्राः प्रतिभापुरस्कारम् अलभन्त।
20. अद्य कार्यक्रमे .................... (100) जनाः उपस्थिताः आसन्।

### अस्माभिः अधीतम्

- सङ्ख्यावाचकशब्दानां प्रयोगः विशेषणरूपेण भवति।
- एकशब्दस्य एकवचने, द्विशब्दस्य द्विवचने, त्रि-चतुर्-पञ्चन्-शब्दानां च बहुवचने एव रूपाणि भवन्ति।
- एक-द्वि-त्रि-चतुर्-शब्दानाम् रूपाणि त्रिषु लिङ्गेषु भिन्नानि भवन्ति।
- पञ्चन् इति शब्दतः त्रिषु लिङ्गेषु समानरूपाणां प्रयोगः भवति।

# चतुर्थः अभ्यासः

# धातुरूपाणां प्रयोगः

## ( क ) लट्लकारः ( वर्तमानकालः )

### ( कालपरिचयः )

**प्रारब्धः अपरिसमाप्तश्च कालः वर्तमानकालः**

**अधोलिखितवाक्येषु क्रियापदानि रेखाङ्कितानि कुरुत–**

**यथा–** **बालकः <u>पठति</u>।** **छात्राः <u>उपविशन्ति</u>।**

1. सीता नृत्यति।
2. कोकिलः गायति।
3. मयूराः नृत्यन्ति।
4. हंसः तरति।
5. वानराः कूर्दन्ति।
6. भवती वार्तालापं करोति।
7. आवां देशं रक्षावः।
8. वयं मित्रं स्मरामः।
9. यूयं किं लिखथ?
10. सा क्षीरं पचति।

किम् अत्र क्रिया प्रारब्धा? आम्/नैव ..................................................

किम् अत्र क्रिया समाप्ता? आम्/नैव ..................................................

**अत्र क्रिया प्रारब्धा न तु समाप्ता। अतः अत्र क्रिया वर्तमानकाले प्रयुक्ता। वर्तमानकालः 'लट्' इत्यपि ज्ञायते।**

**अधोलिखितरेखाचित्रं पूरयत–**

धातुनां द्वे पदे
- परस्मैपदम्
- आत्मनेपदम्

प्रत्येकं लकारे त्रयः पुरुषाः
- प्रथमः/अन्यः
- ..................................................
- ..................................................

प्रत्येकं पुरुषे त्रीणि वचनानि
- ..................................................
- द्विवचनम्
- ..................................................

# लट्लकारस्य नव रूपाणि

## अधोलिखितां तालिकां पश्यत–

| पुरुषाः | कर्तृपदम् | वचनम् | रूपाणि | |
|---|---|---|---|---|
| | संज्ञा/सर्वनाम | | परस्मैपदी | आत्मनेपदी |
| प्रथमपुरुषः/<br>अन्यपुरुषः | बालकः/सः/सा/तत्<br>बालकौ/तौ/ते/ते<br>बालकाः/ते/ताः/तानि | एकवचने<br>द्विवचने<br>बहुवचने | पठति<br>पठतः<br>पठन्ति | लभते<br>लभेते<br>लभन्ते |
| मध्यमपुरुषः | त्वम्<br>युवाम्<br>यूयम् | एकवचने<br>द्विवचने<br>बहुवचने | पठसि<br>पठथः<br>पठथ | लभसे<br>लभेथे<br>लभध्वे |
| उत्तमपुरुषः | अहम्<br>आवाम्<br>वयम् | एकवचने<br>द्विवचने<br>बहुवचने | पठामि<br>पठावः<br>पठामः | लभे<br>लभावहे<br>लभामहे |

## कर्तृपदानां समुचितवाक्यांशैः सह मेलनं कुरुत–

| | क | ख |
|---|---|---|
| 1. | गावः | किं वार्तालापं कुर्वन्ति? |
| 2. | हरिणाः | इतस्ततः वृथा भ्रमन्ति। |
| 3. | वृक्षाः | गीतं शृण्वन्ति। |
| 4. | ते (स्त्री.) | रुग्णान् परिचरथः। |
| 5. | तानि मित्राणि | ओषजनं यच्छन्ति। |
| 6. | अहम् | संस्कृतं पठसि। |
| 7. | वयम् | दुग्धं यच्छन्ति। |
| 8. | त्वम् | कन्दुकेन क्रीडामि। |
| 9. | युवाम् | परहितं कुरुतः। |
| 10. | भवन्तः | ईश्वरं स्मरामः। |

**यः यस्य स्वभावः तत् ज्ञापयितुमपि लट् लकारस्य प्रयोगः भवति।**

**'क' स्तम्भस्य कर्तृपदानि 'ख' स्तम्भस्य क्रियापदैः सह मेलयत।**

| | क | ख |
|---|---|---|
| 1. | नद्यः | विनश्यति। |
| 2. | मेघः | द्विषन्ति। |
| 3. | मन्दाः | वहन्ति। |
| 4. | दीर्घसूत्री | दीव्यति। |
| 5. | विद्युत् | गर्जति। |

किम् अत्र क्रिया इदानीम् एव प्रारब्धा? नैव परन्तु सः तु तस्य स्वभावः। अतः लट्लकारः।

**वर्तमानस्य समीपस्थं भविष्यत् काले भूतकालं च बोधयितुम् अपि लट् लकारः (सम्प्रति गच्छामि)**

| | | |
|---|---|---|
| **भविष्यत्-** | कदा गमिष्यसि? | एष गच्छामि। |
| | किं जलम् आनेष्यसि? | एष आनयामि। |
| **भूतकालं-** | कदा आगतोऽसि? | एष आगच्छामि |
| | कदा आनीतानि एतानि फलानि? | एष आनयामि। |

**अधोलिखितवार्तालापं पूरयत-**

1. कदा वस्त्राणि वितरिष्यसि? एष ........................................................।
2. कदा बालकेभ्यः भोजनं दास्यसि? एष ........................................................।
3. कदा विद्यालयं गमिष्यसि? एष ........................................................।
4. कदा माता शिशवे गीतं गास्यति? एषा ........................................................।
5. कदा छात्राः प्रार्थनां करिष्यन्ति? एते ........................................................।

**यत् कार्यं प्रत्यहं/पुनः पुनः वा क्रियते तत्रापि लट्लकारः।**

**यथा** - मृगः प्रतिदिनं क्षेत्रं प्रविश्य शस्यं खादति।

**अत्र क्रियायाः प्रतिदिनं पुनरावृत्तिः अस्ति। अतः लट्लकारस्य प्रयोगः।**

**अधोलिखितकथांशे लट्लकारस्य क्रियापदानि रेखाङ्कितानि कुरुत-**

एकस्मिन् कोटरे एकः वृद्धः गृध्रः प्रतिवसति। पक्षिणः तज्जीवनाय स्वाहारात् तस्मै किञ्चिद् भोजनं ददति। तेन असौ जीवति, प्रतिदिनञ्च पक्षिशावकानां रक्षणं करोति। एकदा एकः मार्जारः तत्र प्रविशति। स गृध्रं प्रसादयति। पक्षिशावकान् आक्रम्य कोटरमानीय प्रत्यहं खादति।

**एका छात्रा स्वमातुः दिनचर्यां सचित्रं वर्णयति। सा रूपाणि न जानाति अतः केवलं तत्र धातून् लिखति। किं भवन्तः/भवत्यः तस्याः सहायतां करिष्यन्ति?**




मम माता प्रातः पञ्चवादने .............................. (उत्तिष्ठ्)।

सा मदर्थं पाकशालायां भोजनं .............................. (पच्)।

सा विद्यालये छात्रान् .............................. (शिक्षय्)।



मध्याह्ने सा दूरदर्शने संस्कृतवार्ताः .............................. (श्रु)।



सायङ्काले सा आपणात् फलानि .............................. (आनय्)।



यदा कदा सा वस्त्राणि अपि .............................. (सीव्)।



रात्रौ सर्वैः सह भोजनं .............................. (कृ)।



ततः सा पित्रा मया च सह भ्रमणाय .............................. (गम्)।

दशवादने सा .............................. (स्वप्)।

मम माता मयि अत्यन्तं .............................. (स्निह्)।

**यावत् अव्ययस्य योगेऽपि लट् लकारः**

**अधोलिखितवाक्यद्वयं पठित्वा वर्तमानकालिकं क्रियापदं परिचिनुत–**

1. यावदहमागच्छामि तावत् अत्रैव प्रतीक्षस्व। ..............................
2. आर्य! धारय एतत् चित्रं यावदागच्छामि। ..............................

**अतः यस्य उपवाक्यस्य प्रारम्भः यावत् अव्ययेन भवति तस्मिन् लट् लकारः एव प्रयुज्यते।**

**अधोलिखितवाक्येषु वर्तमानकालिकक्रियापदानि रेखाङ्कितानि कुरुत–**

1. यावत् सिंहः त्वां पश्यति तावत् दूरमपसर।
2. यावत् मत्स्यजीविनः आगच्छन्ति तावत् इतः अन्यत्र गच्छत।
3. यावत् राजपुत्रः कनकसूत्रम् अवतारयति तावत् त्वं तत् उत्थाप्य अत्र आनय।
4. यावद् असौ सरः स्नातुं प्रविशति तावदेव महापङ्के निमग्नः जातः।
5. यावदेव स्वपिति तावदेव मूषकाः आरुह्य अन्नं खादितुं प्रारब्धवन्तः।
6. यावदेव मार्जारः प्रविशति सर्वे मूषकाः पालयिताः।

## 'यदि एवं भवति' इत्यादि उपवाक्येषु अपि लट् लकारः

### अधोलिखितवाक्येषु वर्तमानकालिकक्रियापदानि चित्वा लिखत–

यथा– वृष्टिः भवति चेत् बीजानि वपतु। भवति

1. यदि रेलयानं समये आगच्छति तर्हि अहं दिने एव तत्र प्राप्स्यामि। ..........................
2. यदि शयित्वा पठसि तर्हि शीघ्रं स्वप्स्यसि। ..........................
3. मिष्ठान्नं यच्छसि चेत् शुभसमाचारं वक्ष्यामि। ..........................
4. सूर्यः उदेति चेत् वस्त्राणि क्षालयिष्यामि। ..........................
5. मेघाः गर्जन्ति चेत् मयूराः नर्तिष्यन्ति। ..........................

## वर्तमानकाले (लट्) आत्मनेपदम्

### अधोलिखिततालिकां पठत–

| अ | आ | इ | | |
|---|---|---|---|---|
| परस्मैपदम् | आत्मनेपदम् | उभयपदम् | | |
| गच्छति | सेवते | चिन्तयति | – | चिन्तयते |
| पठति | लभते | हरति | – | हरते |
| स्मरति | वन्दते | भजति | – | भजते |
| दीव्यति | रोचते | याचति | – | याचते |
| हन्ति | वर्धते | करोति | – | कुरुते |
| पृच्छति | मोदते | ददाति | – | दत्ते |

**केचन धातवः पदस्मैपदिनः, केचन च आत्मनेपदिनः, केचन च उभयपदिनः भवन्ति। एषां व्यवस्था तु प्रयोगाधीना।**

### अधोलिखितसम्भाषणे आत्मनेपदि - क्रियापदानि रेखाङ्कितानि कुरुत–

**दिवाकरः** – भो तपन! नमस्ते। कथं विद्यालयं न आगतः?
**तपनः** – मम पितामहः ज्वरपीडितः। अहं तं सेवे।
**पितामहः** – भो तपन! कोऽस्ति?
**तपनः** – मम मित्रं दिवाकरः।
**दिवाकरः** – पितामह! वन्दे।
**पितामहः** – चिरं जीव। मम ज्वरः वर्धते। शिरोवेदना अपि तीव्रा वर्तते।
**दिवाकरः** – तपन! त्वम् अत्रैव तिष्ठ यावत् वैद्यम् आनयामि।
**पितामहः** – चिरं जीवतम्। ये बालाः वृद्धान् सेवन्ते ते सदा शोभन्ते यशः च लभन्ते।

### कर्मवाच्ये सर्वत्र आत्मनेपदम्

**अधोलिखितवाक्यानि पठत-**

| | |
|---|---|
| अहं गृहं गच्छामि। | मया गृहं गम्यते। |
| सा गीतां पठति। | तया गीता पठ्यते। |
| अहं भोजनं करोमि। | मया भोजनं क्रियते। |

**अधोलिखितवार्तालापे आत्मनेपदि - क्रियापदानि रेखाङ्कितानि कुरुत-**

रामः - भो कृष्ण! किं गृहं गम्यते?

कृष्णः - आम्, गच्छामि ननु। किं त्वया न आगम्यते?

रामः - नैव अहं तु अद्य पितृव्यगृहं गच्छामि।

कृष्णः - किं पुस्तकानि अपि तत्रैव नीयन्ते?

रामः - आम्, रात्रौ गृहकार्यं करिष्यामि।

कृष्णः - किं लतया अपि न आगम्यते?

रामः - नहि नहि! एषा आगच्छति एव। अनया तु भवता सह एव गम्यते।

### अस्माभिः अधीतम्

- प्रारब्धः अपरिसमाप्तश्च कालः वर्तमानकालः।
- वर्तमानकालार्थे लट् प्रयुज्यते।
- धातूनां द्वे पदे - परस्मैपदम्, आत्मनेपदम्।
- लकारे त्रयः पुरुषाः - प्रथमः, मध्यमः, उत्तमश्च।
- पुरुषे त्रीणि वचनानि - एकवचनम् द्विवचनम्, बहुवचनम्।
- केचन धातवः परस्मैपदिनः/आत्मनेपदिनः/उभयपदिनः वा भवन्ति।
- कर्मवाच्ये केवलम् आत्मनेपदमेव प्रयुज्यते।
- सत्यस्वभावं ज्ञापयितुं लट् लकारः
- वर्तमानसमीपस्थं भविष्यत् भूतं च बोधयितुं लट् लकारः।
- प्रत्यहं / पुनः पुनः क्रियासम्पादने लट्लकारः।
- 'यावत्' अव्ययेन प्रारब्धे उपवाक्ये लट्लकारः।
- 'यदि' इति अव्ययेन प्रारब्धे उपवाक्ये लट्लकारः।

* * * * *

## ( ख ) लङ्लकारः ( भूतकालः )

**सामान्यतया भूतकालार्थे लङ्लकारः**

**अधोलिखितवाक्यानि पठत–**

आसीत् राजा नलो नाम। बालः ह्यः मातुलगृहमच्छत्। अहम् एकदा वने चरन् अपश्यम्। एषु क्रिया कदा जाता पूर्व/श्वः? नूनं क्रिया पूर्वमेव सम्पन्ना।

**क्रियापदनिर्माणे 'अ' वर्णस्य योगः।**

| वर्तमानकाले | भूतकाले | वर्तमानकाले | भूतकाले |
|---|---|---|---|
| गच्छति (अ+गम्+अत्) | अगच्छत् | पठति | अपठत् |
| स्मरति | अस्मरत् | पिबति | अपिबत् |

| पुरुषाः | कर्तृपदम् | वचनम् | रूपाणि |
|---|---|---|---|
| प्रथमपुरुषः/ अन्यपुरुषः | संज्ञा/सर्वनाम<br>बालकः/सः/एषः/कः?<br>बालिका/सा/एषा/का?<br>मित्रम्/तत्/एतत्/किम्? | एकवचनम् | अपठत् |
| | बालकौ/तौ/एतौ/कौ?<br>बालिके/ते/एते/के?<br>मित्रे/ते/एते/के? | द्विवचनम् | अपठताम् |
| | बालकाः/ते/एते/के?<br>बालिकाः/ताः/एताः/काः?<br>मित्राणि/तानि/एतानि/कानि? | बहुवचनम् | अपठन् |
| मध्यमपुरुषः | त्वम् | एकवचनम् | अपठः |
| | युवाम् | द्विवचनम् | अपठतम् |
| | यूयम् | बहुवचनम् | अपठत |
| उत्तमपुरुषः | अहम् | एकवचनम् | अपठम् |
| | आवाम् | द्विवचनम् | अपठाव |
| | वयम् | बहुवचनम् | अपठाम |

## एषु किं परिवर्तनं जातम्?

- क्रियापदे पूर्वं किं योजितम्?
- वयं पश्यामः यत् भूतकाले धातुभ्यः पूर्वम् 'अ' योज्यते।

| | |
|---|---|
| गच्छति | = अ + गच्छत् = अगच्छत् |
| पठति | = अ + पठत् = अपठत् |
| स्मरति | = अ+ स्मरत् = अस्मरत् |

एवमात्मनेपदे पश्यामः

| | |
|---|---|
| सेवते | = असेवत |
| याचते | = अयाचत |
| कुरुते | = अकुरुत |

- **अधोलिखितक्रियापदेषु आत्मपनेपदे लङ्लकारस्य क्रियापदानि रेखाङ्कितानि कुरुत–**

अचिन्तयत्, अचिन्तयत, अपालयत्, अपालयत, अनयत् अनयत, अवर्तत, अलभत, असेवत, अमोदत।

**उपसर्गयोजनात् पूर्वमेव धातुना सह 'अ' योजनीयः सम्भाव्यः सन्धिरपि करणीयः**

लङ्लकारे धातुभिः सह उपसर्गप्रयोगसमये अवधातव्यं यत् **उपसर्गः + अ + धातुः** भवति।

यथा – उप + अ + विश् = उपाविशत् उत् + अ + पत् = उदपतत् प्र + अ + नम् = प्राणमत्

### क. कोष्ठके दत्तैः सोपसर्गैः धातुभिः रिक्तस्थानानि पूरयत–

1. खगाः जालमादाय आकाशे .......................... (उत् + पत्)।
2. एकदा एकः कृष्णः सर्पः कोटरे .......................... (प्र + विश्)।
3. सः .......................... (प्रति + वद्) नाहं गर्वं करोमि इति।
4. बुद्धः सर्वं परहिताय .......................... (उत् + सृज्)।
5. सः सर्वत्र धर्मप्रचाराय .......................... (वि + हृ)।

### ख. एतत् सम्भाषणं पठित्वा रेखाङ्कित-क्रियापदानि अधोनिर्दिष्टेषु स्तम्भेषु वर्गीकृत्य लिखत–

**गीता** – ह्यः त्वं किमर्थं विद्यालयं न आगच्छः?
**माला** – ह्यः अहं मातुल-गृहम् अगच्छम्।
**गीता** – त्वया सह के के अगच्छन्?
**माला** – सर्वे कुटुम्बसदस्याः एव अगच्छन्।
**गीता** – किं तत्र विशेषकार्यक्रमः आसीत्?
**माला** – तत्र गृह-प्रवेशोत्सवः आसीत्। अतः वयं सर्वे तत्र अगच्छाम।
**गीता** – त्वं तत्र किं किम् अकरोः?
**माला** – मम माता यद् यद् आदिशत् तत् तद् अहम् अकरवम्।
**गीता** – तव माता भगिनी च किं किम् अकुरुताम्?
**माला** – ते अतिथीन् अभ्यवादयताम् सर्वान् च मिलित्वा प्रासीदताम्।

| | क्रियापदम् | उपसर्गः | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|---|
| **यथा**– | आगच्छः | आ | गम् | लङ् | मध्यमः | एकवचनम् |
| | .................... | .................... | .................... | .................... | .................... | .................... |
| | .................... | .................... | .................... | .................... | .................... | .................... |
| | .................... | .................... | .................... | .................... | .................... | .................... |
| | .................... | .................... | .................... | .................... | .................... | .................... |
| | .................... | .................... | .................... | .................... | .................... | .................... |
| | .................... | .................... | .................... | .................... | .................... | .................... |
| | .................... | .................... | .................... | .................... | .................... | .................... |
| | .................... | .................... | .................... | .................... | .................... | .................... |
| | .................... | .................... | .................... | .................... | .................... | .................... |

**ग. कोष्ठके प्रदत्तानां धातूनां प्रयोगं कृत्वा रिक्तस्थानं पूरयत–**









दक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् आसीत्। तस्य समीपे एकः महान् वटवृक्षः .................... (अस्)। तत्र चित्रग्रीवनामकः कपोतराजः सकुटुम्बः निवसति स्म। एकदा जालतण्डुलहस्तः एकः व्याधः तत्र .................... (आ + गम्) वृक्षस्य अधः जालं ................ (प्र+सारय्)। उपरि च तण्डुलान् .............. (क्षिप्) स्वयमेव समीपे गत्वा निभृतः .................... (स्था)। ततः कपोतशावकाः तण्डुलान् ............. (दृश्)। तान् भक्षयितुम् उद्यताः जाले एव बद्धाः .................. (भू)। चित्रग्रीवः स्वपरिवारं बद्धं दृष्ट्वा ................ (वद्) अहो, न भेतव्यम्। यूयं सर्वे मिलित्वा पाशं नीत्वा उत्पतत। तदा सपाशजालाः कपोताः ............... (उत् + पत्)। तस्य वनस्य एकस्मिन् भूभागे चित्रग्रीवस्य सुहृद् हिरण्यकः .................. (वस्।) चित्रग्रीवः कपोतैः सह तस्य बिलसमीपे .................... (अव+तृ) हिरण्यकः तेषां पाशम् .................... (कृन्त्)। एवं ते कपोताः पुनः मुक्ताः।



विशेषः – वर्तमानकालिकक्रियापदे 'स्म' योजनेन अपि भूतकालिकक्रिया भवति यथा वसति – वसति स्म, करोति – करोति स्म।

## मिश्रितप्रश्नाः

**क. एतेषां वाक्यानां वर्तमानकालतः भूतकाले परिवर्तनं कुरुत–**

| | | |
|---|---|---|
| शिष्यः गुरुं नमति। | अनमत्। | शिष्यः गुरुम् अनमत्। |
| त्वं कार्यं करोषि। | अकरोः। | त्वं कार्यम् अकरोः। |

1. शिक्षकः असत्यवादिने छात्राय क्रुध्यति। ............................................................।
2. बालाः नीतिशास्त्रं शृण्वन्ति। ............................................................।
3. पितरौ स्नेहेन पुत्रस्य अङ्गानि स्पृशतः। ............................................................।

**ख. एतेषां वाक्यानां भूतकालतः वर्तमानकाले परिवर्तनं कुरुत–**

यूयं स्वकार्यम् अकुरुत। यूयं स्वकार्यं कुरुथ।

1. वयं कलमेन सुन्दरं लेखम् अलिखाम। ............................................................।
2. आवां नित्यं पाठम् अस्मराव। ............................................................।
3. अहं मात्रा सह मातुल-गृहम् अगच्छम्। ............................................................।
4. शिष्यः गुरुं प्रश्नान् अपृच्छत्। ............................................................।

### अस्माभिः अधीतम्

- भूतकालार्थे लङ्
- लङ्लकारे पदनिर्माणे 'अ' योज्यते।
- उपसर्गात् अनन्तरम् 'अ' योजनीयः।
- लङ्लकारे अपि द्वे पदे परस्मैपदम् आत्मनेपदं च।
- लङ्लकारे प्रत्येकं पदे नवरूपाणि भवन्ति।

## ( ग ) लृट्लकार: ( भविष्यत्काल: )

| पुरुषाः | वचनानि | कर्तृपदानि | रूपाणि | |
|---|---|---|---|---|
| प्रथमपुरुष:/ अन्यपुरुष: | एकवचनम् | बालक:/स:/एष:/क:?<br>बालिका/सा/एषा/का?<br>मित्रम्/तत्/एतत्/किम्? | गमिष्यति | सेविष्यते |
| | द्विवचनम् | बालकौ/तौ/एतौ/कौ?<br>बालिके/ते/एते/के?<br>मित्रे/ते/एते/के? | गमिष्यत: | सेविष्येते |
| | बहुवचनम् | बालका:/ते/एते/के?<br>बालिका:/ता:/एता:/का:?<br>मित्राणि/तानि/एतानि/कानि? | गमिष्यन्ति | सेविष्यन्ते |
| मध्यमपुरुष: | एकवचनम् | त्वम् | गमिष्यसि | सेविष्यसे |
| | द्विवचनम् | युवाम् | गमिष्यथ: | सेविष्येथे |
| | बहुवचनम् | यूयम् | गमिष्यथ | सेविष्यध्वे |
| उत्तमपुरुष: | एकवचनम् | अहम् | गमिष्यामि | सेविष्ये |
| | द्विवचनम् | आवाम् | गमिष्याव: | सेविष्यावहे |
| | बहुवचनम् | वयम् | गमिष्याम: | सेविष्यामहे |

या क्रिया आगामिनि काले सम्भाविता तत्र लृट्लकार:।

- **अधोलिखितानि वाक्यानि पठत अवगच्छत च।**

मम पिता अद्य आगत:, स: श्व: गमिष्यति।

अद्य सोमवासर:, श्व: मङ्गलवासर: भविष्यति।

श्व: मम विद्यालये उत्सव:, अहं पारितोषिकं लप्स्ये।

- **उपरिलिखितवाक्येषु रेखाङ्कितपदानां वर्तमाने स्वरूपं दृष्ट्वा परिवर्तनम् अवगच्छत–**

| लृट्लकार: | लट्लकार: |
|---|---|
| गमिष्यति | गच्छति |
| भविष्यति | भवति/अस्ति |
| करिष्यामि | करोमि |
| लप्स्ये | लभे |

- **क्रियापदनिर्माणम्-**
  - भविष्यत्काले वर्तमानकालवत् एव प्रत्यया: भवन्ति।
  - धातो: प्रत्ययस्य च मध्ये 'स्य' योज्यते।
  - केचन धातव: सेट् भवन्ति। तत्र 'स्य' विकरणात् पूर्वम् 'इ' योज्यते। गम्+इ+स्य+ति। इकारात् परं स् - ष् भवति। गमिष्यति।
  - केचन धातव: अनिट् भवन्ति। तत्र 'स्य' विकरणात् पूर्वम् 'इ' न योज्यते। लभ् + स्य + ते = लप्स्यते।
- **एतत् सम्भाषणं पठत–**

**पुत्री** – पित:! भवान् कथितवान् यत् यदि अहं कक्षायां प्रथमस्थानं लभे तर्हि भवान् मां पर्वतीयस्थानं नेष्यति। अधुना मां भवान् ग्रीष्मावकाशे कुत्र नेष्यति?

**पिता** – अहं हिमाचले मनाली-प्रदेशे नेष्यामि।

**पुत्री** – वयं कदा गमिष्याम:?

**पिता** – सोमवासरे वयम् अष्टवादने गृहत: प्रस्थानं करिष्याम: तदा नववादने रेलयानेन प्रचलिष्याम:।



*हिडिम्बामन्दिरम्*

**पुत्री** – मनाली-प्रदेशे वयं कुत्र निवत्स्याम:?

**माता** – वत्से! किमर्थं चिन्तयसि? तत्र बहव: यात्रिनिवासा: सन्ति। कुत्रापि स्थास्याम:।

**पुत्री** – वयं तत्र किं किं द्रक्ष्याम:?

**पिता** – मनाली-प्रदेशे बहूनि दर्शनीयानि स्थानानि सन्ति, किन्तु समयाभावात् वयं विशेष-रूपेण हिडिम्बा-मन्दिरम्, वसिष्ठकुण्डम्, रोहताङ्गदर्रम् एव द्रक्ष्याम:।

**पुत्री** – हिडिम्बामन्दिरस्य का विशेषता?

**पिता** – पुत्रि! हिडिम्बा कुल्लुप्रदेशस्य कुलदेवी।



*वसिष्ठकुण्ड:*

**पुत्र:** – वसिष्ठकुण्ड: कीदृश:?

**पिता** – पुत्र! एतत् प्राकृतिक-उष्ण-जलस्रोत:। तत्र निर्मिते कुण्डे यदि स्नानं करोषि तदा विश्रान्त: भविष्यसि निरामय: अपि वर्तिष्यसे।

**पुत्र:** – रोहताङ्गदर्रस्य का विशेषता?

**पिता** – वत्स! पूर्ण-हिमाच्छादित: अयं दर्र:। काष्ठनिर्मितशकटेन तत्र सञ्चरिष्याम:।

**पुत्री** – अहो! अस्माकम् इयं यात्रा तु अविस्मरणीया एव भविष्यति।




*रोहताङ्गदर्र:*

◆ सम्भाषणे रेखाङ्कितानि क्रियापदानि चित्वा अधोलिखितस्तम्भेषु लिखत–

| | क्रियापदम् | धातुः | पुरुषः | वचनम् |
|---|---|---|---|---|
| यथा– | नेष्यति | नी | प्रथमः | एकवचनम् |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |
| | ........................... | ........................... | ........................... | ........................... |

◆ भवता/भवत्या श्वः करणीयानि कार्याणि दैनन्दिन्यां लिखितानि। तानि पूर्णवाक्येषु लृट्लकारे लिखत–

कार्याणि

| | | |
|---|---|---|
| यथा– | भगिनीं प्रति पत्रलेखनम्। | श्वः अहं भगिनीं प्रति पत्रं लेखिष्यामि। |
| 1. | भिक्षुकेभ्यः वस्त्रदानम्। | ...................................................... |
| 2. | चिकित्सालये वैद्यसमीपगमनम्। | ...................................................... |
| 3. | मित्रस्य जन्मदिवसे तस्य गृहं प्रति गमनम्। | ...................................................... |
| 4. | सायङ्काले आमलकरसपानम्। | ...................................................... |
| 5. | रात्रौ शयनकाले ईश्वरस्मरणम्। | ...................................................... |

◆ अत्र प्रथमपुरुषे प्रदत्तानां क्रियापदानां स्थाने मध्यमपुरुषस्य क्रियापदानि लिखत–

| | धातुः | प्रथमपुरुषे | मध्यमपुरुषे |
|---|---|---|---|
| यथा– | पा | पास्यति | पास्यसि |
| 1. | दृश् | द्रक्ष्यतः | ........................ |
| 2. | श्रु | श्रोष्यति | ........................ |
| 3. | प्रच्छ् | प्रक्ष्यन्ति | ........................ |
| 4. | लिख् | लेखिष्यतः | ........................ |
| 5. | त्यज् | त्यक्ष्यन्ति | ........................ |
| 6. | स्मृ | स्मरिष्यति | ........................ |

◆ उत्तमपुरुषे प्रदत्तानां क्रियापदानां वचनपरिवर्तनं कुरुत–

| | धातुः | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|---|
| यथा– | गम् | गमिष्यामि | गमिष्यावः | गमिष्यामः |
| 1. | दा | दास्यामि | ........................ | ........................ |
| 2. | उत्+स्था | उत्थास्यामि | ........................ | ........................ |
| 3. | क्रीड् | क्रीडिष्यामि | ........................ | ........................ |
| 4. | पठ् | पठिष्यामि | ........................ | ........................ |
| 5. | कृ | करिष्यामि | ........................ | ........................ |

## मिश्रितप्रश्नाः

क. अधोलिखितानां क्रियापदानां कालपरिवर्तनं कृत्वा रिक्तस्थानानि पूरयत –

कालपरिवर्तनम्

| | वर्तमाने | भूतकाले | भविष्यत्काले |
|---|---|---|---|
| 1. | पिबति | ........................ | ........................ |
| 2. | ........................ | अपश्यत् | ........................ |
| 3. | ........................ | ........................ | स्मरिष्यसि |

| | | | |
|---|---|---|---|
| 4. | लिखामि | ............................ | ............................ |
| 5. | ............................ | ............................ | गमिष्याम: |
| 6. | ............................ | आनयतम् | ............................ |
| 7. | वसाव: | ............................ | ............................ |

**ख. अधोलिखितेभ्य: पद्येभ्य: क्रियापदानि चित्वा वर्तमानकालिकानि 'क' स्तम्भे, भविष्यत्कालिकानि च 'ख' स्तम्भे लिखत–**

अन्नेन सदृशं दानं न भूतो न भविष्यति।
तस्मादन्नं विशेषेण दातुमिच्छन्ति मानवा:।।१।।
क्षमा शस्त्रं करे यस्य दुर्जन: किं करिष्यति।
अतृणे पतितो वह्नि: स्वयमेवोपशाम्यति।।२।।
न कश्चिदपि जानाति किं कस्य श्वो भविष्यति।
अत: श्व: करणीयानि कुर्यादद्यैव बुद्धिमान्।।३।।

| क | ख |
|---|---|
| **वर्तमानकाले** | **भविष्यत्काले** |
| ............................ | ............................ |
| ............................ | ............................ |
| ............................ | ............................ |

## अस्माभि: अधीतम्

- या क्रिया आगामिनी काले सम्भाविता तत्र लृट्।
- लृट्लकारस्य प्रत्यया: वर्तमानवत् एव सन्ति।
- धातु-प्रत्यय-मध्ये 'स्य' विकरणं योज्यते।
- सेट् धातूनां मध्ये 'इ' अपि योज्यते।
- इकारात्परं स् – ष् भवति। गमिष्यति, पठिष्यति।
- अनिट् धातूनां मध्ये 'इ' न योज्यते।
- 'स्' स्थाने 'ष्' अपि न भवति।

## ( घ ) लोट्लकारः ( आदेशार्थे )

| पुरुषाः | वचनानि | कर्तृपदानि | रूपाणि | |
|---|---|---|---|---|
| | | | **परस्मैपदिनः** | **आत्मनेपदिनः** |
| प्रथमपुरुषः/ अन्यपुरुषः | एकवचनम् | बालकः/सः/एषः/कः?<br>बालिका/सा/एषा/का?<br>मित्रम्/तत्/एतत्/किम्? | गच्छतु | सेवताम् |
| | द्विवचनम् | बालकौ/तौ/एतौ/कौ?<br>बालिके/ते/एते/के?<br>मित्रे/ते/एते/के? | गच्छताम् | सेवेताम् |
| | बहुवचनम् | बालकाः/ते/एते/के?<br>बालिकाः/ताः/एताः/का?<br>मित्राणि/तानि/एतानि/कानि? | गच्छन्तु | सेवन्ताम् |
| मध्यमपुरुषः | एकवचनम् | त्वम् | गच्छ | सेवस्व |
| | द्विवचनम् | युवाम् | गच्छतम् | सेवेथाम् |
| | बहुवचनम् | यूयम् | गच्छत | सेवध्वम् |
| उत्तमपुरुषः | एकवचनम् | अहम् | गच्छानि | सेवै |
| | द्विवचनम् | आवाम् | गच्छाव | सेवावहै |
| | बहुवचनम् | वयम् | गच्छाम | सेवामहै |

## आज्ञार्थे लोट् लकारः

- **अधोलिखितवाक्यानि पठत–**
  - **श्रणुत** रे छात्राः!
  - **आह्वयन्तु** सर्वान् नृपान्।
  - **आनयतु** तं दूतम्।
  - भो भटवः! **नयत** एनमश्वम्।

अत्र रेखाङ्कितपदेषु सर्वत्र आदेशः दीयते। यत्र आदेशस्य अभिप्रायः तत्र लोट्लकारः।

- **अधोलिखितेषु वाक्येषु लोट्लकारे प्रयुक्तानि क्रियापदानि रेखाङ्कितानि कुरुत–**

छात्राः! उत्तिष्ठत। उपविशत।

हस्तौ उपरि कुरुत। हस्तौ अधः कुरुत।

दक्षिणेन हस्तेन वामं कर्णं स्पृशत।

वामेन हस्तेन दक्षिणं कर्णं स्पृशत।

हस्तौ अधः कुरुत। उच्चैः हसत।

हस्तौ शिरसि स्थापयत।

## निमन्त्रणामन्त्रणार्थे लोट् लकारः

अद्य भवान् मम गृहे भोजनं करोतु।

आगच्छ। सह एव खेलं पश्याव।

भो दूत! एतदासनम् उपविश।

- **अधोलिखिते पद्ये लोट्लकारे प्रयुक्तानि क्रियापदानि रेखाङ्कितानि कुरुत–**

निन्दतु नीतिनिपुणाः यदि वा स्तुवन्तु<br>
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।<br>
अद्यैव वा मरणमस्तु युगान्तरे वा<br>
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥

- **अधोलिखितेषु वाक्येषु लोट्लकारे प्रयुक्तानि क्रियापदानि रेखाङ्कितानि कुरुत–**

माम् अस्याः विपदः रक्षतु भवान्। त्यज दुर्जनसंसर्गम्। भज साधुसमागमम्। त्राहि माम्, त्राहि माम्। जयतु जयतु देवः।

- **प्रदत्तक्रियापदैः रिक्तस्थानानि पूरयत–**

क्रियापदानि – | गच्छतु, रक्ष, देहि, ब्रूहि, सेवस्व, अनुयाहि, उद्धर |

1. मां सङ्कटेभ्यः ..........................।
2. हा प्रियसखि! .......................... मे प्रतिवचनम्।
3. राम! माम् ..........................।
4. सीता स्वयं .......................... भरतम् आनेतुम्।
5. सत्यं .......................... .......................... साधुपदवीम् .......................... विद्वज्जनम्।

## आशीर्वादार्थे लोट् लकारः

**गच्छ**, विजयी **भव**। शिवाः **सन्तु** ते पन्थानः। सदारपुत्रः राजपुत्रः **जीवतु**। आयुष्मान् **भव**। चिरं **जीव**। **गच्छतु** भवान् पुनर्दशनाय। यशस्वी **भव**। कमपि शुभकामनासन्देशमाधारीकृत्य निजम् अनुजं प्रति एकं वर्धापनपत्रम् (Greeting Card) रचय।




## प्रश्ने सामर्थ्ये च लोट् लकारः

किं भूयः ते प्रियं करवाणि?

किम् अन्यत् ते ददानि?

सिन्धुमपि शोषयाणि। (शोषयितुं समर्थः)

- **प्रदत्तक्रियापदैः रिक्तस्थानपूर्तिं कुरुत –**

(आनयानि, लिखानि, प्रोक्षाणि, प्रविशानि)।

1. आचार्ये! किमहं बहिः **गच्छानि**?
2. आचार्ये! किमहं ........................................................?
3. किमहं जलम् ........................................................?
4. आचार्ये किमहं सुधाखण्डेन ........................................................?
5. आचार्ये! किमहं श्यामपट्टं ........................................................?

## मिश्रितप्रश्नाः

**क. अस्मिन् सम्भाषणे लोट् लकारे प्रयुक्तानि क्रियापदानि रेखाङ्कितानि कुरुत–**

अरुणः – नमस्ते महेश! स्वागतम्। आगच्छतु उपविशतु।

महेशः – एते छात्राः किं कुर्वन्ति?

अरुणः – एते बालकाः निबन्धं लिखन्ति। केचित् चर्चां कुर्वन्ति। बालिकाः कथां शृण्वन्ति। अन्याः बालाः च प्रश्नान् पृच्छन्ति।

सुरेशः – किम् अहं प्रविशानि?

अरुणः – सुरेश! आगच्छ। अत्र उपविश। (बालान् उद्दिश्य) भोः बालकाः! सम्भाषणलेखनं समाप्तं वा? यदि समाप्तं तर्हि भवन्तः चर्चां कुर्वन्तु। भोः बालिकाः! कथाश्रवणं समाप्तं वा? भवत्यः अधुना प्रश्नान् पृच्छन्तु।

सुरेशः – किम् अहमपि कथां लिखानि?

अरुणः – लिख, त्वमपि कथां लिख।

महेशः – किम् अहं गच्छानि?

अरुणः – क्षणं प्रतीक्षस्व (बालान् उद्दिश्य) – भो बालाः! यूयं ध्यानेन पठत। अहं सम्प्रत्येव आगच्छामि।

छात्राः – वयं सर्वे पठामः।

तृष्णां छिन्धि, भज क्षमां, जहि मदं, पापे रतिं मा कृथाः।
सत्यं ब्रूह्यनुयाहि साधुपदवीं, सेवस्व विद्वज्जनम्।
मान्यान् मानय, विद्विषोऽप्यनुनय, प्रच्छादय स्वान् गुणान्।
कीर्तिं पालय, दुःखिते कुरु दयामेतत् सतां चेष्टितम्।।

## ख. रिक्तस्थानानि क्रियापदैः पूरयत–

भिक्षुकः – (पथिकं प्रति) भवान् मह्यम् एकं पणं ..............................। (दा)

पथिकः – त्वं तु युवा। कथं ..............................? (याच्) किञ्चित् कार्यं ..............................। (कृ)

भिक्षुकः – किं ..............................(कृ)? मम सकाशे धनं नास्ति।

पथिकः – रे भिक्षुक! स्वहस्तं कर्तित्वा मह्यं ..............................(दा)। अहं धनं .............................. (दा)।

भिक्षुकः – कथं ..............................? (दा)

पथिकः – स्मर तावत्। तव हस्तद्वयमेव ते धनम्। इदानीं ..............................(त्यज्) भिक्षावृत्तिम्।

### अस्माभिः अधीतम्

**लोट् प्रयुज्यते–**

- आदेशार्थे
- निमन्त्रणार्थे
- आशीर्वादार्थे
- प्रश्ने च सामर्थ्ये च।

* * * * *

## (ङ) विधिलिङ्लकारः

| पुरुषाः | वचनानि | कर्तृपदानि | रूपाणि | |
|---|---|---|---|---|
| प्रथमपुरुषः/ अन्यपुरुषः | एकवचनम् | बालकः/सः/एषः/कः?<br>बालिका/सा/एषा/का?<br>मित्रम्/तत्/एतत्/किम्? | गच्छेत् | सेवेत |
| | द्विवचनम् | बालकौ/तौ/एतौ/कौ?<br>बालिके/ते/एते/के?<br>मित्रे/ते/एते/के? | गच्छेताम् | सेवेयाताम् |
| | बहुवचनम् | बालकाः/ते/एते/के?<br>बालिकाः/ताः/एताः/काः?<br>मित्राणि/तानि/एतानि/कानि? | गच्छेयुः | सेवेरन् |
| मध्यमपुरुषः | एकवचनम् | त्वम् | गच्छेः | सेवेथाः |
| | द्विवचनम् | युवाम् | गच्छेतम् | सेवेयाथाम् |
| | बहुवचनम् | यूयम् | गच्छेत | सेवेध्वम् |
| उत्तमपुरुषः | एकवचनम् | अहम् | गच्छेयम् | सेवेय |
| | द्विवचनम् | आवाम् | गच्छेव | सेवेवहि |
| | बहुवचनम् | वयम् | गच्छेम | सेवेमहि |

### सम्भावनायां विध्यर्थे च विधिलिङ्लकारः

- **प्रदत्तानि वाक्यानि ध्यानेन पठत–**

अहं विदेशं गच्छेयम्।

कदाचित् आचार्यः विद्यालयं न आगच्छेत्।

गुरुश्चेद् इच्छेत् अहं छात्रावासे वसेयम्।

ब्रह्मचारी मधु मांसं च वर्जयेत्। दिवा न स्वप्यात्। निर्दोषं न दण्डयेत्।

अत्र क्रियायाः सम्पादने सम्भावना वर्तते, न तु आदेशः। अतः विधिलिङ्-लकारस्य प्रयोगः।

ये च नियमाः जीवनम् अनुशासति, ते एवं 'विधि' इति कथ्यन्ते।

◆ **अधोलिखितरिक्तस्थानानि प्रदत्तक्रियापदैः पूरयत–**

| गच्छेम, आनयेत्, भवेत्, नयेत्, कुर्युः |
|---|

1. अद्य वृष्टिः ....................।
2. अद्य पत्रवाहकः मम धनादेशम् ....................।
3. वयम् अद्य प्रदर्शनीं द्रष्टुं ....................।
4. मम पिता माम् अपि विदेशं ....................।
5. ते परीक्षामुत्तीर्य व्यापारमेव ....................।

## परामर्शसन्दर्भे विधिलिङ्लकारः

◆ **अधोलिखितानि वाक्यानि पठित्वा क्रियापदानि रेखाङ्कितानि कुरुत–**

त्वं साधूनां सेवां कुर्याः। छात्रः सत्यं वदेत्। जनाः उद्याने अवकरं न क्षिपेयुः।

अत्र जनाः कानिचित् अवाञ्छितकार्याणि कुर्वन्ति। तान् प्रति निर्देशवाक्यानि लिखत–

जनाः उच्चैः हसन्ति। निर्देशः – अत्र जनाः उच्चैः न हसेयुः।

1. उद्याने जनाः धूम्रपानं कुर्वन्ति। निर्देशः – ..............................
2. बालकाः भोजनात् पूर्वं हस्तौ न प्रक्षालयन्ति। निर्देशः – ..............................
3. छात्राः कक्षं न अलङ्कुर्वन्ति। निर्देशः – ..............................
4. पुस्तकालये छात्राः वार्तालापं कुर्वन्ति। निर्देशः – ..............................
5. शिशवः वाटिकायां पुष्पाणि त्रोटयन्ति। निर्देशः – ..............................

## उपदेशे विधिलिङ् लकारः

◆ **अधोलिखितानि वाक्यानि पठत–**

सत्यं ब्रूयात्। प्रियं ब्रूयात्। छात्राः स्वाध्यायात् प्रमादं न कुर्युः।
शिष्यः गुरोः अनवद्यानि कर्माणि आचरेत्।

◆ **उदाहरणानुसारम् अधोलिखितेषु विधिलिङ्-क्रियापदानि रेखाङ्कितानि कुरुत–**

यथा–वृत्तं यत्नेन <u>संरक्षेत्</u>।

1. न वै स्वयं तत् अश्नीयात् अतिथिं यत् न भोजयेत्।
2. यः प्रीणयेत् सुचरितैः पितरौ स पुत्रः।
3. सुखार्थी वा त्यजेद् विद्यां विद्यार्थी वा त्यजेत् सुखम्।
   सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्।।
4. सहसा विदधीत न क्रियाम्।

## इच्छार्थे विधिलिङ्

भवान् शीघ्रं नीरोगी भवेत्। वयं प्रातः ईश्वरं स्मरेम।

◆ **अधोलिखितेषु वाक्येषु क्रियापदानि योजयत–**

1. भवान् शीघ्रम् उन्नतिं ……………………………। (कृ)
2. अस्माकं देशे पण्डिताः समदर्शिनः ……………………………। (अस्)
3. अस्माकं देशः कदापि पराधीनः न ……………………………। (भू)
4. अहम् अपि युद्धे शत्रून् ……………………………। (जि)
5. वयम् आहतानां चिकित्सां ……………………………। (कृ)

◆ **एवमेव अधोलिखितेषु विधिलिङ्-क्रियापदैः रिक्तस्थानानि पूरयत–**

1. असत्यं न ……………………………। (वद्)
2. द्यूतं न ……………………………। (कृ)
3. गृहात् बहिः सरण्याम् अवकरं न ……………………………। (क्षिप्)
4. विद्यालये यथासमयं ……………………………। (गम्)
5. अधर्माचरणं न ……………………………। (कृ)

## मिश्रितप्रश्नाः

**क. किं त्वम् अतिथये 'चायम्' इति उष्णपेयं पक्तुं जानासि? यदि न जानासि तर्हि इह तस्य विधिः दीयते। एतं विधिं मञ्जूषायां प्रदत्तक्रियापदैः रिक्तस्थानानि पूरयित्वा जानीहि।**

| |
|---|
| स्थापयेत्, क्वथयेत्, मिश्रयेत्, समर्पयेत्, शोधयेत्, उष्णीकुर्यात्, त्यजेत्, मिश्रयेत्। |

1. प्रथमं क्षीरम् ……………………………।
2. ततः चषकमितं जलं चुल्लस्य उपरि ……………………………।
3. जलं सम्यक् ……………………………।
4. जलं यदा क्वथति तदा चमसमितं चायपत्राणि जले ……………………………।
5. चमसमितां शर्कराम् अपि जलेन सह मिश्रयेत्। ……………………………।
6. निमेषद्वयाद् अनन्तरं चायकषायं शोधन्या ……………………………।
7. शोधिते चायकषाये अर्धचषकमितम् उष्णं क्षीरं ……………………………।
8. सिद्धं चायम् अतिथये ……………………………।

**2. श्लोके विधिलिङ्-क्रियापदानि रेखाङ्कितानि कुरुत–**

सद्भिरेव सहासीत, सद्भिः कुर्वीत सङ्गतिम्।
सद्भिर्विवादं मैत्रीं च, नासद्भिः किञ्चिदाचरेत्।।

**3. विधिलिङ्क्रियापदैः रिक्तस्थानानि पूरयत–**

1. छात्राः सदा सत्यं .....................। (वद्)
2. अभिवादनशीलः वृद्धोपसेवी .....................। (अस्)
3. गुरुप्रियः भवितुं .....................। (यत्)
4. सज्जनानामेव सङ्गतिं .....................। (कृ)
5. सः भोजने शयने श्रवणे च सर्वत्र संयमम् .....................। (आ+चर्)

**अस्माभिः अधीतम्**

**'विधिलिङ्' प्रयुज्यते-**

- सम्भावनायां विध्यर्थे च
- परामर्शार्थे
- उपदेशे
- इच्छार्थे

* * * * *

## मिश्रितप्रश्नाः

**क. अधोलिखितकथायां क्रियापदानि लुप्तानि। प्रदत्तक्रियापदानां सहायतया कथां पूरयत–**

एकस्मिन् देवालये ताम्रचूडः नाम परिव्राजकः .....................। स च प्रत्यहं भिक्षाटनं कृत्वा जीविकानिर्वाहं .....................। सर्वां भिक्षां भिक्षापात्रे निधाय नागदन्ते अवलम्ब्य रात्रौ .....................। अथ एकदा मूषकाः स्वस्वामिनम् ..................... स्वामिन्! वयं भिक्षां भक्षयितुं न .....................। भवान् तत्र आरोढुं समर्थः। अतः कृपां .....................। मूषकः भिक्षापात्रं समारुह्य मूषकेभ्यः भिक्षान्नम् .....................। परिव्राजकः ..................... कथमेनं .....................। सः जर्जरवंशम् आनीय पुनः पुनः .....................। एकदा तस्य मित्रं तत्र .....................। स परिव्राजकम् .....................। यदि त्वं मद्वचनं न ..................... तर्हि अन्यत्र .....................। परिव्राजकः उवाच—माम् एवं वद। अहं मूषकेण त्रस्तः किं .....................?

| |
|---|
| अकथयन्, स्वपिति, वसति, स्म, करोति, शक्नुमः, कुरु, अयच्छत्, अचिन्तयत्, मारयेयम्, ताडयति, आगच्छत्, अवदत्, शृणोषि, यास्यामि, कुर्याम्। |

**ख. उचितविकल्पेन रिक्तस्थानानि पूरयत–**

1. बालकस्य अत्र रक्षकः न ..............................।

(क) अस्ति (ख) अस्मि (ग) सन्ति (घ) स्थः

2. अहं भवत्पुत्रान् नीतिशास्त्राऽभिज्ञान् ..............................।

(क) करिष्यति (ख) करिष्यसि (ग) करिष्यामि (घ) करिष्यामः

3. दृष्टमात्रा एव सा बलाका भस्मसात् ..............................।

(क) अभवन् (ख) अभवम् (ग) अभवत् (घ) अभवः

4. हे श्वेतकतो! त्वं गुरुं प्रति ..............................।

(क) गच्छतु (ख) गच्छानि (ग) गच्छत (घ) गच्छ

5. अष्टावक्रः राजानं सविनयं ..............................।

(क) प्रणमेत् (ख) प्रणमेयुः (ग) प्रणमेयम् (घ) प्रणमेम

**ग. कोष्ठकात् उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत–**

1. अष्टावक्रः शास्त्रार्थं कृत्वा पण्डितान् ..............................। (अजयम् / अजयन् / अजयत्)
2. राजन्! अहं भवद्राज्ये निवस्तुम् ..............................। (इच्छति / इच्छामि / इच्छसि)
3. जलबिन्दवः शुष्कपर्णानाम् उपरि पतित्वा मधुरं सङ्गीतं ..............................। (जनयति / जनयसि / जनयन्ति)
4. व्याधिना पीडितो नो .............................. कश्चन। (भवेयुः / भवेयम् / भवेत्)
5. यथा .............................. भवद्भ्यः। (रोचते / रोचेते / रोचन्ते)

**घ. निर्देशानुसारम् उचितरूपैः रिक्तस्थानानि पूरयत–**

1. शिष्यः गुरुं प्रश्नं ..............................। (प्रच्छ् + लोट्)
2. सेवकाः पात्राणि ..............................। (प्र + क्षाल् + लृट्)
3. त्वं मम पुस्तकं कदा ..............................? (नी + लङ्)
4. परिश्रमी जनः साफल्यं ..............................। (लभ् + लट्)
5. वयं परिश्रमं ..............................। (कृ + विधिलिङ्)

# पञ्चमः अभ्यासः

# विभक्तीनां प्रयोगः

## (क) कारकपरिचयः

कर्ता कर्म च करणं सम्प्रदानं तथैव च।

अपादानाधिकरणम् इत्याहुः कारकाणि षट्।।




सम्बन्धः - षष्ठी

सम्बोधनम् - प्रथमा

**क. अधः प्रदत्तम् आरेखं ध्यानेन पश्यत अवगच्छत च।**



ख. अधुना आरेखे प्रयुक्तानि पदानि समुचितक्रमेण प्रयुज्य वाक्यं रचयत–

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

ग. अधोलिखितानां प्रश्नानाम् उत्तराणि आरेखं दृष्ट्वा लिखत–

1. कः ददाति? नृपः ददाति।

(यत् क्रियां सम्पादयति तत् **कर्तृकारकम्**।)

हे राघव! नृपः ददाति।

(यं सम्बोध्य किमपि कथ्यते तत् सम्बोधनं भवति। सम्बोधने अपि प्रथमा विभक्तिः एव भवति।)

2. नृपः किं ददाति? ..........................................................।

(कर्ता क्रियायाः सहायतया यं परिणामं प्राप्नोति तत् **कर्मकारकम्**।)

3. नृपः धनं केन (कथम्) ददाति? ..........................................................।

(कर्ता येन माध्यमेन (साधनेन) क्रियां सम्पादयति तत् **करणकारकम्**।)

4. नृपः हस्तेन कस्मै (किमर्थम्) धनं ददाति? ..........................................................।

(कर्ता यस्मै (यन्निमित्तम्) कर्म करोति तत् **सम्प्रदानकारकम्**।)

5. नृपः सेवकाय हस्तेन कस्मात् (कुतः) धनं ददाति?

..........................................................................।

(यत् किमपि यस्मात् पृथक् भवति तत् **अपादानकारकम्**।)

6. नृपः राजकोषात् सेवकाय हस्तेन कस्मिन् (कुत्र) धनं ददाति?

..........................................................................।

(यदा यत्र वा कार्यं सम्पन्नं भवति तत् **अधिकरणकारकम्**।)

7. कस्य नृपः सभागारे राजकोषात् सेवकाय हस्तेन धनं ददाति?

..........................................................................।

(क्रियाम् अतिरिच्य यस्य कस्यापि सम्बन्धः येन सह भवति तत् (कारकम् न अपि तु **सम्बन्धः** भवति।)

## ( ख ) प्रथमा-द्वितीया-विभक्ति-प्रयोगः

**अधुना अधः प्रदत्तानि चित्राणि दृष्ट्वा प्रश्नानाम् उत्तराणि लिखत–**



**ऋषभः** – हे सौरभ! लता कम् आरोहति?

**सौरभः** – हे ऋषभ! ....................................।



**हरिः** – हे मणे! गुरुः कौ पाठयति?

**मणिः** – हे ..............................................।



**विनीता** – हे ललिते! गुरुः के अध्यापयति?

**ललिता** – हे ..............................................।



**भानुः** – हे मनो! छात्राः कं दृष्ट्वा नमन्ति?

**मनुः** – हे ..............................................।



**बालकाः** – हे कृषक:! त्वं कान् पालयितुम् इच्छसि?

**कृषकः** – हे बालका:! अहं ..................................।



कपोताः



कपोतराजः



कपोताः कपोतराजम् अनुसरन्ति।

वरदा – शारदे! कपोताः कम् अनुसरन्ति?

शारदा – हे ............................... ! ...............................!

धनवती – हे सरस्वति! किं कपोताः कपोतराजं निन्दन्ति?

सरस्वती – हे ...............................! नहि, कपोताः तु ............................... प्रशंसन्ति।

हरिः – हे ऋषे! किं त्वं प्रातः मातरं नमसि?

ऋषिः – हे हरे! आम्, अहम् ...............................।

विधुः – हे विभो! किं त्वं खगान् पालयसि?

विभुः – नहि, नहि! हे विधो! अहं तु ............................... मोचयामि।


सर्पः


बालकः


सर्पः बालकम् उपसरति।

साध्वी – हे माधवि! सर्पः कम् उपसर्पति?

माधवी – हे ............................... ! ...............................।

साध्वी – हे माधवि! किं सर्पः बहून् बालकान् उपसर्पति?

माधवी – हे ............................... ! नहि! सर्पः एकम् एव बालकम् उपसर्पति?



कं परितः वृक्षाः सन्ति?

.......................................................................।

◆ **अधोलिखिते संवादे रिक्तस्थानपूर्तिं कुर्वन्तु–**

माता – पुत्रि! सरणिम् उभयतः किमपि वाहनं तु न आगच्छति।

पुत्री – मातः! ............................... उभयतः किमपि ...............................।

माता – पुत्रि! पश्य, पश्य! तत्र मोटरचालकः तीव्रगत्या आगच्छति।

पुत्री – आम् मातः! एकं वाहनं ............................... ।

माता – तत्र एकः पुरुषः अपि मार्गं लङ्घयति। मोटरवाहनं ............................... निकषा एव आगतम् अस्ति।

पुत्री – आम् मातः! ............................... ।

माता – हा! पुरुषस्तु पतितः। धिक् तम् ...............................।

**पुत्री** – अम्ब! किम् आवाम् .............................. उपसर्पाव?

**माता** – अथ किम्। आगच्छ ..............................।

**पुत्री** – मातः! पश्य बहवः जनाः तं पश्यन्ति।

**माता** – धिक् तान् .............................. न कोऽपि तम् उत्थापयति।

**पुत्री** – मातः! तस्य दण्डः अपि भग्नः?



**माता** – (तम् उत्थाप्य) हा पथिक! कथं .............................. विना गमिष्यसि? (निरीक्ष्य) भाग्येन नाधिकः आहतः।

**पथिकः** – किं करोमि? दैवं विना न कोऽपि सहायकः।

**माता** – अयि भोः! ....................... मा कुरु। आरुह एतां त्रिचक्रिकाम्। पुत्रि! आगच्छ। एनं .................. उपवेशयाव, .............................. प्रति च नयाव।

**पुत्री** – मान्यवर! आरोह एतां .............................. । स्वगृहं प्रति मार्गं दर्शय।

**पथिकः** – धन्ये युवां यत् माम् अज्ञातमपि उपकुरुथः सत्यमेव उक्तम्–

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।।

## प्रश्नाः

### क. अधोलिखितशब्दानां सम्बोधने रूपं लिखत–

यथा– माता हे मातः

| | | | | | |
|---|---|---|---|---|---|
| 1. | भगिनी | .............................. | 2. | पिता | .............................. |
| 3. | सरस्वती | .............................. | 4. | बालकाः | .............................. |
| 5. | मुनिः | .............................. | 6. | बालिका | .............................. |
| 7. | मनुः | .............................. | 8. | बालिकाः | .............................. |
| 9. | यमुना | .............................. | 10. | शिष्यः | .............................. |
| 11. | गुरुः | .............................. | 12. | शिष्यौ | .............................. |
| 13. | सौरभः | .............................. | 14. | पुत्राः | .............................. |
| 15. | भ्राता | .............................. | 16. | पुत्रः | .............................. |
| 17. | भगिनी | .............................. | 18. | शिष्ये | .............................. |
| 19. | नद्यः | .............................. | 20. | हरिः | .............................. |

**(सम्बोधने एकवचने एव रूपं परिवर्तते। अन्यत्र प्रथमावत् एव भवति।)**

**ख. अधोलिखितानि अव्ययानि समुचितविभक्तिसहितं वाक्येषु प्रयुञ्जीत–**

प्रति ..............................

विना ..............................

उभयतः ..............................

परितः ..............................

धिक् ..............................

**ग. मञ्जूषायां प्रदत्तपदानां सहायतया रिक्तस्थानानि पूरयत–**

> वृक्षम्, गृहम्, तान्, चमत्कारम्, अनुगच्छन्ति, उद्यानम्, बालकान्, त्वाम्, जनहितम्, अहितम्, ऐन्द्रजालिकम्, वंशीवादकम्, इच्छसि।

बालकाः .................... परितः क्रीडन्ति। क्रीडामग्नाः ते .................... प्रति गन्तुं न उत्सुकाः। तत्र एकः ऐन्द्रजालिकः .................... प्रविशति। सः .................... दृष्ट्वा तान् आह्वयति, .................... च प्रशंसति, कथयति – आगच्छत .................... दर्शयामि इति। स वंशीं मधुरं वादयति। बालकाः .................... समया गच्छन्ति। वंशीवादकः अग्रे गच्छति। बालकाः तं ....................। तदैव एकः शिक्षकः तत्र प्रविशति। सः तान् सर्वान् रक्षति, .................... च तिरस्करोति कथयति च धिक् .................... । किं त्वम् एतान् अपहर्तुम् .................... । सङ्गीतं तु .................... साधयति । एवम्, .................... मा कुरु।
**परोपकारः कर्तव्यः प्राणैरपि धनैरपि।**

## अस्माभिः अधीतम्

- कर्ता कर्म करणं सम्प्रदानम् अपादानम् अधिकरणं च एतानि षट्कारकाणि भवन्ति।
- सम्बोधनं सम्बन्धः च कारके न स्तः।
- सम्बोधनं केवलम् एकवचने रूपं भिन्नं भवति अन्यत्र तु प्रथमावत् एव।
- प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी च एताः सप्त विभक्तयः भवन्ति।
- कर्तरि सम्बोधने च प्रथमा, कर्मणि द्वितीया, करणे तृतीया, सम्प्रदाने चतुर्थी, अपादाने पञ्चमी, सम्बन्धे षष्ठी, अधिकरणे च सप्तमी विभक्तिः भवति।
- धातोः पूर्वं यदि उप, अनु, अधि उपसर्गाः स्युः तत्रापि कर्मणि द्वितीया।
- उभयतः, परितः, समया, निकषा, हा, प्रति, धिक् योगे अपि द्वितीया।
- ‘विना’ योगे द्वितीया, तृतीया, पञ्चमी च।
- क्त्वा, ल्यप्, तुमुन्, शतृ आदि प्रत्ययेभ्यः पूर्वमपि कर्मणि द्वितीया।

* * * * *

## ( ग ) तृतीयाविभक्तिप्रयोगः

**क. गीतं पठत गायत च**

पयसा कमलं कमलेन पयः,
पयसा कमलेन विभाति सरः।
मणिना वलयं वलयेन मणिः,
मणिना वलयेन विभाति करः।।

शशिना च निशा निशया च शशी,
शशिना निशया च विभाति नभः।
सभया च भवान् भवता च सभा,
सभया भवता च विभाति जगत् ।।

**'क' स्तम्भस्य पदानां 'ख' स्तम्भस्य पदैः सह मेलनं कृत्वा वाक्यानि लिखत–**

| क | ख | |
|---|---|---|
| सरः | शशिना | सरः पयसा कमलेन च विभाति। |
| नभः | पयसा | ........................................ |
| शशी | कमलेन | ........................................ |
| करः | मणिना | ........................................ |
| जगत् | वलयेन | ........................................ |
| सभा | भवता | ........................................ |
| पयः | सभया | ........................................ |
| वलयम् | निशया | ........................................ |
| कमलम् | | ........................................ |
| निशा | | ........................................ |
| मणिः | | ........................................ |
| भवान् | | ........................................ |

**ख. किं केन विभाति, केन विना न विभाति?**



सरः पङ्कजैः विभाति।



पङ्कजैः विना सरः न विभाति।

1. निशा चन्द्रेण ..............................
   नभः कैः विभाति?

2. निशा .............................. विना न विभाति।
   नभः कैः विना न विभाति?

3. ............................................ 4. ............................................

5. बालक: विद्यया विभाति।
बालक: .......................... विभाति?

6. कया हीन: बालक: न विभाति?
.......................... हीन: ..........................

ग. **कथं ज्ञायते इति लक्षणे तृतीया।**



कथं ज्ञायते अयं छात्र:?

.......................... ज्ञायते अयं छात्र:।

छात्र: स्यूतं धारयति।



कथं ज्ञायते अयं देवालय:?

.......................... ज्ञायते .......................... ।

देवालय: ध्वजं धारयति।



कथं ज्ञायते अयं विद्यालय:?

.......................... ज्ञायते .......................... ।

विद्यालये छात्रा: प्रार्थनां कुर्वन्ति।



कथं ज्ञायते अयं सैनिक:?

.......................... ज्ञायते .......................... ।

सैनिक: शस्त्रं धारयति।

## घ. अलं योगे तृतीया

यथा अयं पुस्तकालयः। अलं वार्तालापेन।

◆ **कोष्ठगतशब्दैः रिक्तस्थानानि पूरयत–**

1. अयं देवालयः। अलं .............................. (कोलाहल)।
2. अयं मार्गः। अलं .............................. (कलह)।
3. एतत् सरः। अलम् .............................. (अवगाहन)।
4. एषा वाटिका। अलं .............................. (पुष्पत्रोटन)।
5. एषः चिकित्सालयः। अलम् उच्चैः .............................. (हसन)।
6. इयं गङ्गा नदी। अलम् .............................. (अवकरक्षेपण)।

## ङ. साकम्-सार्धम्-समम्-सह-योगे तृतीया।



सर्वे छात्राः मण्डलाकारे उपविशेयुः। अहं चिटिकाः वितरामि। यदा अहं वदामि 'गजाः' तदा 'गजाः' इति चिटिका यस्य समीपे वर्तते सः उत्तिष्ठेत्, धावेत् च। केन सह धावेत्? यस्य समीपे 'गजैः' इति लिखिता चिटिका वर्तते। कथ्यताम् "गजाः गजैः सह अनुव्रजन्तिः। धावनं घटिकाक्रमेण एव कर्तव्यम्।"  स्वस्थानम् आगत्य तौ उपविशेताम्।

इदानीं खेलामः।

प्रारम्भे एकं श्लोकं गायामः

मृगाः मृगैः सङ्गमनुव्रजन्ति,<br>
गावश्च गोभिस्तुरगास्तुरङ्गैः ।<br>
मूर्खाश्च मूर्खैः सुधियः सुधीभिः,<br>
समानशीलव्यसनेषु सख्यम्।।

◆ **इदानीं 'क' स्तम्भात् शब्दान् गृहीत्वा 'ख' स्तम्भस्य शब्दैः सह मेलनं कृत्वा वाक्यानि लिखत–**

| | क | ख | | |
|---|---|---|---|---|
| यथा | नद्यः | नदीभिः | 1. | नद्यः नदीभिः सह मिलित्वा प्रवहन्ति। |
| | चटकाः | चटकाभिः | 2. | चटकाः .............................. सार्धम् उत्पतन्ति । |
| | प्लवङ्गाः | प्लवङ्गैः | 3. | प्लवङ्गाः .............................. समं वृक्षेषु कूर्दन्ति । |
| | भृङ्गाः | भृङ्गैः | 4. | भृङ्गाः .............................. साकं पुष्पात् पुष्पं भ्रमन्ति। |

| | | | |
|---|---|---|---|
| शिशवः | शिशुभिः | 5. | ........................................ |
| सखायः | सखिभिः | 6. | ........................................ |

छ. **येन वाहनेन गच्छति तत्र तृतीया**

इदानीं क्रीडा समाप्ता। वदत, कः कथं गृहं गमिष्यति इति।

सुरुचे! त्वं वद। त्वं कथं गमिष्यसि?

**सुरुचिः** - अहं बसयानेन ..........................।

मोहिनि! त्वं वद।

**मोहिनी** - अहं .......................... ।(द्विचक्रिका)

राधिके! त्वं वद

**राधिका** - अहं .......................... (पिता) सह ..........................।

राधिके! इदं वद, केन यानेन गमिष्यसि?

**राधिका** - अहं .......................... । (त्रिचक्रिका)

भानो! त्वं वद।

**भानुः** - अहं तु .......................... गमिष्यामि। (पाद)

ज. **को लाभः, 'किं प्रयोजनम्' इति प्रयोगे तृतीया**

**यथा** तेन यानेन को लाभः यत् न चलति।

तेन दीपेन किं प्रयोजनं यत्र तैलं नास्ति।

◆ **एवमेव रिक्तस्थानपूर्तिं कुर्वन्तु–**

1. तेन .......................... किं यत्र न गम्यते। (मार्ग)
2. तेन .......................... किं यत्र न दृश्यते मुखम्। (दर्पण)
3. तेन .......................... किं यत् भ्रान्तिं जनयति। (पुस्तक)
4. तेन .......................... किं यत् दीनेभ्यः न दीयते। (धन)
5. तेन .......................... किं येन परहितं न क्रियते। (जीवन)
6. तेन .......................... किं यत् न आचर्यते। (ज्ञान)

## मिश्रितप्रश्नाः

**क. अत्र उत्तराणि लिखितानि। स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुरुत–**

यथा – उ० भगिनी **भ्रात्रा** सह आपणं गच्छति। प्र० भगिनी **केन** सह आपणं गच्छति?

| उत्तराणि | प्रश्नाः |
|---|---|
| 1. त्वं **सूचिकया** वस्त्रं सीव्यसि । | 1. ................................ |
| 2. **विद्यां** विना जीवनं पशुतुल्यम् । | 2. ................................ |
| 3. भिक्षुकः **आशया** गृहद्वारम् उपसर्पति। | 3. ................................ |
| 4. तस्य पिता **वायुयानेन** विदेशं गच्छति । | 4. ................................ |
| 5. सः **त्रिभिः रूप्यकैः** चिटिकां क्रीणाति । | 5. ................................ |
| 6. वृद्धः **लगुडेन** चलति । | 6. ................................ |
| 7. वयं **नेत्राभ्यां** पश्यामः । | 7. ................................ |
| 8. लता **पुष्पैः** शोभते । | 8. ................................ |

### अस्माभिः अधीतम्

**तृतीया प्रयुज्यते–**

- क्रियासाधने
- हीन, विना योगेऽपि
- इत्थं भूतलक्षणे
- निषेधार्थक–अलं योगे
- साकं–सार्धं–समं–सह इति योगे
- येन गम्यते
- येन प्रयोजनम् अस्ति / नास्ति

## ( घ ) चतुर्थीविभक्तिप्रयोगः

**क. मिलित्वा गायत-**

**विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।**
**खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय॥**

- **अधोलिखितप्रश्नानाम् उत्तराणि लिखत-**

प्र. खलस्य विद्या किमर्थं भवति? ..............................

प्र. खलस्य धनं किमर्थं भवति? ..............................

प्र. खलस्य शक्तिः किमर्थं भवति? ..............................

प्र. साधोः विद्या किमर्थं भवति? ..............................

प्र. साधोः धनं किमर्थं भवति? ..............................

प्र. साधोः शक्तिः किमर्थं भवति? ..............................

**ख. रुच्, दा, स्पृह् इत्येतेषां योगे चतुर्थी**

यत् यस्मै रोचते तत् तस्मै दीयते।
अत्र एका मञ्जूषा। बहूनि वस्तूनि अत्र सन्ति ।




**अधुना एतानि वस्तूनि पश्यन्तु। कस्मै किं रोचते इति वदन्तु।**

लते! तुभ्यं किं रोचते?

लता – मह्यं कङ्कणं ..............................।

एतत् कङ्कणं लतायै दीयते।

राधे! त्वं वद। तुभ्यं ..............................?

राधा-.............................. (लेखनी)

एषा लेखनी .............................. दीयते।

प्रदीप! .............................. कस्मै स्पृहयसि?

प्रदीपः-..............................। (स्यूत)

एषः स्यूतः ..............................।

मोहित! .............................. किं ददामि?

मोहितः-.............................. (कर्तरी)

एषा कर्तरी ..............................।

भगिनि! .............................. किं दीयते?

भगिनी-..............................ददातु। (मोदकानि)

एतानि .............................. दीयन्ते ।

ऋषे! त्वं वद तुभ्यं किं ..............................।

ऋषिः - मह्यं चित्रकला रोचते अतः .............................. (कूर्चः)

सङ्गीते! तुभ्यं किं ददामि?

सङ्गीता-भगिनि! .................. तु सङ्गीतं .................. अतः .................. ददातु। (ध्वनिमुद्रिका)

**ग.** **नमः-स्वस्ति-स्वाहा-स्वधा इत्येतेषां योगे चतुर्थी**

आकाशवाणीतः संस्कृतकार्यक्रमः प्रस्तूयते। छात्राः कमपि आश्रमं वर्णयन्ति। यन्त्रस्य ध्वनिदोषेण केचन शब्दाः श्रूयन्ते केचन च न। अतः अश्रुतान् शब्दान् अनुमानेन पूरयत-

इयम् आकाश ..................। संस्कृतकार्य .................. प्रस्तूयते। अद्य वयं गुरुजनैः ..................
आश्रमं प्रविशा ..................। कथं रम्यं पवित्रं वाता .................. म्। यज्ञध्वनिः श्रू.........ते। शृणमः।
नमः शि..................। नमः शम्भ .................. च।

अग्न......... स्वाहा। अग्निसोमा......... स्वाहा। इन्द्र......... स्वाहा।

अन्यत्र आचार्यः शिष्ये ......... सदाचारम् उपदिशति । कस्मैचित् मा क्रुध्य। सहपाठि .................. मा ईर्ष्य।

मित्र ......... मा द्रुह्य। दरिद्रे ......... धनं यच्छ। देवे ......... सत्कार्याणि रोचन्ते ।

तत्र पश्यत। महर्षिः आगच्छति। तं नमामः। छात्राः! तं नमत।

छात्राः - नमः ऋषिवर .........।

महर्षिः - स्वस्ति युष्मभ्यम्। किमद्य आश्रमं द्रष्टुम् आगताः।

छात्राः - आम्। धन्याः वयं भवद्दर्शनेन।

(विद्युदभावे यन्त्रं मौनं भवति)

घ. **समर्थभावे अलं-योगे चतुर्थी/ तुमुन् प्रयोगश्च।**

### 1. कः कस्मै अलम्?

यथा- वयं शत्रुभ्यः अलम्। (शत्रुः)

(i) एतत् दुग्धं .......................... अलम्। (बालकाः)

(ii) एतावान् ओषधिः .......................... अलम्। (रुग्णः)

(iii) रामः .......................... अलम्। (रावणः)

(iv) एतत् वेतनं .......................... अलम्। (भृत्यः)

### 2. तुमुन्नन्तप्रयोगं कुर्वन्तु

यथा- भगवत्कृपया मूकः अपि **वक्तुम्** अलम्।

(i) वयं शत्रून् .......................... अलम्। (रुध्)

(ii) देवकृपया पङ्गुः अपि पर्वतं .......................... अलम्। (लङ्घय्)

(iii) रामः रावणं .......................... अलम्। (दण्डय्)

(iv) वयं शत्रून् .......................... अलम्। (जि)

### 3. अधोलिखितवाक्येषु चतुर्थ्यन्तपदानि रेखाङ्कितानि कुरुत-

यथा- उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।

(i) नमो ब्रह्मणे व्यापिने शाश्वताय।

(ii) न हि शशकविषाणं कोऽपि कस्मै ददाति।

(iii) मुनिः मुक्तये स्पृह्यति।

(iv) सर्वेभ्यः प्राणिमात्रेभ्यः स्वस्ति।

(v) शिशुभ्यः क्रीडनकानि रोचन्ते।

(vi) दुर्जनाः सज्जनेभ्यः द्रुह्यन्ति।

## अस्माभिः अधीतम्

**चतुर्थी प्रयुज्यते-**

- यत्र कार्यम् अन्यफलप्राप्तये क्रियते। भक्तिः ज्ञानाय।
- यस्मै रोचते, तस्मै।
- क्रुध्, द्रुह, ईर्ष्य्, असूय् आदि-धातूनां योगे।
- 'अलम्' शब्दः यत्र समर्थ इति अर्थे प्रयुज्यते तस्य योगे।
- यस्मै किमपि दीयते।
- नमः, स्वस्ति, स्वाहा, स्वधा इत्येतेषां योगे।
- तुमुन् प्रत्ययः अपि चतुर्थी-अर्थे प्रयुज्यते।

* * * * *

## ( ङ ) पञ्चमीविभक्तिप्रयोग:

क. **विश्लेषे, बहिर्योगे पञ्चमी**



हे सरले! पत्राणि कुत: पतन्ति?

सरला – ..........................................................

वृक्षेभ्य: पत्राणि पतन्ति।



हे अंशुमत्! निर्झरा: कुत: स्रवन्ति?

अंशुमान् – ..........................................................

पर्वतेभ्य: निर्झरा: स्रवन्ति।



हे सुहृत्! गृहात् बहि: का अस्ति?

सुहृद् – ..........................................................

गृहात् बहि: वाटिका अस्ति।

ख. **यस्मात् किमपि प्राप्यते तत्र पञ्चमी**

- **अधोलिखितं श्लोकं पठित्वा संवादं पूरयत**

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मं तत: सुखम्।।

पिता – पुत्र! नर: कस्मात् पात्रतां याति?

पुत्र: – पित:! ..........................................................

पिता – पुत्रि! नर: कस्मात् धनम् आप्नोति?

पुत्री – पित:! ..........................................................

पिता – भगिनि! नर: कस्मात् धर्मकार्यं करोति?

भगिनी – भ्रातः! ..........................................................

पिता – अनुज! धर्माचरणात् नरः किं लभते?

अनुजः – अग्रज! ..........................................................

ग. **अतिशयवाचके यस्मात् अतिशयः तत्र पञ्चमी**

◆ **कथां पठित्वा वार्तालापं पूरयत–**

एकः मुनिः आसीत्। एकदा स उटजात् बहिः एकां बालमूषिकाम् अपश्यत्। स ताम् अपालयत्। यदा सा युवतिः सञ्जाता, तदा मुनिः अचिन्तयत्। अस्याः विवाहं केनापि बलिष्ठेन सह कारयामि। नूनं सूर्यः एव बलिष्ठः।

सः सूर्यमपृच्छत् – त्वत् बलवत्तरः कः?

सूर्यः अवदत्– मत् ...................... मेघः। सः माम् आच्छादयति।

मुनिः मेघमपृच्छत् – ...................... बलवत्तरः कः?

मेघः अवदत् – ...................... बलवत्तरः वायुः। सः मां वाहयति।

मुनिः वायुमपृच्छत् – ...................... बलवत्तरः कः?

वायुरवदत् – ...................... बलवत्तरः पर्वतः। स मम मार्गं रोद्धुं शक्नोति।

मुनिः पर्वतमपृच्छत् – ...................... बलवत्तरः कः ?

पर्वतः अवदत् – ...................... बलवत्तरः मूषकः, यः मच्छरीरे बिलं करोति।

मुनिः अन्ते मूषकम् उपसृत्य कथयति – हे मूषक! त्वत् ऋते न कोऽपि योग्यतरः वरः।

अतः एनां पुत्रीवत् पालितां मूषिकाम् उद्वह।

घ. **यस्मात् बिभेति तत्र पञ्चमी**

◆ **अधोलिखितां शृङ्खलां पूरयत–**

| | | | |
|---|---|---|---|
| यथा | मूषकः | बिडालात् | बिभेति। |
| 1. | बिडालः | ............................ | ............................ |
| 2. | कुक्कुरः | ............................ | ............................ |
| 3. | वृकः | ............................ | ............................ |
| 4. | सिंहः | ............................ | ............................ |
| 5. | आखेटकः | ............................ | ............................ |
| 6. | सर्पः | ............................ | ............................ |
| 7. | वैनतेयः | विष्णोः | बिभेति। |

## ङ. पर-पूर्व-योगे पञ्चमी

**कः कस्मात् परः? कः कस्मात् पूर्वः?**

**एते द्वादशमासाः**

| | | | |
|---|---|---|---|
| 1. चैत्रः | 2. वैशाखः | 3. ज्येष्ठः | 4. आषाढः |
| 5. श्रावणः | 6. भाद्रपदः | 7. आश्विनः | 8. कार्तिकः |
| 9. मार्गशीर्षः | 10. पौषः | 11. माघः | 12. फाल्गुनः |

यथा- चैत्रः **वैशाखात्** पूर्वः। वैशाखः **चैत्रात्** परः।

1. ज्येष्ठः ............................ पूर्वः। 2. आषाढः ............................ परः।
3. श्रावणः ............................ पूर्वः। 4. भाद्रपदः ............................ परः।
5. आश्विनः ............................ पूर्वः। 6. कार्तिकः ............................ परः।
7. मार्गशीर्षः ............................ पूर्वः। 8. पौषः ............................ परः।
9. माघः ............................ पूर्वः। 10. फाल्गुनः ............................ परः।

## च. आ+रभ् इति योगे पञ्चमी

**कः ऋतुः कदा भवति?**

1. आषाढात् आरभ्य श्रावणपर्यन्तं वर्षर्तुः ।
2. भाद्रपदाद् ............................ आश्विन - ............................ शरद्।
3. कार्तिकाद् ............................ मार्गशीर्ष - ............................ शिशिरः।
4. पौषाद् ............................ माघ - ............................ हेमन्तः।
5. फाल्गुनाद् ............................ चैत्र - ............................ वसन्तः।
6. वैशाखाद् ............................ ज्येष्ठ - ............................ ग्रीष्मः।

## छ. प्र+मद् इति योगे पञ्चमी

**रिक्तस्थानानि पूरयत–**

यथा **स्वाध्यायात्** न प्रमदितव्यम्।

1. ............................................................................। (परोपकारः)
2. ............................................................................। (योगाभ्यासः)
3. ............................................................................। (प्रातः जागरणम्)
4. ............................................................................। (पितृसेवा)
5. ............................................................................। (देवकार्याणि)

## मिश्रितप्रश्नाः

**क. कोष्ठके लिखितानां शब्दानां सहायतया रिक्तस्थानानि पूरयित्वा प्रतिवाक्यम् एकं प्रश्नम् अपि लिखत।**

यथा– मम भ्राता काश्याः आगतवान्। (काशी)

प्र० तव भ्राता कुतः आगतवान्?

1. मम अग्रजः गृहात् दशवादने प्रस्थितः। (गृह)

प्र० ..............................

2. अहम् .................... बहिः इतस्ततः अवकरं न क्षिपामि। (कक्षा)

प्र० किम् ..............................

3. .................... ऋते मम न कोऽपि सहायकः। (ईश्वरः )

प्र० ..............................

4. अहम् .................... पूर्वं प्रार्थनां करोमि। (भोजनम्)

प्र० ..............................

5. लक्ष्मणः .................... विना अयोध्यायां स्थातुं न इच्छति स्म। (राम)

प्र० ..............................

6. अर्जुनः .................... धनुर्विद्याम् अशिक्षत। (द्रोणः)

प्र० ..............................

### अस्माभिः अधीतम्

**पञ्चमी प्रयुज्यते**

- अपादाने
- यस्मात् किमपि प्राप्यते।
- यस्मात् बिभेति
- यस्माद् आरभ्यते
- पञ्चम्यर्थे 'तः' इति अपि प्रयुज्यते।
- बहिर्योगे
- अतिशयवाचके यस्मात् अतिशयः
- पर-पूर्व-योगेऽपि
- यस्मात् प्रमाद्यते।

## (च) षष्ठीविभक्तिप्रयोगः

### क. सम्बन्धवाचके षष्ठी

**1. 'क' स्तम्भे ग्रन्थानां 'ख' स्तम्भे लेखकानां नामानि सन्ति। तयोः मेलनं कृत्वा उदाहरणानुसारं वाक्यानि रचयत।**

| | | क | ख | | |
|---|---|---|---|---|---|
| यथा | 1. | गीता | श्रीवेदव्यासः | 1. | गीतायाः रचयिता श्रीवेदव्यासः। |
| | 2. | रामायणम् | वाल्मीकिः | 2. | ........................................ |
| | 3. | रघुवंशम् | कालिदासः | 3. | ........................................ |
| | 4. | स्वप्नवासवदत्तम् | भासः | 4. | ........................................ |
| | 5. | उत्तररामचरितम् | भवभूतिः | 5. | ........................................ |
| | 6. | कादम्बरी | बाणभट्टः | 6. | ........................................ |

**2. उदाहरणानुसारं वाक्यानि लिखन्तु।**

**कः कस्य पुत्रः? कः कस्य पिता?**

| | | पुत्राः | पितरः | | |
|---|---|---|---|---|---|
| यथा | 1. | रामः | दशरथः | 1. | रामः दशरथस्य पुत्रः, दशरथः रामस्य पिता। |
| | 2. | युधिष्ठिरः | पाण्डुः | 2. | ........................................ |
| | 3. | कर्णः | सूर्यः | 3. | ........................................ |
| | 4. | भीष्मः | शान्तनुः | 4. | ........................................ |
| | 5. | सिद्धार्थः | शुद्धोदनः | 5. | ........................................ |
| | 6. | हनुमान् | पवनः | 6. | ........................................ |

### ख. भाववाचकपदानां योगे कर्मपदस्य षष्ठी

**उदाहरणम् अनुसृत्य वाक्यानि पूरयत–**

उदाहरणम् गीतायाः श्रवणेन नरः पुण्यं लभते। (गीता)

यथा 1. .......................... पठनेन ज्ञानं वर्धते। (पुस्तकानि)

2. .......................... भक्षणेन स्वास्थ्यं वर्धते। (फलानि)

3. ........................ पालनेन तेषां संरक्षणं भवति। (जीवा:)

4. ........................ रक्षणेन सम्मानं लभते। (देश:)

5. ........................ धारणेन शोभा भवति। (स्वच्छवस्त्राणि)

## ग. पुरत:/अग्रत:, पृष्ठत:, उपरि, अध: इत्यादीनां योगे षष्ठी

**अधोलिखितं गीतं पठत गायत च–**

बालकस्य उपरि व्यजनं चलत् शोभते।
व्यजनस्याध: बाल: शेते।
तस्य वामत: जनक: तिष्ठति।
प्रेङ्खाया: दक्षिणत: जननी तं पश्यति।
जनकस्याग्रे स्थितो हि शुनक:।
शुनकस्य पृष्ठत: स्थितो बिडाल:।
शुनकात् कथं न बिभेति विडाल:?

- **अधोलिखितानां शब्दानां सहायतया तेषां योगे 'षष्ठी' विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत–**

(पुरत:, उपरि, अध:, उत्तरत:, दक्षिणत:, अग्रे, पूर्वत:, पश्चिमत:, पृष्ठत:, अन्त:)

यथा वृक्षस्य **शाखानाम्** उपरि खगा: कूजन्ति। (शाखा)

1. ........................ दक्षिणत: विवेकानन्दस्मारक: अस्ति। (भारत)
2. ........................ पूर्वत: जगन्नाथपुरी अस्ति। (भारत)
3. ........................ उत्तरत: हिमालय: विराजते। (भारत)
4. ........................ पश्चिमत: द्वारिकापुरी वर्तते। (भारत)
5. बसयाने ........................ पृष्ठत: जना: उपविशन्ति। (चालक)
6. ........................ अग्रे मोदकविक्रेतार: सन्ति। (देवालय)
7. ........................ पुरत: सेनानायक: अस्ति। (सैनिक)
8. ........................ अन्त: बीजानि सन्ति। (फल)
9. ........................ अध: जलम् अस्ति। (भूमि)
10. ........................ उपरि मेघा: गर्जन्ति। (पर्वत)

ङ. **निर्धारणे षष्ठी**

**उदाहरणमनुसृत्य रिक्तस्थानपूर्तिं कुरुत।**

**उदाहरणम्** – बालकानां श्रेष्ठः रविः।

1. ........................ श्रेष्ठः रामः। (धनुर्धर)
2. ........................ श्रेष्ठः हनुमान्। (भक्त)
3. ........................ श्रेष्ठं कमलम्। (पुष्प)
4. ........................ श्रेष्ठः मयूरः। (पक्षिन्)
5. ........................ श्रेष्ठः सिंहः (पशु)

## मिश्रितप्रश्नाः

**क. अधोलिखितपद्येषु षष्ठ्यन्तपदानि रेखाङ्कितानि कुरुत–**

1. लुब्धस्य नश्यति यशः पिशुनस्य मैत्री, नष्टक्रियस्य कुलमर्थपरस्य धर्मः।
   विद्याबलं व्यसनिनः कृपणस्य सौख्यं, राज्यं प्रमत्तसचिवस्य नराधिपस्य ।।
2. नरस्य आभरणं रूपं रूपस्याभरणं गुणः।
   गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा।।
3. यस्य दानविहीनस्य धनान्यायान्ति यान्ति च।
   अरण्यकुसुमानीव निरर्थास्तस्य सम्पदः।।

**अस्माभिः अधीतम्**

- सम्बन्धवाचके षष्ठी।
- पठनम्, गमनम् भाववाचकपदानां योगे कर्मपदस्य षष्ठी।
- पुरतः, अग्रतः, पृष्ठतः आदीनां योगेऽपि षष्ठी।
- दिशावाचकानां वामतः/ दक्षिणतः/ उत्तरतः आदीनां योगेऽपि षष्ठी प्रयुज्यते ।
- येषां श्रेष्ठः तत्रापि निर्धारणे षष्ठी।

* * * * *

## ( छ ) सप्तमीविभक्तिप्रयोगः

**क. चित्रं दृष्ट्वा प्रश्नानाम् उत्तराणि लिखत–**



(i) जलं कुत्र अस्ति?

..........................................................

नद्यां जलम् अस्ति।

(ii) लेखनी कुत्र अस्ति?

..........................................................



हस्ते लेखनी अस्ति।



(iii) पुष्पाणि कुत्र सन्ति?

..........................................................

वाटिकायां पुष्पाणि सन्ति।

(iv) भारतस्य मानचित्रं कुत्र अस्ति?

..........................................................



भित्तौ भारतस्य मानचित्रम् अस्ति।




- जलं कुत्र भवति? आरेखं दृष्ट्वा लिखत–

1. जलं सागरे भवति। 2. ..................................................।

3. ..................................................। 4. ..................................................।

5. ..................................................। 6. ..................................................।

7. ..................................................। 8. ..................................................।

9. ..................................................। 10. ..................................................।

## क. आधारे सप्तमी

**अधोलिखितां शृङ्खलां ध्यानेन पठत अवगच्छत च।**

विद्यालये प्रकोष्ठाः, प्रकोष्ठेषु पुस्तकालयः, पुस्तकालये पुस्तकानि, पुस्तकेषु कथाः, कथासु च श्लोकाः, श्लोकेषु च नीतिपरकाः उपदेशाः।

- **अधुना अधोलिखितानां पदानां सहायतया शृङ्खलां पूरयत–**

(i) पाठशाला → वाटिका → वृक्षाः → कुसुमानि → परागः → मधुमक्षिकाः

..........................................................................................................................

..........................................................................................................................

## ख. स्निह्, विश्वस् धात्वोः योगे सप्तमी

**उदाहरणमनुसृत्य वाक्यानि पूरयत–**

(i) माता कन्यायां विशेषतः स्निह्यति।

(ii) अविश्वस्ते न विश्वसेत्।

1. दशरथः .............................. अधिकं स्निह्यति स्म। (कैकेयी)
2. भवन्तः .............................. कदापि न विश्वसन्तु। (दुष्ट)
3. विकृतेषु .............................. मा विश्वसेत्। (वाहन)

4. गुरुः ............................ स्निह्यति। (शिष्य)

5. धेनुः ............................ स्निह्यति। (वत्स)

ग. **यस्मिन् कुशलः / निपुणः / प्रवीणः / पण्डितः तत्र सप्तमी**

**यथा**–अहं भोजनस्य पाचने कुशला। मम मित्रं श्लोकगायने प्रवीणः।

एवमेव पञ्चवाक्यानि लिखत।

1. मम सखी ............................................................। (वाहनचालन)
2. श्रीकृष्णः ............................................................। (वंशीवादन)
3. अर्जुनः ............................................................। (धनुर्विद्या)
4. व्यासः ............................................................। (साहित्यसृजन)
5. राधिका ............................................................। (तबलावादन)

घ. **यस्मिन् अभिलाषः / अनुरागः / स्नेहः / असक्तिः / अनादरः वा तत्र अपि सप्तमी**

**यथा**–शत्रौ अपि अनादरः मा भवेत्। शकुन्तलायां दुष्यन्तस्य अनुरागः।

**रिक्तस्थानानि पूरयत–**

1. बालकस्य ............................ अभिलाषः। (आम्रफल)
2. प्रजानां ............................ अनुरागः। (राजन्)
3. धेनोः ............................ स्नेहः। (वत्स)
4. मम ............................ आसक्तिः। (संस्कृत)
5. तस्य ............................ तीव्रः अभिलाषः। (वायुयान–आरोहण)

ङ. **निर्धारणे षष्ठी सप्तमी वा।**

**उदाहरणम्–** कवीनां / कविषु कालिदासः श्रेष्ठः।
जीवानां / जीवेषु मानवाः श्रेष्ठाः।

◆ **अधोलिखितपदानि प्रयुज्य पञ्च वाक्यानि रचयत।**

1. पुष्पाणाम् / पुष्पेषु ............................................................
2. खगानाम् / खगेषु ............................................................
3. छात्राणाम् / छात्रेषु ............................................................
4. ऋषीणाम् / ऋषिषु ............................................................
5. गायकानाम् / गायकेषु ............................................................

## च. यस्मिन् अङ्गे प्रहारः/ ग्रहणम् इत्यादिकं भवति तत्र सप्तमी

**उदाहरणानुसारं वाक्यानि पूरयत–**

यथा (क) सैनिकः चौरं **कण्ठे** गृहीतवान् (ख) आरक्षकः शत्रुं **पादयोः** प्रहृतवान्।

1. बालकः बालकं ...................... गृहीतवान्। (केश)
2. ...................... न ताडयितव्यम्। (उदर)
3. रामः रावणस्य ...................... खड्गेन प्राहरत्। (कण्ठ)
4. रावणः जटायुं ...................... प्रहृतवान्। (पक्ष)
5. भीमः राक्षसं वृक्षेण ...................... ताडितवान्। (शिरस्)

## छ. समय-बोधकेषु पदेषु सप्तमी

- **अधोलिखितानि पदानि प्रयुज्य निजदिनचर्यां लिखत–**

प्रातःकाले, सार्धसप्तवादने, दशवादने, सार्धद्वादशवादने, एकवादने, सायङ्काले, पञ्चवादने, सप्तवादने, रात्रौ, दशवादने।

यथा– प्रातःकाले अहं षड्वादने उत्तिष्ठामि।

1. सार्धसप्तवादने ..............................................................
2. दशवादने ..............................................................
3. सार्धद्वादशवादने ..............................................................
4. मध्याह्ने एकवादने ..............................................................
5. सायङ्काले पञ्चवादने ..............................................................
6. ..............................................................
7. ..............................................................

## ज. एकस्याः क्रियायाः समाप्तौ यदा अन्या क्रिया प्रारभते तदा समाप्ते कार्ये कर्तरि च सप्तमी

उदाहरणानि पठत–

**रामे वनं गते दशरथः प्राणान् अत्यजत्। सूर्ये उदिते कमलं विकसितम्।**

**एवम् अधोलिखितवाक्यानि पूरयत–**

1. उदिते सवितरि जनाः ..............................................।
2. अस्तङ्गते सूर्ये खगाः ..............................................।
3. पथिके पङ्के निमग्ने व्याघ्रः ..............................................।
4. रावणे हते विभीषणः ..............................................।
5. शत्रौ पराजिते सैनिकाः ..............................................।

**झ. अधोलिखितपद्येषु सप्तम्यन्तपदानि रेखाङ्कितानि कुरुत–**

1. मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
   आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।
2. मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ।
   यादृशी भावना यस्य सिद्धिर्भवति तादृशी।।
3. न काष्ठे विद्यते देवो न पाषाणे न मृण्मये।।
   भावे हि विद्यते देवस्तस्माद् भावो हि कारणम्।
4. सन्निमित्ते वरं त्यागो विनाशे नियते सति।।

**अस्माभिः अधीतम्**

**सप्तमी प्रयुज्यते–**

- आधारे
- स्निह्, विश्वस् धात्वादीनां योगे
- यस्मिन् कुशलः / निपुणः / प्रवीणः / पण्डितः
- यस्मिन् अभिलाषः / अनुरागः / आसक्तिः / स्नेहः
- निर्धारणे षष्ठी सप्तमी वा
- यत्र प्रहारः ग्रहणं वा
- समयबोधकेषु पदेषु

* * * * *

# विहङ्गावलोकनम्

**उपपदविभक्तिः** – यत्र कारकचिह्नानाम् आधारेण न अपितु केषाञ्चन विशेषपदानाम् आधारेण विभक्तीनां प्रयोगः भवति तद् उपपदविभक्तिः इति कथ्यते।

**द्वितीयाविभक्तेः उपपदानि** – परितः (अभितः / सर्वतः), धिक्, प्रति, उभयतः, विना, समया / निकषा।
**तृतीयाविभक्तेः उपपदानि** – विना, अलम्, सह (साकम् / सार्धम् / समम्), सदृश, हीन, अङ्गविकारे।
**चतुर्थीविभक्तेः उपपदानि** – दानार्थे, अलम् (सामर्थ्ये), रुच्, कुप्, क्रुध्, नमः योगे।
**पञ्चमीविभक्तेः उपपदानि** – विना, मा, बहिः, पूर्वम्, भी, रक्ष् योगे।
**षष्ठीविभक्तेः उपपदानि** – उपरि, अधः, पुरतः, पृष्ठतः, वामतः, दक्षिणतः, कृते।
**सप्तमीविभक्तेः उपपदानि** – स्निह्, विश्वस्, कुशल, निपुण।

## द्वितीयाविभक्तेः उपपदानि

**उदाहरणम्** – छात्रः (विद्यालय) **विद्यालयं प्रति** गच्छति।

- पिता (कार्यालय) .................. प्रति गच्छति।
- (ज्ञान) .................. विना जीवनं नास्ति।
- (देवालय) .................. परितः वृक्षाः सन्ति।
- (वाटिका) .................. परितः लताः सन्ति।
- (मन्दिर) .................. उभयतः पुष्पाणि सन्ति।
- धिक् ..................। (चोर)
- छात्रः (विद्यालय) .................. प्रति गच्छति।
- (जल) .................. विना जीवनं नास्ति।
- (विद्यालय) .................. उभयतः यानानि सन्ति।
- (नदी) .................. उभयतः ग्रामाः सन्ति।
- (कार्यालय) .................. उभयतः जनाः सन्ति।
- धिक् ..................। (मूर्ख)

## तृतीयाविभक्तेः उपपदानि

**उदाहरणम्** – अलं **कोलाहलेन** (कोलाहल)।

- पुष्पं (सुगन्ध) **सुगन्धेन** विना न शोभते।
- अलं (चर्चा)।
- अलं .................. (विवाद)।
- सः भिक्षुकः (नेत्र) .................. काणः अस्ति।
- सा महिला (पाद) .................. खञ्जा अस्ति।
- कन्या (जनक) .................. सह गच्छति।
- राकेशः (अध्यापिका) .................. सह वदति।
- सः (अनुजा) .................. सह क्रीडति।
- पुत्री (अम्बा) .................. सह वसति।
- (विद्या) .................. हीनः छात्रः न शोभते।
- (गुणाः) .................. हीनः छात्रः न शोभते।
- अहं (मित्र) .................. सह लिखामि।
- त्वं (भगिनी) .................. सह भ्रमसि।
- (गृहिणी) .................. विना गृहं न शोभते।
- (देशभक्ताः) .................. विना देशः न शोभते।

## चतुर्थीविभक्तेः उपपदानि

उदाहरणम् – (दुर्गा) **दुर्गायै** नमः।

- वृक्षः (मनुष्य) .................. फलं ददाति।
- शिक्षकः (छात्रा) .................. पुस्तकं ददाति।
- निर्वाहकः (प्रयाणिक) .................. चिटिकां ददाति।
- (गणेश) .................. मोदकं रोचते।
- (तत्-पुं०) .................. क्रीडाः रोचन्ते।
- (तत्-स्त्री०) .................. गानं रोचते।
- (किम्-स्त्री०) .................. अध्ययनं रोचते?

- (अस्मद्) **मह्यं** संस्कृतं **रोचते**।
- देवः (भक्त) .................. वरं ददाति।
- पिता (पुत्र) .................. चाकलेहं ददाति।
- (देव) .................. नमः।
- (शिव) .................. नमः।
- (युष्मद्) .................. नृत्यं रोचते।
- (पार्वती) .................. नमः।
- (किम्-पुं०) .................. नृत्यं रोचते?

## पञ्चमीविभक्तेः उपपदानि

उदाहरणम्–माता पुत्रम् (अन्धकार) **अन्धकारात्** रक्षति।

- (गृह) .................. बहिः आतपः अस्ति।
- माता शाटिकां (मास) .................. पूर्वं क्रीतवती।
- (वैशाख) .................. पूर्वं चैत्रमासः भवति।
- (परीक्षा) .................. पूर्वं अध्ययनं भवति।
- मूषकः (मार्जार) .................. बिभेति।
- बालकः (सर्प) .................. बिभेति।
- देवः भक्तं (सङ्कट) .................. रक्षति।
- पिता पुत्रं (दुर्व्यसन) .................. रक्षति।

(विद्यालय) **विद्यालयात्** बहिः मार्गः अस्ति।

- देवः भक्तं (दुर्जन) .................. रक्षति।
- सः (अन्धकार) .................. बिभेति।
- (दीपोत्सव) .................. पूर्वं विजयादशमी भवति।
- (सोमवासर) .................. पूर्वं रविवासरः भवति।
- मार्जारः (शुनक) .................. बिभेति।
- छात्राः (प्रधानाचार्या) .................. भयं कुर्वन्ति।
- वृक्षः सर्वान् (आतप) .................. रक्षति।
- माता पुत्रीं (दुष्ट) .................. रक्षति।

## षष्ठीविभक्तेः उपपदानि

उदाहरणम्–(पुष्प) **पुष्पस्य** उपरि भ्रमराः उपविशन्ति।

- (वृक्ष) .................. उपरि खगाः वसन्ति।
- (गृह) .................. पुरतः मार्गः अस्ति।
- भिक्षुकः (कारयान) .................. पृष्ठतः धावति।
- (पुरुष) .................. वामतः महिला अस्ति।
- माता (परिवार) .................. कृते भोजनं पचति।

पिता (अस्मद्) **मम कृते** वस्त्रं क्रीणाति।

- भवत्याः लेखनी (उत्पीठिका) ........... अधः अस्ति।
- (भूमि) .................. अधः जलम् अस्ति।
- (कवि) .................. कालिदासः श्रेष्ठः।
- (भारत) ............. दक्षिणतः हिन्दमहासागरः अस्ति।
- वृक्षाः (परोपकार) .................. कृते फलन्ति।

## सप्तमीविभक्तेः उपपदानि

**उदाहरणम्** – माता (पुत्र) **पुत्रे** स्निह्यति। सोनाली (भाषण) **भाषणे** निपुणा अस्ति।

- अनिलः (नृत्य) ………………… निपुणः अस्ति।
- माता (पुत्र) ………………… स्निह्यति।
- तेनालीरामः (न्याय) ………………… चतुरः अस्ति।
- मिल्खासिंहः (धावन) ………………… वीरः अस्ति।
- अर्जुनः (धनुर्विद्या) ………………… विख्यातः।
- चित्रकारः (चित्रकला) ………………… कुशलः अस्ति।
- पिता (पुत्री) ………………… विश्वसिति।
- राजनेता (भाषण) ………………… चतुरः अस्ति।
- शिक्षकः (पाठन) ………………… योग्यः अस्ति।
- भीमः (गदायुद्ध) ………………… विश्वप्रसिद्धः।

## मिश्रितप्रश्नाः

### क. उचितविकल्पं चित्वा रिक्तस्थानपूर्तिं कुरुत–

1. मेवाडाधिपतिः अरण्ये विश्वासपात्रैः ………………… सह शिलायाम् उपविष्टः आसीत्।
   (क) भटाः (ख) भटैः (ग) भटेभ्यः (घ) भटान्
2. पञ्चतन्त्रे वर्णितम् अस्ति यत् ………………… विना मनुष्यस्य जीवनं व्यर्थम् अस्ति।
   (क) विद्या (ख) विद्यायै (ग) विद्याम् (घ) विद्यायाम्
3. आत्मानं मुषितं मन्यमानः ………………… परं विषादम् अगच्छत्।
   (क) ब्राह्मणः (ख) ब्राह्मणेन (ग) ब्राह्मणाय (घ) ब्राह्मणस्य
4. हे श्वेतकेतो! ………………… प्रति अध्ययनार्थं गच्छ।
   (क) गुरुणा (ख) गुरुः (ग) गुरवे (घ) गुरुम्
5. तदा ………………… उपरि एका बलाका विष्ठाम् उदसृजत्।
   (क) मुनेः (ख) मुनिः (ग) मुनिना (घ) मुनिभ्यः

### ख. कोष्ठकात् उचितं विकल्पं चित्वा रिक्तस्थानपूर्तिं कुरुत–

1. ………………… अधः स्थितिर्भवति। (पयोधिः / पयोधिम् / पयोधीनाम्)
2. सेनायाः भोजनसामग्र्याः च अभावेन प्रतापः ……… एव स्वदेशं स्वतन्त्रं कर्तुम् इच्छति। (प्राणान्/प्राणैः/प्राणाः)
3. अष्टावक्रः ………………… सह क्रीडित्वा गृहं प्रत्यावृत्तः। (मित्रैः / मित्राणि / मित्राणाम्)
4. अहं ………………… किञ्चित् दातुम् इच्छामि। (भवन्तम् / भवन्तः / भवद्भ्यः)
5. जलबिन्दवः ………………… उपरि पतित्वा मधुरसङ्गीतं जनयन्ति। (शुष्कपर्णानि / शुष्कपर्णेभ्यः / शुष्कपर्णानाम्)

## ग. उचितविभक्तिं संयोज्य रिक्तस्थानपूर्तिं कुरुत–

1. राजा ........................ (तन्तुवाय) स्वर्णमुद्राः अर्पयति।
2. नालन्दाविश्वविद्यालये .................... (बौद्धदर्शन) सह कृषिः, आयुर्वेदः, पशुविज्ञानादीनि अपि अध्यापितानि।
3. राजा ........................ (दुष्ट) कुप्यति।
4. ........................ (कक्षा) बहिः कः तिष्ठति?
5. माता ........................ (पुत्र) स्निह्यति।
6. नव्या ........................ (रुचिरा) विना न क्रीडति।
7. मोहितः ........................ (श्रेयांशु) लेखनीं ददाति।
8. आरुषः ........................ (भूमि) सह चर्चां करोति।
9. आरवः ........................ (शिक्षक) विश्वसिति।
10. ........................ (अक्षज) आम्रफलं रोचते।

## घ. रिक्तस्थानपूर्तिं कुरुत–

पुरा कस्मिंश्चित् .................. (नगर) मायादासः नाम नृपः आसीत्। सः प्रभूतं .................. (सुवर्ण) वाञ्छति स्म। एकदा कश्चन मुनिः .................. (नृप) प्रासादम् आगतः। राजा अवदत् ''नमः .................. (मुनि), मम आतिथ्यं स्वीकरोतु।'' राज्ञः .................. (सत्कार) सन्तुष्टः मुनिः .................. (नृप) एकं वरम् अयच्छत्, अवदत् च हे राजन्! यत् .................. (युष्मद्) रोचते तत् वद। मायादासः प्रार्थितवान् – हे .................. (मुनि)! .................. (अस्मद्) स्पृष्टं सर्वं सुवर्णं भवतु इति। मुनिः तथास्तु इति उक्त्वा .................. (प्रासाद) बहिः निर्गतः। .................. (सुवर्ण) अनुरक्तः नृपः यत् वस्तुजातं स्पृष्टवान् तदेव ............................... (वस्तु) सुवर्णमयं जातम्। .................. (उद्यान) परितः भ्रान्त्वा सः सर्वान् .................. (वृक्ष) अस्पृशत्। ते सर्वे वृक्षाः .................. (सुवर्णमय) जाताः। तृषापीडितः सः .................. (जल) पातुम् इष्टवान्। तदपि .................. (सुवर्णमय) जातम्। एवमेव भोजनमपि .................. (सुवर्णमय) जातम्। तस्य .................. (नेत्र) अश्रूणि अपतन्। तदा तस्य पुत्री .................. (नृप) समीपम् आगता। .............. (नृप) स्पृष्टा साऽपि ................ (सुवर्णमय) जाता। अत्यन्तदुःखितो नृपः पुनः .................. (मुनि) समीपं गतः। नृपः .................. (मुनि) पादयोः पतित्वा क्षमाम् अयाचत ''मम .................. (कनक) न अभिलाषः। मम पुत्री मम वाटिका च यथावत् भवतु। किं मे .............. (कनक) प्रयोजनं यदाऽहं बुभुक्षितः पिपासितः मरिष्यामि।'' मुनिः ............... (जलपात्र) जलम् आदाय .................. (भूपति) अयच्छत् अकथयत् च ''गच्छ! एतत् जलं कस्यचिदेकस्य .................. (वस्तु) उपरि यदा पात्यते तदा सर्वाणि .................. (वस्तु) प्राकृतरूपे परिवर्तितानि भविष्यन्ति। तव वरशक्तिरपि लुप्ता भविष्यति।'' मायादासः .................. (जल) आदाय .................. (पुत्री) उपरि अपातयत्। सर्वम् उद्यानमपि तत्क्षणमेव यथावत् सञ्जातम्। अतएव उच्यते– **लोभः व्याधिरनन्तकः।**

# षष्ठः अभ्यासः

# प्रत्यय-प्रयोगः

## ( क ) क्त्वा-प्रत्ययः

➢ अधोलिखितानि वाक्यानि ध्यानेन पठन्तु अवगच्छन्तु च-

| | |
|---|---|
| छात्रः पाठं पठति। उत्तरं लिखति। | छात्रः पाठं **पठित्वा** उत्तरं लिखति। |
| बालकः उत्तरं लिखति। दर्शयति। | बालकः उत्तरं **लिखित्वा** दर्शयति। |
| अम्बा हसति। पुत्रं वदति। | अम्बा **हसित्वा** पुत्रं वदति। |
| मातामहः विदेशं भ्रमति। आगच्छति। | मातामहः विदेशं **भ्रमित्वा** आगच्छति। |
| यात्रिकः रसगोलकं खादति। जलं पिबति। | यात्रिकः रसगोलकं **खादित्वा** जलं पिबति। |

➢ यदा एकः एव कर्ता क्रियाद्वयं त्रयं चतुष्टयं वा क्रमशः करोति तदा क्रमशः पूर्वकालिक-क्रियायाः क्रियाणां वा स्थाने क्त्वा-प्रत्ययस्य प्रयोगः भवति।

➢ क्त्वा-प्रत्ययः पूर्वक्रियायाः समाप्तिम् अपरक्रियायाः आरम्भं च सूचयति। क्त्वा-प्रत्ययस्य केवलं 'त्वा' अवशिष्यते। यथा- पठित्वा, लिखित्वा, हसित्वा इत्यादयः।

❖ अधः प्रदत्तेषु वाक्येषु प्रथमवाक्यस्य क्रिया-स्थाने क्त्वाप्रत्ययं प्रयुज्य वाक्यं रचयन्तु-

सुरेशः गच्छति। सः फलानि आनयति। ..............................

कमला धावति। कन्दुकं गृह्णाति। ..............................

उषा खादति। सा भ्रमति। ..............................

मयूरः नृत्यति। सः वृक्षे विश्राम्यति। ..............................

महिला हास्यकथां शृणोति। सा उच्चैः हसति। ..............................

❖ अधोलिखितेषु वाक्येषु कोष्ठके प्रदत्तैः धातुभिः सह क्त्वा प्रत्ययं योजयित्वा रिक्तस्थानानि पूरयन्तु-

बालः सिंहं (दृश्) .................. त्रस्यति।

व्याधः जालं (क्षिप्) .................. कपोतान् ग्रहीष्यति।

काश्मीरं (गम्) .................. वयं प्राकृतिकं सौन्दर्यं द्रक्ष्यामः।

मनीषः आलस्यं (त्यज्) .................. स्वाध्यायपरः अस्ति।

छात्रः गुरुं (नम्) .................. पठति।

| | क्रिया | प्रकृतिः+प्रत्ययः | रूपम् | वाक्यानि |
|---|---|---|---|---|
| ♦ | पठति | पठ्+क्त्वा | पठित्वा | छात्रः पाठं पठति। उत्तरं लिखति। |
| | | | | छात्रः पाठं **पठित्वा** उत्तरं लिखति। |
| ♦ | लिखति | लिख्+क्त्वा | लिखित्वा | बालकः उत्तरं लिखति। दर्शयति। |
| | | | | बालकः उत्तरं .................... दर्शयति। |
| ♦ | हसति | हस्+क्त्वा | हसित्वा | अम्बा हसति। पुत्रं वदति। |
| | | | | अम्बा .................... पुत्रं वदति। |
| ♦ | भ्रमति | भ्रम्+क्त्वा | भ्रमित्वा/भ्रान्त्वा | मातामहः विदेशं भ्रमति। आगच्छति। |
| | | | | मातामहः विदेशं .................... आगच्छति। |
| ♦ | खादति | खाद्+क्त्वा | खादित्वा | यात्रिकः रसगोलकं खादति। जलं पिबति। |
| | | | | यात्रिकः रसगोलकं .................... जलं पिबति। |
| ♦ | क्रीडति | क्रीड्+क्त्वा | क्रीडित्वा | क्रीडकः सम्यक् क्रीडति। पुरस्कारं प्राप्नोति। |
| | | | | क्रीडकः सम्यक् .................... पुरस्कारं प्राप्नोति। |
| ♦ | मिलति | मिल्+क्त्वा | मिलित्वा | सर्वे मिलन्ति। परस्परं चर्चां कुर्वन्ति। |
| | | | | सर्वे .................... परस्परं चर्चां कुर्वन्ति। |
| ♦ | निन्दति | निन्द्+क्त्वा | निन्दित्वा | दुर्जनः सज्जनं निन्दति। सन्तुष्टः भवति। |
| | | | | दुर्जनः सज्जनं .................... सन्तुष्टः भवति। |
| ♦ | रक्षति | रक्ष्+क्त्वा | रक्षित्वा | सज्जनः धर्मं रक्षति। समाजे तिष्ठति। |
| | | | | सज्जनः धर्मं .................... समाजे तिष्ठति। |
| ♦ | रोदिति | रुद्+क्त्वा | रुदित्वा | शिशुः रोदिति। भोजनं याचते। |
| | | | | शिशुः .................... भोजनं याचते। |
| ♦ | सिञ्चति | सिच्+क्त्वा | सिक्त्वा | कृषकः क्षेत्रं सिञ्चति। आनन्दम् अनुभवति। |
| | | | | कृषकः क्षेत्रं .................... आनन्दम् अनुभवति। |
| ♦ | चिन्तयति | चिन्त्+क्त्वा | चिन्तयित्वा | त्वं सम्यक् चिन्तय। निर्णयं कुरु। |
| | | | | त्वं सम्यक् .................... निर्णयं कुरु। |
| ♦ | सूचयति | सूच्+क्त्वा | सूचयित्वा | सर्वदा अध्यापिकां सूचयतु। कक्ष्यायाः बहिः गच्छतु। |
| | | | | सर्वदा अध्यापिकां .................... कक्ष्यायाः बहिः गच्छतु। |
| ♦ | वदति | वद्+क्त्वा | उदित्वा | अधिकारी सूचनां वदति। गच्छति। |
| | | | | अधिकारी सूचनाम् .................... गच्छति। |
| ♦ | गच्छति | गम्+क्त्वा | गत्वा | अध्यापकः विद्यालयं गच्छति। छात्रान् पाठयति। |
| | | | | अध्यापकः विद्यालयं .................... छात्रान् पाठयति। |
| ♦ | नमति | नम्+क्त्वा | नत्वा | भक्ताः देवं नमन्ति। कार्यारम्भं कुर्वन्ति। |

| | | | |
|---|---|---|---|
| | | | भक्ताः देवं ..................कार्यारम्भं कुर्वन्ति। |
| जानाति | ज्ञा+क्त्वा | ज्ञात्वा | सः विषयं जानाति। वदति। |
| | | | सः विषयं ..................वदति। |
| ददाति | दा+क्त्वा | दत्त्वा | पिता धनं ददाति। कार्यालयं गच्छति। |
| | | | पिता धनं .................. कार्यालयं गच्छति। |
| शृणोति | श्रु+क्त्वा | श्रुत्वा | नर्तकः गीतं शृणोति। नृत्यं करोति। |
| | | | नर्तकः गीतं .................. नृत्यं करोति। |
| करोति | कृ+क्त्वा | कृत्वा | सेवकः कार्यं करोति। गृहं गच्छति। |
| | | | सेवकः कार्यं .................. गृहं गच्छति। |
| स्मरति | स्मृ+क्त्वा | स्मृत्वा | पुत्री पाठं स्मरति। स्वपिति। |
| | | | पुत्री पाठं .................. स्वपिति। |
| जिघ्रति | घ्रा+क्त्वा | घ्रात्वा | अम्बा मरीचिकां जिघ्रति। क्रीणाति। |
| | | | अम्बा मरीचिकां .................. क्रीणाति। |
| स्नाति | स्ना+क्त्वा | स्नात्वा | पितामही स्नाति। पूजां करोति। |
| | | | पितामही .................. पूजां करोति। |
| वहति | वह्+क्त्वा | उढ्वा | निर्धनः भारं वहति। जीविकोपार्जनं करोति। |
| | | | निर्धनः भारम् .................. जीविकोपार्जनं करोति। |
| भवति | भू+क्त्वा | भूत्वा | एषः सैनिकः भवति। देशसेवां करोति। |
| | | | एषः सैनिकः .................. देशसेवां करोति। |
| त्यजति | त्यज्+क्त्वा | त्यक्त्वा | भवान् दुर्गुणं त्यजति। सज्जनः भवति। |
| | | | भवान् दुर्गुणं .................. सज्जनः भवति। |
| पश्यति | दृश्+क्त्वा | दृष्ट्वा | बालः मातरं पश्यति। आनन्दम् अनुभवति। |
| | | | बालः मातरं .................. आनन्दम् अनुभवति। |
| पृच्छति | प्रच्छ्+क्त्वा | पृष्ट्वा | अधिवक्ता प्रश्नं पृच्छति। आसन्दे उपविशति। |
| | | | अधिवक्ता प्रश्नं .................. आसन्दे उपविशति। |
| पचति | पच्+क्त्वा | पक्त्वा | अम्बा भोजनं पचति। बालेभ्यः परिवेशयति। |
| | | | अम्बा भोजनं .................. बालेभ्यः परिवेशयति। |
| जयति | जी+क्त्वा | जित्वा | सैनिकः युद्धं जयति। पारितोषिकं प्राप्नोति। |
| | | | सैनिकः युद्धं .................. पारितोषिकं प्राप्नोति। |
| तिष्ठति | स्था+क्त्वा | स्थित्वा | सैनिकाः सीमाक्षेत्रे तिष्ठन्ति। देशं रक्षन्ति। |
| | | | सैनिकाः सीमाक्षेत्रे .................. देशं रक्षन्ति। |
| पिबति | पा+क्त्वा | पीत्वा | शिशुः दुग्धं पिबति। शयनं करोति। |

| | | | |
|---|---|---|---|
| | | | शिशुः दुग्धं .................... शयनं करोति। |
| ◆ गायति | गै+क्त्वा | गीत्वा | गायिका गीतं गायति। जनान् तोषयति। |
| | | | गायिका गीतं .................... जनान् तोषयति। |
| ◆ तरति | तॄ+क्त्वा | तीर्त्वा | नाविकः नदीं तरति। पारं गच्छति। |
| | | | नाविकः नदीं .................... पारं गच्छति। |
| ◆ क्रीणाति | क्री+क्त्वा | क्रीत्वा | पिता चाकलेहं क्रीणाति। बालाय ददाति। |
| | | | पिता चाकलेहं .................... बालाय ददाति। |
| ◆ नयति | नी+क्त्वा | नीत्वा | भवन्तः पुस्तकानि नयन्ति। विद्यालयं गच्छन्ति। |
| | | | भवन्तः पुस्तकानि .................... विद्यालयं गच्छन्ति। |
| ◆ गृह्णाति | ग्रह्+क्त्वा | गृहीत्वा | आरक्षकः चौरं गृह्णाति। ताडयति। |
| | | | आरक्षकः चौरं .................... ताडयति। |
| ◆ नृत्यति | नृत्+क्त्वा | नर्तित्वा | नर्तकी नृत्यति। धनं स्वीकरोति। |
| | | | नर्तकी .................... धनं स्वीकरोति। |

◆ **प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत–**

1. अत्रान्तरे ब्राह्मणोऽपि श्राद्धं **गृहीत्वा** .................... + .................... गृहम् उपावृत्तः।
2. प्रतापं निराशं **दृश् + क्त्वा** .................... भिल्लाः दुःखीयन्ति।
3. एतत् **चिन्तयित्वा** .................... + .................... राजा सभां कारितवान्।
4. नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम् इति **वच्+क्त्वा** .................... पुत्रान् समर्पितवान्।
5. कञ्चन मांसक्रयिणं **गत्वा** .................... + .................... एतत् पृच्छ।
6. अहं तौ **स्ना (णिच्) + क्त्वा** .................... स्नामि।
7. अहं पितरौ **भोजयित्वा** .................... + .................... खादामि।
8. अहं पितरौ **शीङ् (णिच्) + क्त्वा** .................... स्वपिमि।
9. अहं मांसानि स्वधर्मं इति **मत्वा** .................... + .................... वृत्त्यर्थं विक्रीणे।
10. अद्भुतं प्रश्नं **श्रु+क्त्वा** .................... श्वेतकेतुः अपृच्छत्।
11. अष्टावक्रः मित्रैः सह **क्रीडित्वा** .................... + .................... गृहं प्रत्यावृतः।
12. एषः अस्माभिः सह शास्त्रार्थं करिष्यति इति **ज्ञा+क्त्वा** .................... ते स्मितम् अकुर्वन्।
13. जलबिन्दवः **पतित्वा** .................... + .................... ध्वनिं कुर्वन्ति।
14. गभीराध्ययनं **कृ+क्त्वा** .................... अभूतपूर्वाः सिद्धयः सम्प्राप्ताः।
15. भक्तः देवं **नत्वा** .................... + .................... नैवेद्यं वितरति।
16. रामः मुनिवेशं **धृ+क्त्वा** .................... वनम् अगच्छत्।

✱ ✱ ✱ ✱ ✱

## ( ख ) ल्यप् प्रत्यय

◆ अधः प्रदत्तानि वाक्यानि ध्यानेन पठन्तु अवगच्छन्तु च-

| | | |
|---|---|---|
| (क) | पुत्रः मातापितरौ नत्वा विद्यालयं गच्छति। | (नम्+क्त्वा) |
| | पुत्रः मातापितरौ **प्रणम्य** विद्यालयं गच्छति। | (प्र+नम्+ल्यप्) |
| (ख) | छात्राः शिक्षकं लोकयित्वा ध्यानेन श्रृण्वन्ति। | (लोक्+क्त्वा) |
| | छात्राः शिक्षकं **विलोक्य** ध्यानेन श्रृण्वन्ति। | (वि+लोक्+ल्यप्) |
| (ग) | भक्तः शिवं पूजयित्वा सुखं लभते। | (पूज्+क्त्वा) |
| | भक्तः शिवं **सम्पूज्य** सुखं लभते। | (सम्+पूज्+ल्यप्) |
| (घ) | सेवकः स्वामिनं सूचयित्वा आनन्दम् अनुभवति। | (सूच्+क्त्वा) |
| | सेवकः स्वामिनं **संसूच्य** आनन्दम् अनुभवति। | (सम्+सूच्+ल्यप्) |
| (ङ) | मालिनी सुरेखायै पुष्पगुच्छं दत्त्वा जन्मदिने वर्धापनम् अर्पयति। | (दा+क्त्वा) |
| | मालिनी सुरेखायै पुष्पगुच्छं **प्रदाय** जन्मदिने वर्धापनम् अर्पयति। | (प्र+दा+ल्यप्) |

**ध्यातव्यम् :-**

- उपरि लिखितेषु वाक्येषु अस्माभिः अवलोकितं यत् नत्वा स्थाने प्रणम्य, लोकयित्वा-विलोक्य, पूजयित्वा-सम्पूज्य, सूचयित्वा-संसूच्य, दत्त्वा-प्रदाय इत्यादीनि पदानि प्रयुक्तानि।
- उपसर्गयुक्तैः धातुभिः सह क्त्वा-प्रत्ययस्य स्थाने ल्यप्-प्रत्ययस्य प्रयोगः भवति।
- ल्यप्-प्रत्ययस्य धातुभिः सह प्रयोगसमये **'य'** एव अवशिष्यते।
- ल्यप्-प्रत्ययेन युक्तं पदम् अव्ययं भवति।

◆ प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत-

1. माधवस्य भार्या बालरक्षार्थं नकुलम् **अव+स्था ( णिच् )+ल्यप्** .............. स्नातुं गता।
2. इमं पुत्रनिर्विशेषं नकुलं बालरक्षायां **व्यवस्थाप्य** .............. +.............. +.............. + .............. गच्छामि।
3. बालकोऽनेन खादितः इति **अव+धृ ( णिच् )+ल्यप्** .............. नकुलं व्यापादितवान्।
4. उपकारकं नकुलं मृतं **निरीक्ष्य** .............. +.............. + .............. विषादम् अगच्छत्।
5. राजपुत्रः राजोचितं **प्र+नम्+ल्यप्** .............. जयघोषं करोति।
6. प्रतापोऽपि स्वदेशं **परित्यज्य** .............. +.............. + .............. अन्यत्र प्रस्थितः।
7. वृक्षम् **आ+रुह्+ल्यप्** .............. दृश्यताम्।
8. अतः सर्वथा दैवम् आलस्यं च **विहाय** .............. +.............. + .............. पुरुषार्थः विधेयः।
9. मुनिः ब्राह्मणगृहं **प्र+आप्+ल्यप्** .............. भिक्षामयाचत।

10. सा **विहस्य** ............ + ............ + ............ अभाषत।

11. तत् **आ+कर्ण्+ल्यप्** ............ मुनिर्विस्मितः जातः।

12. सः मुनिः **समन्विष्य** ............ + ............ + ............ + ............ तत्र उपागच्छत्।

13. धर्मव्याधस्य सर्वं क्रियाविधिम् **अव+लोक्+ल्यप्** ............ परितुष्टः मुनिः गतवान्।

14. सः पुत्रः आचार्यम् **उपेत्य** ............ + ............ + ............ सर्वान् वेदान् सार्थान् अधीतवान्।

15. सः श्वेतकेतुः वेदान् **अधि+इ+ल्यप्** ............ पितुः सकाशम् आगच्छत्।

16. इदं **निशम्य** ............ + ............ + ............ अष्टावक्रः प्रत्यवदत्।

17. तस्य वक्रदेहं **वि+ईक्ष्+ल्यप्** ............ पण्डिताः तारस्वरेण अहसन्।

18. तं हसन्तं **विलोक्य** ............ + ............ + ............ विद्वांसः स्तब्धाः अभवन्।

19. सभां **प्र+विश्+ल्यप्** ............ पश्यामि यत् एते पण्डिताः मम वक्रदेहं दृष्ट्वा हसन्ति।

20. भवतः दानशीलतां **समाकर्ण्य** ............ + ............ + ............ + ............ समागतोऽस्मि।

21. नगरपालं **सम्+आ+ह्वे+ल्यप्** ............ आदिश्यताम्।

22. नगरे कृतनिवासम् अपठितं जनं **निःसार्य** ............ + ............ + ............ एषः पण्डितवरः वासयितव्यः।

23. भोजः क्षणं **वि+चर् ( णिच् )+ल्यप्** ............ अवदत्।

24. तन्तुवायः राजानम् **अभिवाद्य** ............ + ............ + ............ गृहं प्रयाति।

25. आह्लादकरं शब्दम् **अनु+सृ+ल्यप्** ............ मुनिः अग्रे गतः।

26. एतत् **अवगत्य** ............ + ............ + ............ सः अग्रे गतः।

27. सः तृषाकुलतां **वि+स्मृ+ल्यप्** ............ आश्रमम् आगच्छत्।

- **प्रथमवाक्यस्य वृत्तान्तर्गतेन क्रियापदेन सह 'ल्यप्' प्रत्ययं प्रयुज्य वाक्यमेकं रचयत।**

1. शिष्यः विद्यालयं (प्रविशति) सः गुरुं प्रणमति।

   शिष्यः विद्यालयं **प्रविश्य** गुरुं प्रणमति।

2. छात्रा सुधाखण्डम् (आनयति)। सा श्यामपट्टे लिखति।

   ..........................................................................................

3. वानरः वृक्षम् (आरोहति)। सः जम्बूफलानि पातयति।

   ..........................................................................................

4. आरक्षकाः सीमाप्रदेशं (प्राप्नुवन्ति) ते देशं रक्षन्ति।

   ..........................................................................................

5. देशभक्ताः मातृभूमिं (प्रणमन्ति)। ते सुखं लभन्ते।

   ..........................................................................................

# मिश्रितप्रश्नाः

**क. अधोलिखितवाक्येषु रेखाङ्कितपदे तुमुन् / क्त्वा / ल्यप् इति प्रत्ययाः प्रयुक्ताः। चित्रानुसारं तेषाम् अर्थं प्रयोगं च अवगच्छन्तु–**

1. बालकः <u>**स्नातुं**</u> गच्छति।
2. सः <u>**स्नात्वा**</u> वस्त्राणि धारयति।
3. सुशीला दुग्धं <u>**क्रेतुं**</u> गच्छति।
4. दुग्धं <u>**क्रीत्वा**</u> आगच्छति।
5. अहं <u>**पठितुं**</u> वाचनालयं गच्छामि।
6. अहं <u>**पठित्वा**</u> आपणं प्रविशामि।
7. खगाः <u>**विहर्तुम्**</u> आकाशे उड्डयन्ते।
8. ते <u>**विहृत्य**</u> नीडेषु प्रविशन्ति।












**ख. अधोलिखितेषु वाक्येषु कोष्ठके निर्दिष्टधातोः तुमुन्/क्त्वा-प्रत्ययान्तपदेन रिक्तस्थानानि पूरयत–**

1. धेनवः <u>**चरितुं**</u> क्षेत्रं गच्छन्ति। (चर्)
   ताः <u>**चरित्वा**</u> गृहम् आगच्छन्ति।
2. रमेशः भोजनं .................... पाकशालाम् उपविशति। (कृ)
   सः भोजनं .................... हस्तौ प्रक्षालयति।
3. सरला ईश्वरं .................... मालां जपति। (स्मृ)
   सा ईश्वरं .................... शान्तिम् आप्नोति।
4. बालाः .................... उपवनं धावन्ति। (क्रीड्)
   ते .................... स्वस्वगृहं गच्छन्ति।
5. मूषकं .................... मार्जारः धावति। (ग्रह्)
   तं .................... मार्जारः भक्षयति।

**ग. अधः सम्भाषणे केचन शब्दाः 'क्त्वा' 'ल्यप्' 'तुमुन्'-प्रत्ययान्ताः सन्ति। तान् चित्वा समक्षं दत्ते रिक्तस्थाने लिखन्तु।**

| | | | |
|---|---|---|---|
| **सुधेशः** | – | मनीषे! अहं पठित्वा वृक्षम् आरोहामि। | (पठित्वा) |
| **मनीषा** | – | सुधेश! वृक्षम् आरुह्य किं करोमि? | 1. (....................) |
| **सुधेशः** | – | अत्र आगत्य स्वयम् एव पश्य। | 2. (....................) |
| **मनीषा** | – | परम् अहं वृक्षम् आरोढुं न शक्नोमि। | 3. (....................) |

**सुधेशः** – अस्तु! अहं पक्वानि आम्राणि पातयामि।
तानि निरीक्ष्य गणयित्वा च करण्डके स्थापय। 4. (.................... ....................)

**मनीषा** – शीघ्रं कुरु वानराः आगच्छन्ति। तान् दृष्ट्वा अहं भीता। 5. (............................)

**सुधेशः** – आम्राणि गृहीत्वा धावित्वा च गृहं गच्छ। 6. (.................... ....................)

**मनीषा** – त्वम् अचिरात् कूर्दित्वा अवलम्ब्य अधः आगच्छ। 7. (.................... ....................)
(उभौ उत्प्लुत्य गृहं धावतः) (............................)

**घ. गोविन्दः धनिकपरिवारस्य एकः उदारः आदर्शः च बालकः। सः प्रतिदिनं किं किं करोति इति अधोलिखितवाक्येषु कोष्ठके प्रदत्तौ प्रकृतिप्रत्ययौ संयोज्य उदाहरणानुसारं वाक्यानि रचयन्तु।**

| | | | |
|---|---|---|---|
| गोविन्दः | पाठं (पठ्+क्त्वा) गृहम् आगच्छति। | 1. | गोविन्दः पाठं **पठित्वा** गृहम् आगच्छति। |
| | विद्यालयात् (आ+गम्+ल्यप्) भोजनं खादति। | 2. | ........................................................ |
| | प्रातः (भ्रम्+तुमुन्) उद्यानं गच्छति। | 3. | ........................................................ |
| | पुस्तकानि (क्री+तुमुन्) जनकेन सह याति। | 4. | ........................................................ |
| | प्रसन्नः (भू+क्त्वा) सर्वान् प्रीणयति। | 5. | ........................................................ |
| | वृक्षेभ्यः जलं (दा+क्त्वा) पर्यावरणं रक्षति। | 6. | ........................................................ |
| | रामायणं (सम्+पठ्+ल्यप्) शान्तिं लभते। | 7. | ........................................................ |
| | दीनेभ्यः धनादिकं (प्र+दा+ल्यप्) समाजं सेवते। | 8. | ........................................................ |

**ङ. अधोदत्तायां तालिकायां पञ्चकर्तारः यैः पृथक् पृथक् कार्यं क्रियते। कर्तारम् आश्रित्य दशवाक्यानि रचयन्तु।**

| | | | |
|---|---|---|---|
| रेखा | गृहं | गत्वा | पठति |
| पङ्कजः | क्रीडनकानि | क्रेतुं | गच्छति |
| मित्रं | वेदान् | अधीत्य | प्रसीदति |
| सः | देशं | रक्षितुं | सङ्कल्पते |
| सा | दुग्धं | पीत्वा | वर्धते |

1. पङ्कजः वेदान् अधीत्य प्रसीदति

2. ........................................................................................।

3. ........................................................................................।

4. ........................................................................................।

5. ........................................................................................।

6. ........................................................................................।

7. ........................................................................................।

8. ........................................................................................।

9. ........................................................................................।

10 ........................................................................................।



च.

| | किं किं कृत्वा | किं किं च न कृत्वा |
|---|---|---|
| 1. | गङ्गाजलं (पा+क्त्वा) | असत्यं न (वद्+क्त्वा) |
| 2. | अम्बां (सेव्+क्त्वा) | न दु:खी (भू+क्त्वा) |
| 3. | प्रातः (उत्+स्था+ल्यप्) | न उद्याने (परि+भ्रम+ल्यप्) |
| 4. | दुग्धम् (आ+पा+ल्यप्) | न अस्वस्थतां (प्र+आप्+ल्यप्) |
| 5. | सज्जनान् (परि+त्रै+ल्यप्) | न दुर्जनान् (उप+सेव्+ल्यप्) |
| 6. | मृगचर्मणि (उप+विश्+ल्यप्) | न अनीश्वरं (दानवं) (सम्+स्तु+ल्यप्) |

**विकासः जीवनं यापयति।**

**उदाहरणम् :**

1. विकासः गङ्गाजलं पीत्वा असत्यं न उदित्वा जीवनं यापयति।

2. ........................................................................................।

3. ........................................................................................।

4. ........................................................................................।

5. ........................................................................................।

6. ........................................................................................।

छ. अत्र चित्रस्य मध्ये ल्यप् प्रत्ययस्य 'य' वर्तते। कोष्ठकेभ्यः 'उपसर्ग + धातु + य' योगेन पदानि रचयन्तु।

**यथा** – परि + श्रम् + य = परिश्रम्य

1. .......................................
2. .......................................
3. .......................................
4. .......................................
5. .......................................
6. .......................................
7. .......................................
8. .......................................
9. .......................................
10. .......................................
11. .......................................
12. .......................................
13. .......................................
14. .......................................




* * * * *

## ( ग ) तुमुन् प्रत्यय

**क. अधोलिखितवाक्येषु रेखाङ्कितपदैः सह 'तुमुन्' प्रत्ययः प्रयुक्तः। तस्य प्रयोगम् अर्थं च अवगच्छन्तु प्रश्ननिर्माणं च कुर्वन्तु।**

यथा–1. अहं प्रधानमन्त्रिणः भाषणं **श्रोतुं** रक्तदुर्गं गच्छामि। (श्रु)

**प्रश्नः–** त्वं किं कर्तुं रक्तदुर्गं गच्छसि? (कृ)

2. मालाकारः पुष्पाणि **चेतुम्** उद्यानं गच्छति। (चि)

.............................................................

.............................................................



3. अर्जुनः **योद्धुम्** उद्यतः अस्ति। (युध्)

.............................................................

.............................................................



4. त्वं पुराणं **पठितुम्** इच्छसि। (पठ्)

.............................................................

.............................................................



5. जनकः गङ्गायां **स्नातुं** हरिद्वारम् अगच्छत्। (स्ना)

.............................................................

.............................................................



- **मञ्जूषायां प्रदत्तपदैः अधोलिखितानि वाक्यानि पूरयन्तु-**

(खादितुम्, क्रेतुम्, गन्तुम्, दातुम्, कर्तुम्)

1. छात्राः जन्तुशालां .................... पङ्क्तिबद्धाः तिष्ठन्ति।
2. दानशीलाः वस्त्राणि .................... आगच्छन्ति।
3. सभायां शान्तिव्यवस्थां .................... आरक्षकाः सन्ति।
4. पुस्तकप्रदर्शन्यां जनाः पुस्तकानि .................... आगच्छन्ति।
5. मेलापके परिवारसदस्याः मिष्ठान्नं .................... उपविशन्ति।

- **पूर्वक्रियापदस्य धातुना 'तुमुन्' इति संयोज्य वाक्यमेकं लिखन्तु।**

यथा- सुलेखा आपणं गच्छति। सा यानम् आरोहति।

सुलेखा आपणं गन्तुं यानम् आरोहति।

1. माता आम्रं कृन्तति। सा छुरिकाम् आनयति।

   ....................................................................................

2. पङ्कजः गुरुं प्रदर्शयति। सः लेखं लिखति।

   ....................................................................................

3. कन्या दीपं प्रज्वालयति। सा दीपशलाकाम् आनयति।

   ....................................................................................

4. जनकः धनं प्रेषयति। सः धनादेशं कारयति।

   ....................................................................................

- अधोलिखितानि पदानि वाक्यानि वा ध्यानेन पठनीयानि।
- यदा एकः एव कर्ता क्रियाद्वयं त्रयं वा करोति तदा तेषु या उद्दिष्टक्रिया भवति तत्र तुमुन्-प्रत्ययः भवति।
- तुमुन्-प्रत्ययः प्रयोजनं सूचयति। तुमुन्-प्रत्ययस्य केवलं 'तुम्' एव अवशिष्यते।
- तुमुन्-प्रत्ययेन युक्तं पदम् अव्ययं भवति। अतः तस्य रूपाणि न भवन्ति।

यथा-पठितुम्, लेखितुम्, हसितुम् इत्यादयः।

| क्रिया | प्रकृति+प्रत्ययः | रूपम् | वाक्यानि |
|---|---|---|---|
| पठति | पठ्+तुमुन् | पठितुम् | छात्रा विद्यालयं गच्छति। विषयं **पठति**। |
| | | | छात्रा विषयं **पठितुं** विद्यालयं गच्छति। |
| लिखति | लिख्+तुमुन् | लेखितुम् | छात्रः पाठं पठति। उत्तरं **लिखति**। |
| | | | छात्रः उत्तरं .................... पाठं पठति। |

| | | | |
|---|---|---|---|
| ♦ हसति | हस्+तुमुन् | हसितुम् | कपिल: वाक्यं वदति। **हसति**।<br>कपिल: ................ वाक्यं वदति। |
| ♦ भ्रमति | भ्रम्+तुमुन् | भ्रमितुम् | मातामह: विदेशं गच्छति। **भ्रमति**।<br>मातामह: ................ विदेशं गच्छति। |
| ♦ खादति | खाद्+तुमुन् | खादितुम् | यात्रिक: फलं क्रीणाति। **खादति**।<br>यात्रिक: ................ फलं क्रीणाति। |
| ♦ क्रीडति | क्रीड्+तुमुन् | क्रीडितुम् | क्रीडक: प्रोत्साहनं प्राप्नोति। **क्रीडति**।<br>क्रीडक: सम्यक् ................ प्रोत्साहनं प्राप्नोति। |
| ♦ मिलति | मिल्+तुमुन् | मेलितुम् | सर्वाणि मित्राणि योजनां कुर्वन्ति। **मिलन्ति**।<br>सर्वाणि मित्राणि ................ योजनां कुर्वन्ति। |
| ♦ निन्दति | निन्द्+तुमुन् | निन्दितुम् | दुर्जन: एव भवति। सज्जनं **निन्दति**।<br>दुर्जन: सज्जनं ................ एव भवति। |
| ♦ रक्षति | रक्ष्+तुमुन् | रक्षितुम् | सज्जन: समाजे तिष्ठति। धर्मं **रक्षति**।<br>सज्जन: धर्मं ................ समाजे तिष्ठति |
| ♦ रोदिति | रुद्+तुमुन् | रोदितुम् | बाला केशान् उत्पाटयति। **रोदिति**।<br>बाला ................ केशान् उत्पाटयति। |
| ♦ सिञ्चति | सिच्+तुमुन् | सिञ्चितुम् | कृषक: जलम् आनयति। क्षेत्रं **सिञ्चति**।<br>कृषक: क्षेत्रं ................ जलम् आनयति। |
| ♦ तर्जति | तर्ज्+तुमुन् | तर्जितुम् | पिता आसन्दात् उत्तिष्ठति। पुत्रं **तर्जति**।<br>पिता पुत्रं ................ आसन्दात् उत्तिष्ठति। |
| ♦ चिन्तयति | चिन्त्+तुमुन् | चिन्तयितुम् | शिक्षक: वदति। सम्यक् **चिन्तयति**।<br>शिक्षक: सम्यक् ................ वदति। |
| ♦ सूचयति | सूच्+तुमुन् | सूचयितुम् | भवान् कक्ष्याया: बहि: गच्छतु। अध्यापिकां **सूचयतु**।<br>भवान् अध्यापिकां ........... कक्ष्याया: बहि: गच्छतु। |
| ♦ वदति | वद्+तुमुन् | वदितुम् | अधिकारी आगच्छति। सूचनां **वदति**।<br>अधिकारी सूचनां ................ आगच्छति। |
| ♦ गच्छति | गम्+तुमुन् | गन्तुम् | भ्राता चिन्तयति। विदेशं **गच्छति**।<br>भ्राता विदेशं ................ चिन्तयति। |
| ♦ नमति | नम्+तुमुन् | नन्तुम् | भक्ता: चरणौ स्पृशन्ति। **नमन्ति**।<br>भक्ता: ................ चरणौ स्पृशन्ति। |
| ♦ जानाति | ज्ञा+तुमुन् | ज्ञातुम् | स: पुस्तकं पठति। विषयं **जानाति**। |

| | | | | |
|---|---|---|---|---|
| | | | | सः विषयं ............ पुस्तकं पठति। |
| ♦ | ददाति | दा+तुमुन् | दातुम् | पिता सेवकम् आह्वयति। धनं **ददाति**। |
| | | | | पिता धनं ............ सेवकम् आह्वयति। |
| ♦ | शृणोति | श्रु+तुमुन् | श्रोतुम् | पितामही मन्दिरं गच्छति। **कथां शृणोति**। |
| | | | | पितामही कथां ............ मन्दिरं गच्छति। |
| ♦ | करोति | कृ+तुमुन् | कर्तुम् | सेवकः पुष्पाणि आनयति। पूजां **करोति**। |
| | | | | सेवकः पूजां ............ पुष्पाणि आनयति। |
| ♦ | स्मरति | स्मृ+तुमुन् | स्मर्तुम् | पुत्री रात्रौ जागरणं करोति। पाठं **स्मरति**। |
| | | | | पुत्री पाठं ............ रात्रौ जागरणं करोति। |
| ♦ | जिघ्रति | घ्रा+तुमुन् | घ्रातुम् | युवती पुष्पं त्रोटयति। **जिघ्रति**। |
| | | | | युवती ............ पुष्पं त्रोटयति। |
| ♦ | स्नाति | स्ना+तुमुन् | स्नातुम् | पितामही गङ्गानदीं गच्छति। **स्नाति**। |
| | | | | पितामही ............ गङ्गानदीं गच्छति। |
| ♦ | वहति | वह्+तुमुन् | वोढुम् | गर्दभः भवति। भारं **वहति**। |
| | | | | गर्दभः भारं ............ भवति। |
| ♦ | भवति | भू+तुमुन् | भवितुम् | एषः परिश्रमं करोति। सैनिकः **भवति**। |
| | | | | एषः सैनिकः ............ परिश्रमं करोति। |
| ♦ | त्यजति | त्यज्+तुमुन् | त्यक्तुम् | भवान् प्रयासं करोति। दुर्गुणं **त्यजति**। |
| | | | | भवान् दुर्गुणं ............ प्रयासं करोति। |
| ♦ | पश्यति | दृश्+तुमुन् | द्रष्टुम् | शिशुः रोदिति। मातरं **पश्यति**। |
| | | | | शिशुः मातरं ............ रोदिति। |
| ♦ | पृच्छति | प्रच्छ्+तुमुन् | प्रष्टुम् | अध्यापकः छात्रम् आह्वयति। प्रश्नं **पृच्छति**। |
| | | | | अध्यापकः प्रश्नं ............ छात्रम् आह्वयति। |
| ♦ | पचति | पच्+तुमुन् | पक्तुम् | अम्बा पाकशालां गच्छति। भोजनं **पचति**। |
| | | | | अम्बा भोजनं ............ पाकशालां गच्छति। |
| ♦ | जयति | जी+तुमुन् | जेतुम् | वीरः शक्नोति। युद्धं **जयति**। |
| | | | | वीरः युद्धं ............ शक्नोति। |
| ♦ | तिष्ठति | स्था+तुमुन् | स्थातुम् | बाला प्रयत्नं करोति। स्वयं **तिष्ठति**। |
| | | | | बाला स्वयं ............ प्रयत्नं करोति। |
| ♦ | पिबति | पा+तुमुन् | पातुम् | शिशुः रोदनं करोति। दुग्धं **पिबति**। |
| | | | | शिशुः दुग्धं ............ रोदनं करोति। |

| | | | |
|---|---|---|---|
| ♦ गायति | गै+तुमुन् | गातुम् | गायिका अभ्यासं करोति। गीतं **गायति**।<br>गायिका गीतं .................. अभ्यासं करोति। |
| ♦ तरति | तॄ+तुमुन् | तरितुम्/तरीतुम् | नाविकः नदीं गच्छति। **तरति**।<br>नाविकः .................. नदीं गच्छति। |
| ♦ क्रीणाति | क्री+तुमुन् | क्रेतुम् | पिता आपणं गच्छति। चाकलेहं **क्रीणाति**।<br>पिता चाकलेहं .................. आपणं गच्छति। |
| ♦ नयति | नी+तुमुन् | नेतुम् | भवन्तः पुस्तकालयं गच्छन्ति। पुस्तकं **नयन्ति**।<br>भवन्तः पुस्तकं .................. पुस्तकालयं गच्छन्ति। |
| ♦ गृह्णाति | ग्रह्+तुमुन् | ग्रहीतुम् | आरक्षकः धावति। चौरं **गृह्णाति**।<br>आरक्षकः चौरं .................. धावति। |
| ♦ नृत्यति | नृत्+तुमुन् | नर्तितुम् | नर्तकी मञ्चं गच्छति। **नृत्यति**।<br>नर्तकी .................. मञ्चं गच्छति। |

♦ **प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत–**

1. तस्य भार्या स्वबालापत्यस्य रक्षार्थं तम् अवस्थाप्य **स्नातुं** .................. + .................. गता।
2. अधुना सः स्वकीयैः प्राणैरेव स्वदेशं स्वतन्त्रं **कृ+तुमुन्** .................. इच्छति।
3. न शक्नोमि स्वचक्षुषा **द्रष्टुं** .................. + .................. स्वदेशदुर्दशाम्।
4. न शक्नुमः प्राणान् **धृ (णिच्) + तुमुन्** .................. ।
5. सर्वे आत्मानं **हन्तुम्** .................. + .................. उद्यताः।
6. कः नीतिशास्त्रोपदेशेन पुनर्जन्म **कृ (णिच्) + तुमुन्** .................. समर्थः?
7. इच्छामि भवद्भ्यः किञ्चित् **दातुम्** .................. + .................. ।
8. यः काव्यं **कृ+तुमुन्** .................. न जानाति सः निष्कास्यताम्।
9. बालः जलं **पातुम्** .................. + .................. न इच्छति।
10. किं भवती किमपि **वच् + तुमुन्** .................. इच्छति?
11. सः मां तत्र **नी + तुमुन्** .................. न इच्छति।
12. चिकित्सकः **भवितुं** .................. + .................. किं पठनीयम्?
13. सतीशः नाटकं **दृश् + तुमुन्** .................. इच्छति।
14. पुरस्कारं **लब्धुं** .................. + .................. तेन महान् श्रमः कृतः।
15. अहं दुर्वचनानि **श्रोतुं** .................. + .................. न कामये।

◆ अधोनिर्दिष्टधातूनां 'क्त्वा-तुमुन्' प्रत्ययान्तरूपाणि उपसर्गेण सह च 'ल्यप्' प्रत्ययान्तपदानि लिखन्तु।

| धातुः | क्त्वा | तुमुन् | उपसर्गः | ल्यप् |
|---|---|---|---|---|
| दा | दत्त्वा | दातुम् | आ | आदाय |
| गम् | | | अव | |
| कृ | | | उप | |
| चिन्त् | | | वि | |
| स्था | | | प्र | |
| श्रु | | | प्रति | |
| नम् | | | प्र | |
| विश् | | | उप | |
| हस् | | | वि | |

## अस्माभिः अधीतम्

- क्त्वा-ल्यप् इत्यनयोः प्रत्यययोः प्रयोगः 'करके' इत्यर्थे, तुमुन्-प्रत्ययस्य प्रयोगः चतुर्थ्यर्थे (के लिए) इत्यर्थे भवति।
- क्त्वा-प्रत्ययस्य 'त्वा', ल्यप्-प्रत्ययस्य। 'य', तुमुन्-प्रत्ययस्य च 'तुम्' अवशिष्यते।
- धातोः पूर्वं यदि उपसर्गः भवेत् तर्हि तत्र 'क्त्वा' स्थाने 'ल्यप्' प्रत्ययस्य प्रयोगः भवति।
- 'क्त्वा-ल्यप्-तुमुन्' प्रत्यययोगेन निर्मितानि पदानि अव्ययानि जायन्ते।

✸ ✸ ✸ ✸ ✸

## (घ) क्तवतु-क्त-प्रत्ययौ

- **अधोलिखितं पत्रं ध्यानेन पठत अवगच्छत च-**

52, आदर्शनगरम्
जालन्धरतः
दिनाङ्कः - ......../......../........

प्रिय मित्र अशोक!

नमोनमः

गतरात्रौ अहम् एकां त्यागभावनापूर्णां कथां **पठितवान्**। तां कथाम् अहम् अत्र लिखामि।

राजा जीमूतवाहनः धर्मपुरे राज्यं **कृतवान्**। एकदा सः कस्याश्चित् स्त्रियाः विलापं **श्रुतवान्**। परिज्ञातं यत् सा गरुडस्य आहाराय स्वपुत्रम् **आनीतवती**। राजा तस्य रक्षायै वचनं **दत्तवान्**। स स्वशरीरं गरुडाय **अर्पितवान्**। यदा गरुडः वामभागं **खादितवान्**, राजा दक्षिणभागम् अपि **प्रस्तुतवान्**। तस्य धैर्यं दृष्ट्वा, सत्यं ज्ञात्वा गरुडः पश्चात्तापं **कृतवान्**। स पातालात् अमृतम् आनीय राजानं पुनः जीवितं **कृतवान्**। तद्दिनात् च सर्पभक्षणं **त्यक्तवान्**। धन्यः प्रातः स्मरणीयः एषः जीमूतवाहनः।

आशासे भवान् अपि काञ्चित् प्रेरणाप्रदां कथाम् उत्तरे लेखिष्यति।

मातृपितृचरणयोः प्रणामाः।

तव अभिन्नहृदयः

वैभवः

- **उपर्युक्तपत्रे स्थूलपदानि ध्यानेन पठत जानीत च अत्र क्तवतुप्रत्ययस्य प्रयोगः कर्तृवाच्ये लङ्लकारस्य स्थाने अभवत्। अतः लङ्लकारस्य रूपस्य समक्षं 'क्तवतु' प्रत्ययान्तं रूपं लिखत-**

| | लङ्लकारः | 'क्तवतु' प्रत्ययान्तरूपम् | | लङ्लकारः | 'क्तवतु' प्रत्ययान्तरूपम् |
|---|---|---|---|---|---|
| यथा | अपठम् | पठितवान् | | | |
| 1. | अकरोत् | ...................... | 2. | अशृणोत् | ...................... |
| 3. | आनयत् | ...................... | 4. | अयच्छत् | ...................... |
| 5. | आर्पयत् | ...................... | 6. | अखादत् | ...................... |
| 7. | प्रास्तुवत् | ...................... | 8. | अत्यजत् | ...................... |

## ध्यातव्यम् :-

**‘क्तवतु’ प्रत्ययः कर्तृवाच्ये भूतकाले प्रयुज्यते**

- ‘क्तवतु’ प्रत्ययस्य धातुभिः सह प्रयोगसमये केवलं ‘तवत्’ एव अवशिष्यते–

  पठ् + क्तवतु =

  पठ् + तवत् = पठितवत्

  अन्यानि रूपाणि भवत्-वत्, नदीवत्, जगत्-वत् भवन्ति।

- ‘क्तवतु’ प्रत्ययान्तस्य पदस्य प्रयोगः त्रिषु पुरुषेषु समानम् एव भवति।

| | | |
|---|---|---|
| यथा– | सः अपठत्। | सः पठितवान्। |
| | त्वम् अपठः। | त्वं पठितवान् |
| | अहम् अपठम्। | अहं पठितवान्। |

- ‘क्तवतु’ प्रत्यययुक्तस्य पदस्य रूपाणि लिङ्गानुसारं भवन्ति।

| | | | | |
|---|---|---|---|---|
| पुंलिङ्गे | – | पठितवान् | पठितवन्तौ | पठितवन्तः |
| स्त्रीलिङ्गे | – | पठितवती | पठितवत्यौ | पठितवत्यः |
| नपुंसकलिङ्गे | – | पठितवत् | पठितवती | पठितवन्ति |

◆ **अधुना अधोलिखितानि पदानि बहुवचने परिवर्तयत–**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| यथा– | पठितवान् | पठितवन्तः |
| 1. | कृतवान् | ...................... |
| 2. | हसितवती | ...................... |
| 3. | त्यक्तवान् | ...................... |
| 4. | दत्तवान् | ...................... |
| 5. | आनीतवती | ...................... |
| 6. | खादितवान् | ...................... |
| 7. | जीवितवान् | ...................... |
| 8. | श्रुतवती | ...................... |

◆ **अधोलिखितवाक्यानां स्त्रीलिङ्गे परिवर्तनं कुरुत–**

| | पुंलिङ्गे | स्त्रीलिङ्गे |
|---|---|---|
| यथा– | पिता कथितवान् | माता कथितवती |
| 1. | अध्यापकः अधीतवान्। | 1. ...........................................। |
| 2. | युवकः हसितवान्। | 2. ...........................................। |

3. मातुलः निवेदितवान्। 3. ....................................।

4. छात्रः पृष्टवान्। 4. ....................................।

5. पितामहः पूजितवान्। 5. ....................................।

6. पितृव्यः दत्तवान्। 6. ....................................।

7. भ्राता श्रुतवान्। 7. ....................................।

8. राजा परित्यक्तवान्। 8. ....................................।

◆ **ह्यः सुखदायाः अष्टमं जन्मदिनम् आसीत्। सा अनेकान् उपहारान् प्राप्तवती। बान्धवाः मित्राणि च किं किम् आनीतवन्तः इति ज्ञातुं मञ्जूषायाः उचितं क्रियापदं विचित्य वाक्यानि पूरयत–**

| दत्तवान्, आनीतवती, क्रीतवान्, आनीतवन्तौ, दत्तवन्तः, दत्तवन्तौ, आनीतवान्, स्वीकृतवती, आनीतवन्ति। |
|---|

यथा–पिता सुखदायै द्विचक्रिकाम् क्रीतवान्।

1. माता वस्त्राणि ....................................।
2. मित्राणि तस्यै शिक्षाप्रदानि क्रीडनकानि ....................................।
3. सुखदा नीरजायाः पुस्तकानि ....................................।
4. मनीषः 'सर्पसोपानम्' इति खेलम् ....................................।
5. मातुलौ पठनाय आसन्दिकामञ्चौ ....................................।
6. पितामहः रुप्यकाणां पञ्चशतम् ....................................।
7. मातामही मातामहः च मौक्तिकमालाम् ....................................।
8. भ्रातरः मिलित्वा 'हारमोनियम्' इति वाद्ययन्त्रम् ....................................।

◆ **प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत–**

1. ब्राह्मणः कोपात् नकुलं **वि+आ+पद् (णिच्)+क्तवतु** ........................।
2. स भूपतिः एकदा पठ्यमानं श्लोकद्वयं **श्रुतवान्** ........................ + ........................।
3. राजा बहुमानपुरःसरं पुत्रान् तस्य करे **सम्+अर्प्+क्तवतु** ........................।
4. राजा पण्डितसभां **कारितवान्** ........................ (णिच्) + ........................।
5. महातपा मुनिः परितुष्टः वनं **गम्+क्तवतु** ........................ अवाप्तवान् च तदुपदेशात् सिद्धिम्।
6. सप्तवर्षीयः सन् छात्रः पञ्चविद्याः **अधीतवान्** ........................ + ........................ + ........................ ।
7. मुनिः तृषाकुलतां विस्मृत्य आश्रमम् **आ+गम्+क्तवतु** ........................ ।
8. स्वातिमुनिः सङ्गीतसाधनं **निर्मितवान्** ........................ + ........................।
9. विष्णुशर्मा मनोरञ्जकाभिः कथाभिः राजकुमारान् **शिक्ष्+क्तवतु** ........................।
10. सः मुनिः तां कोपदृष्ट्या **दृष्ट्वान्** ........................ + ........................।

11. जनकः प्रभावितः भूत्वा तस्मै **नि+विद् +क्तवतु** ........................।

12. मुनिः प्रतिध्वनेः उत्पादनार्थं सूक्ष्मक्रमम् **अन्विष्टवान्** .................... + .................... + ......................।

13. सीता अपि रामेण सह वनं **गम्+क्तवतु** .........................।

14. श्रमिकाः अतिश्रमेण भवननिर्माणं **कृतवन्तः** ......................... + ......................... ।

15. पितरौ आशीर्वचांसि **वच्+क्तवतु** .........................।

16. महिलाः गीतानि **गीतवत्यः** ......................... + ......................... ।

17. अध्यापिके निर्देशान् **दा+क्तवतु** ......................... ।

18. यदा अहं तत्र **प्र+आप्+क्तवतु** ......................... तदा यानं गतमासीत्।

19. पत्रं विषयं **प्रकटितवत्** ......................... + ......................... + .........................।

20. नृपः मन्त्रिणम् **आ+दिश्+क्तवतु** .........................।

## क. अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च।

1. बालकेन पाठः पठितः।
2. नकुलेन कृष्णसर्पः दृष्टः।
3. नीरजेन सुलेखः लिखितः।
4. भक्तेन पूजा कृता।
5. जनकेन ग्रामः रक्षितः।
6. छात्रेण रामायणं श्रुतम्।
7. वानरेण फले त्रोटिते।
8. यात्रिकेण चिटिका क्रीता।

◆ **उपरिलिखितेषु वाक्येषु यानि पदानि रेखाङ्कितानि सन्ति तानि क्त-प्रत्यययुक्तानि सन्ति। तेषां पदानां धातुं प्रत्ययं च पृथक् कृत्वा लिखत-**

| | पदम् | धातुः | प्रत्ययः |
|---|---|---|---|
| यथा- | पठितः | पठ् | क्त |
| | दृष्टः | ......................... | ......................... |
| | लिखितः | ......................... | ......................... |
| | कृता | ......................... | ......................... |
| | रक्षितः | ......................... | ......................... |
| | श्रुतम् | ......................... | ......................... |
| | त्रोटिते | ......................... | ......................... |

### ध्यातव्यम् :-

➲ 'क्त' प्रत्ययः कर्मवाच्ये भाववाच्ये च भूतकालार्थे प्रयुज्यते।

➲ 'क्त' प्रत्ययस्य धातुभिः सह प्रयोगसमये केवलं 'त' एव अवशिष्यते-

यथा- पठ् + क्त  पठ् + त = पठित

- 'क्त' प्रत्यययुक्तस्य पदस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

यथा–

| | | | |
|---|---|---|---|
| पुंलिङ्गे | पठितः | पठितौ | पठिताः |
| स्त्रीलिङ्गे | पठिता | पठिते | पठिताः |
| नपुंसकलिङ्गे | पठितम् | पठिते | पठितानि |

अन्यानि रूपाणि बालकवत्, लतावत्, फलवत् भवन्ति।

- 'क्त' प्रत्ययान्तस्य पदस्य प्रयोगः त्रिषु पुरुषेषु समानः भवति।

यथा– तेन सः दृष्टः। तेन त्वं दृष्टः। तेन अहं दृष्टः।

- 'क्त' प्रत्यययुक्तस्य पदस्य प्रयोगे लिङ्गं वचनं च कर्मपदानुसारं प्रयुज्यते।

- **अधुना कोष्ठके धातुना सह क्तप्रत्ययं प्रयुज्य रिक्तस्थानानि पूरयत–**

यथा–रामेण रावणः हतः (हन्)।

1. तेन पत्रं ...................... (लिख्)।
2. श्वेतकेतुना फलं ...................... (भिद्)।
3. कालिदासेन सप्तग्रन्थाः ...................... (रच्)।
4. वानरैः फलानि ...................... (भक्ष्)।
5. राज्ञा ब्राह्मणः ...................... (नि+मन्त्र्)।
6. किं त्वया जन्तुशाला ...................... (दृश्)।

- **अत्र वयं पश्यामः प्रथमवाक्ये 'रामः' कर्त्ता अस्ति। अत्र कर्त्तरि तृतीया विभक्तिः प्रयुक्ता। 'रावणः' कर्म अस्ति। अत्र च प्रथमा विभक्तिः प्रयुक्ता। एवमेव अधोलिखितां तालिकां पूरयत–**

| पदानि | कर्त्तरि | कर्मणि | विभक्तिः |
|---|---|---|---|
| श्वेतकेतुना | ✔ | | तृतीया |
| फलम् | | ✔ | प्रथमा |
| कालिदासेन | | | |
| सप्तग्रन्थाः | | | |
| वानरैः | | | |
| फलानि | | | |
| राज्ञा | | | |
| ब्राह्मणः | | | |
| त्वया | | | |
| जन्तुशाला | | | |

◆ **अधः 'क' स्तम्भे 'क्त' प्रत्ययस्य योगेन निर्मितः शब्दः दर्शितः। एवमेव 'ख' स्तम्भे धातुं प्रत्ययं च पृथक् कृत्वा लिखत–**

| | 'क' धातुः + प्रत्ययः | | | | 'ख' धातुः | | प्रत्ययः |
|---|---|---|---|---|---|---|---|
| 1. | आप्त | = | आप् + क्त | 1. प्राप्त = | ........................ | + | ........................ |
| 2. | प्रविष्ट | = | प्र + विश् + क्त | 2. प्रणष्ट = | ........................ | + | ........................ |
| 3. | भ्रान्त | = | भ्रम् + क्त | 3. श्रान्त = | ........................ | + | ........................ |
| 4. | श्रुत | = | श्रु + क्त | 4. स्मृत = | ........................ | + | ........................ |
| 5. | गत | = | गम् + क्त | 5. नत = | ........................ | + | ........................ |
| 6. | उषित | = | वस् + क्त | 6. उदित = | ........................ | + | ........................ |
| 7. | पृष्ट | = | प्रच्छ् + क्त | 7. दृष्ट = | ........................ | + | ........................ |
| 8. | सिद्ध | = | सिध् + क्त | 8. वृद्ध = | ........................ | + | ........................ |
| 9. | लिखित | = | लिख् + क्त | 9. पठित = | ........................ | + | ........................ |
| 10. | कथित | = | कथ् + क्त | 10. भक्षित = | ........................ | + | ........................ |

◆ **उदाहरणं ध्यानेन दृष्ट्वा अवगत्य च क्तप्रत्यय युक्तपदस्य स्थाने क्तवतुप्रत्यययुक्तं पदं प्रयुज्य वाक्यानि पुनः लिखत।**

यथा–

| | | | | |
|---|---|---|---|---|
| 1. | छात्रेण रामायणं श्रुतम्। | छात्रः | रामायणम् | श्रुतवान् |
| 2. | बालकेन पाठः पठितः। | ........................ | ........................ | ........................ |
| 3. | नकुलेन कृष्णसर्पः दृष्टः। | ........................ | ........................ | ........................ |
| 4. | भक्तेन पूजा कृता। | ........................ | ........................ | ........................ |
| 5. | जनकेन ग्रामः रक्षितः। | ........................ | ........................ | ........................ |
| 6. | वानरेण कदलीफलं खादितम्। | ........................ | ........................ | ........................ |

◆ **प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा कथां पूरयन्तु–**

**त्यज दुर्जनसंसर्गम्**



एकस्मिन् तरौ हंसकाकौ निवासं कृतवन्तौ। एकदा ग्रीष्मे ............... कश्चित् पथिकः धनुर्बाणं समीपे निधाय ............... । क्षणान्तरे तस्य मुखात् वृक्षच्छाया ...................। तन्मुखम् आतपेन ........................ अवलोक्य .................... हंसेन पक्षौ प्रसारितौ। तन्मुखे छाया ..................... । लब्धनिद्रासुखेन पथिकेन मुखम् ........................।

परसुखम् असहिष्णुः काकः तस्य मुखे पुरीषोत्सर्गं कृत्वा .................. । पान्थेन उपरि .................... । तेन .................... हंसः बाणेन ........................... च। अतः सत्यम् ........................... । त्यज दुर्जनसंसर्गम्।

| |
|---|
| दृष्टः, परिश्रान्तः, वृक्षस्थितेन, कृता, उद्घाटितम्, अपगता, पलायितः, प्रसुप्तः, तप्तम्, निरीक्षितम्, उक्तम्, व्यापादितः। |

- **अधोलिखिताः प्रश्नाः 'क्तवतुप्रत्ययान्ताः, तेषाम् उत्तराणि क्तप्रत्ययं प्रयुज्य देयानि'**

यथा–त्वम् अद्य किं पठितवान्? मया अद्य भर्तृहरिपद्यानि पठितानि।

1. प्र. राधा किं क्रीतवती? उ. .......................................................
2. प्र. पाकशालायां सूदः किं पक्ववान्? उ. .......................................................
3. प्र. देशं कः आक्रान्तवान्? उ. .......................................................
4. प्र. गरुडः किं त्यक्तवान्? उ. .......................................................
5. प्र. देशभक्तः कस्मै प्रतिज्ञातवान्? उ. .......................................................
6. प्र. बलिः ब्राह्मणाय किं समर्पितवान्? उ. .......................................................
7. प्र. रामायणं कः लिखितवान्? उ. .......................................................
8. प्र. महर्षिः व्यासः किं रचितवान्? उ. .......................................................

- **प्रकृतिप्रत्ययौ संयोज्य विभज्य वा लिखत–**

1. माधवस्य भार्या स्नातुं **गता** ........................... + ........................... ।
2. ब्राह्मणः राज्ञा श्राद्धार्थं **नि+मन्त्र्+क्त** ........................... ।
3. वयमिह **परितुष्टाः** ........................... + ........................... + ........................... वल्कलैः।
4. महाराणा प्रतापः विचारमग्नः शिलायाम् **उप+विश्+क्त** ........................... अस्ति।
5. नाहं **दत्तां** ........................... + ........................... सम्पत्तिं पुनः आददामि।
6. 'हितोपदेशः' नामकः प्रसिद्धः ग्रन्थः **जन्+क्त** ........................... ।
7. ततश्च स मुनिः तपःप्रभावात् अहङ्कारम् **उपगतः** ........................ + ........................ + ........................।
8. किं पतिव्रतया तया त्वम् इह **प्र+इष्+क्त** ........................... ?
9. श्वेतकेतुना **उक्तः** ........................... + ........................... पिता तत्त्वज्ञानं प्रतिपादयति।
10. आम्र! ते दिवसाः **गम्+क्त** ........................... ।
11. अष्टावक्रः मित्रैः सह क्रीडित्वा गृहं **प्रत्यावृत्तः** ................. + ................. + ................. + .................।
12. कीदृशीं दशां **प्र+आप्+क्त** ........................... अहम्।
13. मया गुरुकुले शिक्षा **गृहीता** ........................... ।

14. नालन्दाविश्वविद्यालये आयुर्वेदः, पशुविज्ञानं, कला शिल्पानि च **अधि+आप्+क्त** ........................ ।

15. भारतीवल्लकीझङ्कृतैः **झम्+कृ+क्त** ........................ भारतं भूतले भाति।

16. भारताय **अर्पितं** ........................ + ........................ मे अखिलं चेष्टितम्।

17. मया कथाः **पठ्+क्त** ........................ ।

18. सर्वैः द्वावपि लेखौ **पठितौ** ........................ ।

19. मया सा घटना **स्मृ+क्त** ........................ ।

20. बालकेन द्वे रोटिके **भुक्ते** ........................ + ........................ ।

- **सुहासः प्रतिसप्ताहं कृतं कार्यं रविवासरे एकत्र सञ्चिकायां लिखति। यत् कृतं तत् ( ✓ ) इति चिह्नेन यत् च न कृतं तत् ( ✗ ) इति चिह्नेन सूचितम्। सप्ताहस्य कार्यविवरणम् अधोलिखितम्। पृथक्-पृथक् कृत्वा स्तम्भद्वये लिख्यन्ताम्।**

1. नित्यं प्रातः गीता पठिता। ✓
2. अनेकशः असत्यं भाषितम्। ✗
3. अनुजाय पत्रं लिखितम्। ✓
4. अतिथयः सत्कृताः ✓
5. मित्रैः सह कलहः कृतः। ✗
6. नित्यं सायं पादकन्दुकेन क्रीडितम्। ✓
7. प्रातराशे दुग्धं पीतम्। ✓
8. दीनाः उपहसिताः। ✗
9. रात्रिभोजनं नित्यं दशवादने भुक्तम्। ✗
10. प्रातः उत्थाय भ्रमणं कृतम्। ✓
11. रात्रौ मातृचरणौ संवाहितौ। ✓
12. उद्याने पुष्पाणि त्रोटितानि। ✗
13. विलम्बेन विद्यालयः प्राप्तः। ✗
14. विज्ञानमेलके भागः गृहीतः। ✓
15. दूरदर्शनस्य कार्यक्रमाः प्रतिदिनं पञ्चहोरापर्यन्तं दृष्टाः। ✗
16. प्रभाते गुरुजनाः अभिवन्दिताः। ✓

| **क स्तम्भः ( यत् कृतम् )** | **ख स्तम्भः ( यत् न कृतम् )** |
|---|---|
| ........................ | ........................ |
| ........................ | ........................ |
| ........................ | ........................ |
| ........................ | ........................ |
| ........................ | ........................ |
| ........................ | ........................ |
| ........................ | ........................ |
| ........................ | ........................ |

**'क्त' प्रत्ययान्तपदानि विशेषणरूपेण अपि प्रयुज्यन्ते।**

◆ **अधः विशेषणरूपेण क्तप्रत्ययस्य प्रयोगः दर्शनीयः रेखाङ्कितपदानां च वचनं परिवर्तनीयम्।**

1. पक्वानि (पच्+क्त) **आम्राणि** आनय। = पक्वम् आम्रम् आनय।
2. अनुमतः (अनु+मत्+क्त) **पुत्रः** राजसभाम् अगच्छत्। = ..............................।
3. पर्युषितम् (परि+वस्+क्त) **अन्नं** मा खादेत्। = ..............................।
4. सुप्ताम् (सुप्+क्त) **कन्यां** न जागृयात्। = ..............................।
5. रक्षितम् (रक्ष्+क्त) **सैनिकं** भोजय। = ..............................।
6. महेन्द्रः लिखितम् (लिख+क्त) लेखनम् **अध्यापकम्** अदर्शयत्। = ..............................।

◆ **अधः 'ख' भागे धातवः लिखिताः। तेषां क्त प्रत्ययान्तरूपेण 'क' भागे विशेषणानि लिखितानि 'ग' भागे च क्रियापदानि।**

| 'क' भागः | 'ख' भागः | 'ग' भागः |
|---|---|---|
| **व्यापादितं नकुलं दृष्ट्वा ब्राह्मणः विषादम् अलभत।** | **( वि+आ +पाद् )** | **ब्राह्मणेन अविचार्य नकुलः व्यापादितः।** |
| 1. .................. पाठं पुनः पठ। | पठ् | 1. मया एषः पाठः पुनः .................. |
| 2. .................. मृगौ अधावताम्। | भी | 2. व्याधात् मृगी .................. |
| 3. .................. रामायणकथां मां श्रावय। | श्रु | 3. तेन रामायणकथा अनेकशः .................. |
| 4. .................. अश्मा अपि देवत्वं याति। | प्रति+स्था | 4. अश्मा महद्भिः .................. |
| 5. .................. छात्रवृत्तिः सुधीराय अलम्। | ग्रह् | 5. सुधीरेण छात्रवृत्तिः .................. |
| 6. .................. ब्राह्मणः श्राद्धम् अगृह्णात्। | नि+मन्त्र् | 6. ब्राह्मणः श्राद्धार्थं .................. |
| 7. .................. समयः न निवर्तते। | गम् | 7. रेलप्रतीक्षायां मूल्यवान् समयः व्यर्थः ........ |
| 8. .............. बालकाय माता दुग्धम् अयच्छत्। | प्र+बुध् | 8. सूर्यकिरणैः बालकः .................. |

**अकर्मकधातूनां सर्वेषामपि कर्तृवाच्ये अपि क्त-प्रत्ययः भवति।**

1. लेखनी पतिता।
2. पुष्पं विकसितम्।
3. बालकः प्रबुद्धः।
4. वृक्षः कम्पितः।
5. सः शयितः
6. सः दूराद् आगतः।

◆ **उदाहरणानि अनुसृत्य रिक्तस्थानानि पूरयत।**

1. हसतः सभाजनान् दृष्ट्वा अष्टावक्रः उच्चैः ...................... (हस्+क्त)।
2. त्वं काशीतः कदा ...................... (आ+गम्+क्त)?
3. बालकः दूरदर्शनं पश्यन्नेव ...................... (स्वप्+क्त)।
4. सः गृहं प्रति कदा ...................... (प्र+स्था+क्त)?
5. काकः वृक्षस्य शाखायाम् ...................... (उप+विश्+क्त)।

## अस्माभिः अधीतम्

**क्तवतु-प्रत्ययः**

- क्तवतु-प्रत्ययस्य 'तवत्' अवशिष्यते।
- अस्य प्रयोगः कर्तृवाच्ये भूतकालस्य क्रियार्थे भवति, अतः कर्ता सदा प्रथमायाम् एव भवति।
- त्रिषु पुरुषेषु रूपसाम्यं भवति–

  सः दृष्ट्वान्।

  त्वम् दृष्टवान्।

  अहम् दृष्टवान्।
- त्रिषु लिङ्गेषु रूपाणि भवन्ति–

  पुंलिङ्गे - भवत्-वत्

  स्त्रीलिङ्गे - नदीवत्

  नपुंसकलिङ्गे - जगत्-वत्

**क्त प्रत्ययः**

- क्तप्रत्ययस्य 'त' अवशिष्यते।
- अस्य प्रयोगः कर्मणि भूतकालस्य क्रियार्थे भवति, कर्म च प्रथमायाम्।
- अस्य प्रयोगः विशेषणरूपेण अपि भवति।
- अकर्मकधातूनां कर्तृवाच्ये अपि 'क्त' प्रत्ययः प्रयुज्यते
- त्रिषु लिङ्गेषु रूपाणि चलन्ति

  पुंलिङ्गे - देववत्

  स्त्रीलिङ्गे - लतावत्

  नपुंसकलिङ्गे - फलवत्

✱ ✱ ✱ ✱ ✱

## ( ङ ) शतृ प्रत्यय

**अधोलिखितानि उदाहरणानि ध्यानेन पठत उदाहरणानुसारं च रिक्तस्थानानि पूरयत–**

### पुंलिङ्गे



बालकः पठति।
पठन् बालकः

यथा– बालकः पठति। = पठन् बालकः।

छात्रः हसति। = ............................................................।

मृगः गच्छति। = ............................................................।

धावकः धावति। = ............................................................।

वानरः खादति। = ............................................................।

### स्त्रीलिङ्गे



बालिका लिखति।
लिखन्ती बालिका

यथा– बालिका लिखति। = लिखन्ती बालिका।

छात्रा हसति। = ............................................................।

मृगी गच्छति। = ............................................................।

धाविका धावति। = ............................................................।

वानरी खादति। = ............................................................।

### नपुंसकलिङ्गे



फलं पतति।
पतत् फलम्।

यथा– यानं गच्छति। = गच्छत् यानम्।

पुष्पं विकसति। = ............................................................।

जलं प्रवहति। = ............................................................।

पर्णं पतति। = ............................................................।

चक्रं भ्रमति। = ............................................................।

एते सर्वे प्रयोगाः 'शतृ' प्रत्ययस्य सन्ति।

**ध्यातव्यम् :-**

- 'शतृ' प्रत्ययः कस्याश्चित् क्रियायाः निरन्तरतां सूचयति।
- धातुभिः सह प्रयोगसमये 'शतृ' प्रत्ययस्य केवलम् 'अत्' एव अवशिष्यते–
  यथा– पठ् + शतृ = पठ् + अत् = पठत्

**शतृप्रत्ययः केवलं परस्मैपदि-धातुभिः सह एव योज्यते।**

**'शतृ' प्रत्यययुक्तस्य पदस्य प्रयोगः त्रिषु लिङ्गेषु भवति–**

यथा–

अ) शिक्षकः शिक्षयति।
आ) फलं दर्शयति।
1. शिक्षयन् शिक्षकः फलं दर्शयति।



अ) आचार्या पाठयति।
आ) पुस्तकं पश्यति।
2. पाठयन्ती आचार्या पुस्तकं पश्यति।



अ) फलं पतति।
आ) फलं पक्वम् अस्ति।
3. पतत् फलं पक्वम् अस्ति।





बालिका पत्रं लिखति, मातरं स्मरति।

.............................................................................................

.............................................................................................



कलाकारः तबलावाद्यं वादयति।
श्रोतृभिः प्रशंस्यते।

.............................................................................................

.............................................................................................



पत्राणि पतन्ति।

वायुना नीयन्ते।



कपिः आरोहति।

इतस्ततः पश्यति।







1. शिष्यौ हसतः

शिष्यौ चित्रं पश्यतः।

हसन्तौ शिष्यौ चित्रं पश्यतः।

2. छात्रे पठतः।

छात्रे न हसतः।

पठन्त्यौ छात्रे न हसतः।

3. पत्रे पततः।

पत्रे वायुना नीयेते।

पतती पत्रे वायुना नीयेते।



अश्वौ धावतः।

अश्वौ न स्खलतः।



बालिके गच्छतः।

बालिके वार्तालापं कुरुतः।



मित्रे क्रीडतः।

मित्रे जलपानमपि न कुरुतः।



1. मयूराः नृत्यन्ति।

   ते शोभन्ते।

   नृत्यन्तः मयूराः शोभन्ते।



2. महिलाः पचन्ति।

   ताः वार्तालापं कुर्वन्ति।

   पचन्त्यः महिलाः वार्तालापं कुर्वन्ति।



3. दाडिमानि पतन्ति।

   तानि शीर्यन्ते।

   पतन्ति दाडिमानि शीर्यन्ते।



वानराः कूर्दन्ति। वानराः न पतन्ति।



नार्यः जलम् आनयन्ति। परं नार्यः वार्तालापं कुर्वन्ति।



पुष्पाणि विकसन्ति। पुष्पाणि कस्मै न रोचन्ते।

..............................................................................................................................

**अन्यासु विभक्तिषु अपि 'शतृ' प्रत्ययस्य प्रयोगः भवति।**

एषा नदी अस्ति। अस्याः वामतीरे वर्तिकानां मुखे विशेषणपदानां चिटिकाः सन्ति। दक्षिणतीरस्थवर्तिकानां मुखे च विशेष्यपदानां चिटिकाः सन्ति।



| | |
|---|---|
| प्रसीदन्तः | भूपतये |
| पूजयतः | कन्याः |
| भक्षयन्ती | शिशुः |
| उपसर्पन् | भक्तान् |
| आदिशते | सज्जनाः |
| प्रणमन्त्यः | मातामही |



- **अधुना विशेषण-विशेष्यपदानां समुचितं सम्मेलने कृत्वा लिखत-**

प्रसीदन्तः सज्जनाः

1. ..............................................................................
2. ..............................................................................
3. ..............................................................................
4. ..............................................................................
5. ..............................................................................

- **अधोलिखिताः चिटिकाः अवलोकयत-**

| | | |
|---|---|---|
| आरोहन्ती वृद्धा | प्रविशन्त्यः छात्राः | जिघ्रन्ती युवतिः |
| गणयन्ती धनिका | नृत्यन्ती बालिका | शृण्वती श्रोत्री |

## अभ्यासः

**क. प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत–**

1. नकुलेन बालसमीपम् **उपसर्पन्** .................... + .................... + .................... कृष्णसर्पः दृष्टः।
2. **गम्+शतृ** .................... पिपीलको याति योजनानां शतान्यपि।
3. मुनिः **चिन्तयन्** .................... + .................... तत्र एव उपाविशत्।
4. तत्र कुत्रचित् पर्वतात् **पत्+शतृ** .................... जलबिन्दवः मधुरं सङ्गीतं जनयन्ति।
5. विश्वबन्धुत्वम् **उद्+घुष्+शतृ** .................... भारतं भूतले भाति।
6. विश्ववन्द्यैः चरित्रैः जगत् **पावयत्** .................... + .................... भारतं भूतले भाति।
7. विश्वमेकं कुटुम्बं **सम्+आ+लोक्+शतृ** .................... भारतं मे प्रियम्।
8. नैकमार्गैः प्रभुं चैकम् **आराधयत्** .................... + .................... + .................... ।
9. बालिका **गै+शतृ** .................... नृत्यति।
10. बालौ शब्दरूपाणि **स्मरन्तौ** .................... + .................... लिखतः।
11. वृद्धा आशीर्वादं **दा+शतृ** .................... आसीत्।
12. ते युवकाः गीतानि **श्रु+शतृ** .................... नृत्यन्ति।
13. ताः बालिकाः कार्यं **कुर्वत्यः** .................... + .................... वार्तालापं कुर्वन्ति।
14. वाहनस्य चक्रे **भ्रम्+शतृ** .................... स्तः।
15. वृक्षात् **पतन्ति** .................... + .................... फलानि बालाः खादन्ति।
16. वटः उत्पन्नः **अस्+शतृ** .................... तिष्ठति।
17. सप्तवर्षीयः **सन्** .................... + .................... छात्रः पञ्च विद्याः अधीतवान्।

**ख. अधोलिखितवाक्येषु पुंल्लिङ्गस्य स्थाने स्त्रीलिङ्गे परिवर्तनं कृत्वा वाक्यानि लिखत–**

**यथा–** **नृत्यन् बालकः** आभूषणानि धारयति। **नृत्यन्ती बालिका** आभूषणानि धारयति।

1. विद्यालयं **प्रविशन्तः छात्राः** गुरुं नमन्ति। ....................................................
2. पुष्पं **जिघ्रन् युवकः** हृष्यति। ....................................................
3. अश्वम् **आरोहन् जनः** अपतत्। ....................................................
4. रूप्यकाणि **गणयन् धनिकः** प्रसीदति। ....................................................
5. कथां **शृण्वन् श्रोता** तूष्णीम् उपविशति। ....................................................

## मिश्रितप्रश्नाः

**क. कोष्ठकात् समुचितं रूपं विचित्य रिक्तस्थानानि पूरयत–**

**यथा**–जनाः .................... नद्याः जलं पिबन्ति। (प्रवहन्त्याः / प्रवहन्त्यः)

जनाः **प्रवहन्त्याः** नद्याः जलं पिबन्ति।

1. अहं भक्त्या .................... देव्याः वरं प्राप्स्यामि। (प्रसीदन्त्याः / प्रसीदन्तौ)
2. भगवन्! .................... आपत्तिभ्यः पाहि माम्। (आगच्छद्भ्यः / आगच्छन्तीभ्यः)
3. .................... छात्रायाः हस्तात् कलमम् अपतत्। (लिखन्त्याः / लिखतः)
4. .................... सिंहात् अहं भीतः। (गर्जतः / गर्जन्त्याः)
5. त्वम् अपि .................... बालिकया सह क्रीड। (क्रीडन्त्या / क्रीडन्त्याः)
6. .................... अध्यापिकानां वासः छात्रावासे एव। (पाठयन्तीनाम् / पाठयताम्)

**ख. रामदासः पुत्रस्य दिनचर्यां दृष्ट्वा चिन्तितोऽभवत्। पिता तस्य जीवने व्यवस्थितां दिनचर्याम् अपेक्षते। सः रात्रौ शयनपूर्वं तं बोधयति। 'किं कुर्वन्' इति 'क' स्तम्भे, 'जीवनं यापयेत्' इति 'ख' स्तम्भे लिखितम्। समुचितमेलनेन वाक्यानि रचयन्तु–**

| 'क' (किं कुर्वन्) | 'ख' (जीवनं यापयेत्)। |
|---|---|
| 1. हसन् | (क) वाहनं न आरोहेत्। |
| 2. पठन् | (ख) जलं न पिबेत्। |
| 3. धावन् | (ग) जलोग्रवेगम् न अवगाहेत्। |
| 4. स्नातुमिच्छन् | (घ) उत्थाय अतिथिजनान् अभिवादयेत्। |
| 5. क्रीडन् | (ङ) भोजनं न खादेत्। |
| 6. सभायां तिष्ठन् | (च) मनः न अनुभ्रामयेत्। |
| 7. उपविशन् | (छ) नखान् न वादयेत्। |

**यथा**–सभायां तिष्ठन् नखान् न वादयेत्।

1. ..........................................................................।
2. ..........................................................................।
3. ..........................................................................।
4. ..........................................................................।
5. ..........................................................................।
6. ..........................................................................।
7. ..........................................................................।

**ग. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि बहुवचने परिवर्तितानि कृत्वा लिखत–**

| एकवचनम् | बहुवचनम् |
|---|---|
| **यथा–** दुग्धं **पिबन् शिशुः हसति।** | दुग्धं पिबन्तः शिशवः हसन्ति। |
| 1. **फलं खादन् कपिः उत्कूर्दति।** | ........................................ |
| 2. मेघगर्जनं **शृण्वन् मयूरः नृत्यति।** | ........................................ |
| 3. पाठं **स्मरन्ती कन्या अलिखत्।** | ........................................ |
| 4. **अध्यापयन् शिक्षकः** श्यामपट्टे **लिखति।** | ........................................ |
| 5. पाषाणं **त्रोटयन् कर्मकरः** स्वेदं **परिमार्जयति।** | ........................................ |

**अस्माभिः अधीतम्**

- शतृप्रत्ययस्य प्रयोगः परस्मैपदिधातुभिः सह भवति।
- व्यवहारे 'शतृ' प्रत्ययस्य (श्+अत्+ऋ) 'अत्' इति अवशिष्यते।
- शतृ-प्रत्ययस्य प्रयोगः वर्तमानकाले विशेषणरूपे भवति।
- शतृ-प्रत्ययान्तपदस्य पुंलिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्ग-भेदात् त्रिविधानि रूपाणि भवन्ति।
- पुंल्लिङ्गे रूपाणि 'गच्छत्' वत् स्त्रीलिङ्गे 'नदी' वत् नपुंसकलिङ्गे 'जगत्' वत् चलन्ति।

# सप्तमः अभ्यासः
# अव्ययानि

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

- उच्चैः – सिंहः **उच्चैः** गर्जति।
- श्वः – **श्वः** परीक्षा भविष्यति।
- अद्य – **अद्य** मम परीक्षा अस्ति।
- यत्र – **यत्र** पुष्पाणि भवन्ति तत्र भ्रमराः भ्रमन्ति।
- अधुना – **अधुना** अहं पाठं पठामि।
- साम्प्रतम् – **साम्प्रतम्** अहं पाठं पठामि।
- शनैः – वृद्धा **शनैः** वदति।
- अपि – **अपि** भवान् कुशली?
- ततः – अधोक्षज! भवान् **ततः** पुस्तकम् आनयतु।
- सम्यक् – वातावरणं **सम्यक्** अस्ति।
- अन्यत्र – मम मित्रम् **अन्यत्र** कार्यं करोति।
- एकत्र – वायसाः **एकत्र** तिष्ठन्ति।
- सर्वदा – **सर्वदा** सत्यम् अनुसर।
- पुरा – **पुरा** देवदानवयोः युद्धम् अभवत्।
- तथा – यथा राजा **तथा** प्रजा।
- कुत्र – भवान् **कुत्र** निवसति?
- कदा – भवान् **कदा** जागरणं करोति?
- कथम् – भवन्तः **कथं** सन्ति?
- च – रामः श्यामः **च** गच्छतः।
- ह्यः – **ह्यः** अवकाशः आसीत्।
- तत्र – लेखनी **तत्र** अस्ति।
- इदानीम् – **इदानीम्** अहं पाठं पठामि।
- सम्प्रति – **सम्प्रति** अहं पाठं पठामि।
- वृथा – त्वं **वृथा** समयं न यापय।
- अपि – रामः पठति, श्यामः **अपि** पठति।
- इतः – भवान् **इतः** गच्छतु।
- इतस्ततः – स्ववस्तूनि **इतस्ततः** मा स्थापय।
- अत्र – **अत्र** छात्राः क्रीडन्ति।
- सर्वत्र – ईश्वरः **सर्वत्र** अस्ति।
- उभयत्र – **उभयत्र** वृक्षाः सन्ति।
- एकदा – **एकदा** अतिवृष्टिः अभवत्।
- यथा – **यथा** कर्म तथा फलम्।
- किम् – भवतः नाम **किम्**?
- कति – भवतः गृहे **कति** जनाः सन्ति?
- कुतः – भवती पुस्तकं **कुतः** आनयत्?
- किमर्थम् – भवान् **किमर्थं** न वदति?
- यदि-तर्हि – **यदि** सम्यक् पठति **तर्हि** सफलतां प्राप्नोति।
- यावत्-तावत् – **यावत्** सम्यक् न पठति **तावत्** सफलतां न लभते।
- यदा – **यदा** बुभुक्षा भवति तदा अहं भोजनं करोमि।
- तदा – यदा परीक्षा भवति **तदा** अहम् अधिकं पठामि।
- सहसा – शिक्षिका प्रश्नं कुर्वती एव आसीत् **सहसा** प्रधानाचार्या आगच्छत्।

**क. मञ्जूषायाः सहायता उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत-**

1. ........................ तस्य भार्या स्वबालापत्यस्य रक्षार्थं तम् अवस्थाप्य स्नातुं गता।
2. ........................ सत्वरं न गच्छामि तर्हि अन्यः कश्चित् श्राद्धार्थं वृतः भवेत्।
3. किन्तु बालस्य ........................ रक्षकः नास्ति ।
4. माधवः ........................ कृत्वा गतः।
5. कल्पद्रुमः कल्पितम् ........................ सूते।
6. अगच्छन् वैनतेयः ........................ पदमेकं न गच्छति।

**मञ्जूषा** – | एव, एकदा, अपि, अत्र, यदि, तथा। |

**ख.**
1. प्रतापस्य पार्श्वे सेनायाः भोजनसामग्र्याः ........................ अभावः आसीत्।
2. देव! ........................ भवान् वदति एवम्?
3. ........................ तु स स्वकीयैः प्राणैरेव स्वदेशं स्वतन्त्रं कर्तुम् इच्छति।
4. सेवकं परित्यज्य ........................ प्रस्थितो भवान्?
5. अश्मा ........................ याति देवत्वं महद्भिः सुप्रतिष्ठितः।

**मञ्जूषा** – | कुत्र, अधुना, च, अपि, कथम्। |

**ग.**
1. अत्र ........................ दैवं कारणमिति न उचितम्।
2. राजा ........................ सविनयम् अवदत्–'कोऽत्र सन्देहः?'
3. ........................ कोऽपि महातपा नाम मुनिरासीत्।
4. हे श्वेतकतो! गुरुं ........................ गच्छ अध्ययनार्थम्।
5. सः च 'सर्वश्रेष्ठः अहम्' ........................ मन्यमानः उद्धत-स्वभावः अभवत्।
6. ........................ अणिम्नः स्थूलं जगद् उद्भवति।

**मञ्जूषा** – | प्रति, एवम्, तु, इति, पुरा, पुनः। |

**घ.**
1. अष्टावक्रः जननीम् अपृच्छत् – '........................ आस्ते मम पिता?'
2. अहं पित्रा सह ........................ आगमिष्यामि।
3. द्वारपालः भोजं प्रति – '........................ आदिशति देवः' इत्यवदत्।
4. दिनकरदीप्तिः ........................ भवत्कीर्तिः दिक्षु प्रसारम् आप्नोतु।
5. भो नगरपाल! त्वं ........................ नगरं याहि।
6. तन्तुवाय! यदि काव्यं कर्तुं न जानासि ........................ त्वया मया सह राजसभां गन्तव्यम्।

**मञ्जूषा** – | भूयः, क्व, तर्हि, इव, क्षिप्रम्, यथा। |

ङ. 1. भारतीयविज्ञानपरम्परा ........................ उत्कृष्टा मानवीयमूल्ययुक्ता च आसीत्।

2. जलबिन्दवः शुष्कपर्णानाम् ........................ पतित्वा मधुरं सङ्गीतं जनयन्ति स्म।

3. आयुर्वेदः तृतीया विद्या, तत्र शरीररक्षा, शल्य-चिकित्सा, ओषधीनां प्रज्ञानं ........................ अधीतानि।

4. ........................ कश्चिद् दुःखभाग्भवेत्।

5. व्याधिना पीडितो ........................ भवेत्कश्चन ।

**मञ्जूषा** – च, मा, उपरि, अति, नो।

च. 1. ईश्वरः ........................ विद्यते।

2. भवतः समीपे ........................ रूप्यकाणि सन्ति?

3. यदा इच्छा भवति ........................ अत्र आगच्छतु।

4. ........................ सोमवासरः अस्ति, ह्यः रविवासरः आसीत्।

5. पुस्तकानि, लेखन्यः च ........................ स्थापयतु।

6. महेशस्य पितुः स्वास्थ्यम् अधुना ........................ अस्ति।

**मञ्जूषा** – तदा, कति, सम्यक्, सर्वत्र, अद्य, एकत्र।

## अस्माभिः अधीतम्

- अव्ययपदानि अपरिवर्तनीयानि भवन्ति।
- लिङ्ग-वचन-विभक्त्यनुसारं रूपाणि सर्वत्र समानानि एव भवन्ति।
- अव्ययपदानि कालसूचकानि स्थानसूचकानि वाक्ययोजकानि च भवन्ति।
- युग्मरूपेणापि अव्ययपदानां प्रयोगः भवति।
- कानिचन अव्ययपदानि प्रश्नवाचकानि अपि भवन्ति।

# अष्टमः अभ्यासः

# अपठितावबोधनम्

◆ **अधः प्रदत्तान् अनुच्छेदान् पठित्वा प्रश्नान् उत्तरत-**

1. आधुनिकजीवने सङ्गणकस्य आविष्कारेण उद्योगे, शिक्षायां, मनोरञ्जने इत्यादिषु सर्वेषु क्षेत्रेषु कल्पनातीतः विकासः दृश्यते। कोरोनाकारणात् यदा गृहवासः जातः तदा तु सङ्गणकयन्त्रस्य महत्त्वम् इतोऽपि प्रवृद्धम् अभवत्। आबालव्यवसायिनः सर्वेऽपि अनेन स्वस्वकार्यं साधितवन्तः। कार्यालयेषु वित्तकोषादिषु च महत्सङ्ख्याकाः गणनाः क्षणेनैव अनेन साधिताः भवन्ति तदपि दोषं विना। दूरभाष-वायुयान-आदिभिः दूरस्थः संसारः अवश्यमेव समीपम् आयाति परम् अन्तर्जालमाध्यमेन तु वसुधा अस्माकं मुष्टिकायामिव प्रतिभाति। अनेन प्रेषितः सन्देशः झटिति सप्तसमुद्रान् अपि अतिक्रम्य पारं गच्छति। अस्य साहाय्येन वयं दूरस्थान् बन्धुबान्धवान् द्रष्टुं तैः सह वार्तां च कर्तुं समर्थाः भवामः। वस्तुतः अधुना "वसुधैव कुटुम्बकम्" इति उक्तिः सफला अभवत्।

**(अ) एकपदेन उत्तरत-**

1. कस्य आविष्कारेण कल्पनातीतः विकासः दृश्यते?
2. सन्देशः कान् अतिक्रम्य पारं गच्छति?
3. केन वसुधा अस्माकं मुष्टिकायामिव प्रतिभाति?

**(आ) पूर्णवाक्येन उत्तरत -**

1. अधुना का उक्तिः सफला अभवत्?
2. सङ्गणकयन्त्रेण दोषं विना किं साधितं भवति?
3. सङ्गणकयन्त्रस्य महत्त्वं कदा प्रवृद्धम् अभवत्?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**(ई) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं निर्देशानुसारं चित्वा लिखत।**

1. अधुना "वसुधैव कुटुम्बकम्" इति उक्तिः सफला अभवत्, अत्र 'अभवत्' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

   (क) सफला (ख) अधुना (ग) उक्तिः (घ) वसुधैव

2. 'कल्पनातीतः' इति विशेषणस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम्?

   (क) उद्योगे (ख) विकासः (ग) क्षेत्रेषु (घ) शिक्षायाम्

3. 'पृथ्वी' इति पदस्य अर्थे गद्यांशे किं पदं प्रयुक्तम्?

   (क) वसुधा (ख) कुटुम्बकम् (ग) वस्तुतः (घ) दूरस्थान्

4. 'समीपस्थः' पदस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत।

   (क) दूरस्थः (ख) प्रेषितः (ग) संसारः (घ) साधितवन्तः

2. गोमायुः नाम कश्चन श्रृगालः आसीत्। एकदा सः महत्या बुभुक्षया पीडितः अभवत्। तया तस्य शरीरे शैथिल्यम् अभवत्। तदा सः आहारान्वेषणार्थम् अरण्ये इतस्ततः भ्रमति स्म। भ्रमन् सः अरण्यस्य मध्ये तत् स्थानं प्राप्तवान् यत्र केभ्यश्चित् दिनेभ्यः पूर्वं द्वयोः सैन्ययोः मध्ये युद्धं जातम् आसीत्। तत्र सैनिकैः प्रयोगः कृतः कश्चन दुन्दुभिः पतितः आसीत्। वायोः कारणात् समीपस्थायाः लतायाः शाखाः यदा दुन्दुभिं घट्टयन्ति तदा ततः महान् शब्दः भवति स्म। श्रृगालः दूरादेव तं महान्तं शब्दं श्रुतवान्। तस्य महाशब्दस्य श्रवणेन श्रृगालः भीतः अभवत्। सः एवम् अचिन्तयत् – हन्त! हा हतोऽस्मि। एवं शब्दं कुर्वतः प्राणिनः दृष्टिपथं यावत् न गच्छामि तावदेव इतः अन्यत्र गच्छामि इति। सः पुनः चिन्तयति – अथवा झटिति एवं निर्णयकरणं नोचितम्। भयं हर्षः वा यदा जायते तद्विषये विमर्शः करणीयः, झटिति किमपि कार्यं न कर्तव्यम्। एवं सर्वं विचिन्त्य यः कार्यं करोति सः सन्तापं न प्राप्नोति।

**(अ) एकपदेन उत्तरत–**

1. श्रृगालः कया पीडितः अभवत्?
2. यः विचिन्त्य कार्यं करोति सः किं न प्राप्नोति?
3. श्रृगालस्य नाम किम् आसीत्?

**(आ) पूर्णवाक्येन उत्तरत–**

1. श्रृगालः भ्रमन् अरण्यमध्ये किं प्राप्तवान्?
2. श्रृगालः पुनः किं चिन्तयति?
3. गोमायुः किमर्थं वने इतस्ततः भ्रमति स्म?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**(ई) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं निर्देशानुसारं चित्वा लिखत –**

1. ''महाशब्दस्य श्रवणेन श्रृगालः भीतः अभवत्।'' अस्यां पङ्क्तौ कर्तृपदं किम्?
   (क) महाशब्दस्य (ख) श्रृगालः (ग) श्रवणेन (घ) अभवत्
2. ''महान्'' इति विशेषणपदस्य किं विशेष्यपदम् अनुच्छेदे प्रयुक्तम्?
   (क) शब्दः (ख) गोमायुः (ग) विमर्शः (घ) कर्त्तव्यम्
3. ''दुःखम्'' इति पदस्य किं समानार्थकं पदम् अनुच्छेदे प्रयुक्तम्?
   (क) हर्षः (ख) सन्तापम्/सन्तापः (ग) भयम् (घ) विमर्शः
4. 'अविचार्य' इति पदस्य विलोमपदम् अनुच्छेदात् चित्वा लिखत।
   (क) विचिन्त्य (ख) श्रुत्वा (ग) भ्रमन् (घ) कर्तव्यम्

3. ग्रीष्मकालानन्तरं वर्षाकालः आगच्छति। आकाशे सूर्यमाच्छाद्य मेघाः इतस्ततः विहरन्ति। तदा कृषका मुदिताः भवन्ति। यदा वृष्टिः भवति तदा भगवतः आशीर्वादा इव जलबिन्दवः भुवि निपतन्ति। आकाशे मेघाः उच्चैः गर्जन्ति। सर्वत्र गर्जनोत्पन्नप्रकम्पनं भयङ्करं भवति। तदा मयूराः केकारवं कुर्वन्तः हर्षिताः भूत्वा नृत्यन्ति। नद्यः तडागाः च जलपूर्णाः भवन्ति। कृषकाः क्षेत्राणि कृष्ट्वा बीजानि वपन्ति। क्रमेण सस्यसम्पद् वर्धते। परं यदा अतिवृष्टिः भवति तदा महती विपद् सञ्जायते। नदीनां तीरेषु विद्यमानानि लघूनि गृहाणि जले निमज्जितानि भवन्ति। पशुपक्षिणः, लघवः प्राणिनः च म्रियन्ते। एवमेव अनावृष्ट्या अपि आपदः सम्भवन्ति। तदा जलस्य अभावेन तडागाः शुष्यन्ति। वृक्षाः विनश्यन्ति। कृषिकर्म असाध्यं भवति। कृषिं विना धान्योत्पत्तिः एव न भवति। प्राणान् धारयितुम् आवश्यकानां वस्तूनाम् अभावेन जनाः क्लेशम्

अनुभवन्ति। क्रमशः जीवनम् एव दुर्वहं भवति। अतिवृष्टेरनावृष्टेः च मूलं मानवः एव। सघनविपिनानाम् अनियन्त्रितनाशनेन पर्यावरणम् असन्तुलितं भवति। पर्यावरणप्रदूषणेन ऋतूनां गतयः परिवर्तिताः भवन्ति। अतः पर्यावरणसंरक्षणाय वयं जागरुकाः भवेम।

**(अ) एकपदेन उत्तरत-**

1. वर्षाकालः कदा आगच्छति?
2. सर्वत्र गर्जनोत्पन्नप्रकम्पनं कीदृशं भवति?
3. जलस्य अभावेन के शुष्यन्ति ?

**(आ) पूर्णवाक्येन उत्तरत-**

1. पर्यावरणं कथम् असन्तुलितं भवति?
2. कदा भगवतः आशीर्वादा इव जलबिन्दवः निपतन्ति?
3. यदा अतिवृष्टिः भवति तदा नदीनां तीरेषु किं भवति?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**

**(ई) यथानिर्देशम् उत्तरत-**

1. 'कृषकाः' क्षेत्राणि कृष्ट्वा बीजानि वपन्ति।' अत्र किं क्रियापदम्?
   (क) कृष्ट्वा (ख) बीजानि (ग) वपन्ति (घ) उपर्युक्तानि सर्वाणि
2. 'असन्तुलिम्' इति विशेषणपदस्य विशेष्यपदं किम्?
   (क) पर्यावरणम् (ख) विपिनम् (ग) ऋतुः (घ) मानवः
3. 'अरण्यानाम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?
   (क) मेघानाम् (ख) विपिनानाम् (ग) निमज्जितानाम् (घ) पर्यावरणम्
4. 'दुःखिताः' इति पदस्य विपर्ययपदं किं प्रयुक्तम्?
   (क) परिवर्तिताः (ख) जनाः (ग) आशीर्वादाः (घ) मुदिताः

**4.** संस्कृतभाषायाम् एव विश्वस्य प्राचीनतमः आलेखः ऋग्वेदः निबद्धः। अस्यां भाषायां भारतीय-संस्कृतेः मूलाधारभूतानि रामायणं, महाभारतं पुराणानि चापि प्राप्यन्ते। चत्वारो वेदाः, सर्वा उपनिषदः, अष्टादशपुराणानि अन्यानि च महाकाव्यनाट्यादीनि अस्यामेव भाषायां लिखितानि सन्ति। इयं सा भाषा यस्यां निबद्धाः विचाराः प्राचीनकालात् आरभ्य आधुनिककालं यावत् सततम् अखिलं विश्वं प्रभावितं कुर्वन्ति। वेदानां ज्ञानं विश्वस्य मानवेभ्यः प्रेरणादायकम् अस्ति। श्रीमद्भगवद्गीतायाः सन्देशः विश्वस्य जनेषु विविधभाषानुवादमाध्यमेन प्रख्यातः। विश्वस्य अनेकेषु विश्वविद्यालयेषु संस्कृतस्य भिन्नशाखानाम् अध्ययनार्थं विभागाः सन्ति। इयं देवभाषा सम्पूर्णे विश्वे भारतवर्षस्य गौरवं वर्धयति। विद्यमानेषु निखिलेषु अपि वाङ्मयेषु संस्कृतभाषायाः वाङ्मयं सर्वश्रेष्ठं सुसम्पन्नं च वर्तते। धन्योऽयं भारतदेशः यत्र सुरभारती समुल्लसति।

**(अ) एकपदेन उत्तरत-**

1. विश्वस्य प्राचीनतमः आलेखः कः?
2. संस्कृतं कस्य गौरवं वर्धयति?
3. अनेकेषु विश्वविद्यालयेषु कस्य अध्ययनस्य कृते विभागाः सन्ति?

(आ) पूर्णवाक्येन उत्तरत-

1. संस्कृतभाषायां किं किं प्राप्यते?
2. श्रीमद्भगवद्गीतायाः सन्देशः कथं प्रख्यातः?
3. मानवेभ्यः किं प्रेरणादायकम् अस्ति?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।

(ई) यथानिर्देशम् उत्तरत-

1. 'सन्ति' इति क्रियापदस्य किं कर्तृपदम्?
   (क) संस्कृतस्य (ख) अनेके (ग) विश्वस्य (घ) विभागाः
2. 'विश्वम्' इति पदस्य किं विशेषणपदम्?
   (क) अखिलम् (ख) सम्पूर्णम् (ग) संस्कृतम् (घ) सततम्
3. 'निरन्तरम्' इत्यर्थे किं पदं गद्यांशे प्रयुक्तम्?
   (क) सततम् (ख) विश्वम् (ग) अखिलम् (घ) संस्कृतम्
4. 'वेदानां ज्ञानं विश्वस्य मानवेभ्यः प्रेरणादायकम् अस्ति।' अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम्?
   (क) ज्ञानम् (ख) मानवेभ्यः (ग) प्रेरणादायकम् (घ) अस्ति

5. अनुशासनं जीवनाय अनिवार्यं तत्त्वम् अस्ति। व्यावहारिकजीवने अनुशासनस्य अतीव महत्त्वं विद्यते। किं नाम अनुशासनम् इति जिज्ञासायाम् अयमेव व्यावहारिकः अर्थः मनसि आगच्छति यत् निर्धारितानां नियमानां पालनं, मातुः, पितुः, गुरूणां ज्येष्ठानां च आज्ञापालनम् एव अनुशासनं भवति। अनुशासनस्य पालनेन न केवलं जीवनं व्यवस्थितं भवति अपितु अतिकठिनानि लक्ष्याणि अपि सरलतया प्राप्तानि भवन्ति। अनुशासनशीलाः जनाः जीवने सर्वत्र सफलतां सम्मानं च प्राप्नुवन्ति। प्रकृतेः तत्त्वानि अपि सर्वदा अनुशासनं पालयन्ति। यथा – सूर्यः निश्चिते समये उदितः भवति निर्धारिते च समये एव अस्तं गच्छति। संसारे ये केचन सुप्रसिद्धाः महापुरुषाः अभवन् ते सर्वे अनुशासनप्रियाः आसन्। सर्वे मानवाः यदि गृहे, कार्यस्थले, मार्गे, समाजे च अनुशासनं पालयेयुः तर्हि सर्वमपि सुव्यवस्थितं भवेत्। अतः इदम् अनिवार्यम् अस्ति यत् सर्वे जनाः बाल्यादेव अनुशासनस्य पालनं कुर्वन्तु।

(अ) एकपदेन उत्तरत-

1. सुप्रसिद्धाः महापुरुषाः कीदृशाः आसन्?
2. जीवनाय अनिवार्यं तत्त्वं किम् अस्ति?
3. कः निश्चिते समये उदितः भवति?

(आ) पूर्णवाक्येन लिखत-

1. सर्वमपि सुव्यवस्थितं कथं भवेत्?
2. अनुशासनं कि भवति?
3. अनुशासनशीलाः जनाः जीवने किं प्राप्नुवन्ति?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।

**(ई) यथानिर्देशम् उत्तरत-**

1. 'प्रकृतेः तत्त्वानि अपि सर्वदा अनुशासनं पालयन्ति।' अत्र क्रियापदं किम् अस्ति?

   (क) प्रकृतेः (ख) सर्वदा (ग) तत्त्वानि (घ) पालयन्ति

2. 'निर्धारिते' इति विशेषणपदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम्?

   (क) भवति (ख) अस्तम् (ग) समये (घ) निश्चिते

3. 'आदरम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

   (क) सम्मानम् (ख) आज्ञापालनम् (ग) सफलताम् (घ) अनिवार्यम्

4. 'जनाः बाल्यादेव अनुशासनस्य पालनं कुर्वन्तु।' वाक्येऽस्मिन् 'कुर्वन्तु' इति क्रियापदस्य कर्तृपदं किम्?

   (क) अनुशासनस्य (ख) जनाः (ग) बाल्यादेव (घ) पालनम्

**6.** एकः भिक्षुकः भिक्षाटनं करोति स्म। तस्य भिक्षापात्रे अञ्जलिपरिमिताः तण्डुला एव आसन्। ईश्वरं प्रार्थयन् सः अवदत्- "भगवन्! एतेन मम परिवारस्य उदरपूर्तिः न भविष्यति। प्रभो! दयां कुरु!" तदैव कश्चिद् अन्यः भिक्षुकः तत्र आगच्छति वदति च - "भिक्षां देहि" इति। प्रथमः भिक्षुकः क्रोधेन अगर्जत् - "अरे भिक्षुक! भिक्षुकमेव भिक्षां याचसे। तव लज्जा नास्ति।" द्वितीयः भिक्षुकः तम् उक्तवान् - "तव भिक्षापात्रे तु अञ्जलिपरिमिताः तण्डुलाः सन्ति, मम पात्रं तु रिक्तम् अस्ति। दयां कुरु। अर्धं मह्यं देहि।" प्रथमः भिक्षुकः तस्य निवेदनं न स्वीकृतवान्। द्वितीयः भिक्षुकः पुनः अवदत्- "भोः! निष्ठुरः मा भव। केवलम् एकम् एव तण्डुलं देहि।" प्रथमः भिक्षुकः तस्मै केवलम् एकम् एव तण्डुलम् अयच्छत्। द्वितीयः भिक्षुकः एकं तण्डुलं गृहीत्वा अगच्छत्। किञ्चित्कालानन्तरं प्रथमः भिक्षुकः भिक्षापात्रे तण्डुलाकारम् एकं स्वर्णकणं पश्यति। आश्चर्यचकितः शिरः ताडयन् सः पश्चात्तापं करोति - "धिङ् माम्। धिङ् मम मूर्खताम्।'

**(अ) एकपदेन उत्तरत-**

1. द्वितीयः भिक्षुकः अन्ते कति तण्डुलान् अयाचत?
2. शिरः ताडयन् भिक्षुकः किं करोति?
3. भिक्षुकस्य भिक्षापात्रे कियन्तः तण्डुलाः आसन्?

**(आ) पूर्णवाक्येन लिखत-**

1. प्रथमः भिक्षुकः अन्ते स्वभिक्षापात्रे किं पश्यति?
2. प्रथमः भिक्षुकः ईश्वरं किं प्रार्थयत्?
3. क्रुद्धः भिक्षुकः गर्जन् किम् अकथयत्?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**

**(ई) यथानिर्देशम् उत्तरत-**

1. 'अयच्छत्' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्?

   (क) तण्डुलम् (ख) तस्मै (ग) केवलम् (घ) भिक्षुकः

2. 'तव भिक्षापात्रे तु अञ्जलिपरिमिताः तण्डुलाः सन्ति।' वाक्येऽस्मिन् विशेषणपदं किम्?

   (क) भिक्षापात्रे (ख) अञ्जलिपरिमिताः (ग) तव (घ) तण्डुलाः

3. 'पश्चात्' इति अर्थे गद्यांशे किं पदं प्रयुक्तम्?

(क) अनन्तरम् (ख) किञ्चित् (ग) आकारम् (घ) पश्चात्ताप:

4. अनुच्छेदे 'दयालु:' इति पदस्य क: विपर्यय: आगत:?

(क) तण्डुल: (ख) भिक्षुक: (ग) निष्ठुर: (घ) भव

**7.** राष्ट्रस्य सर्वाङ्गीणविकासे छात्राणां महत्त्वपूर्णा भूमिका वर्तते यत: अद्यतनीया: विद्यार्थिन: एव श्वस्तनीया: प्रतिभावन्त: समृद्धा: सर्वसमर्था: राष्ट्रोन्नते: नायका: सन्ति। राष्ट्रस्य उत्थानं पतनञ्च तान् एव आश्रयत:। अत: छात्राणां भाविजीवनस्य निर्माणे शिक्षकै: अभिभावकै: नागरिकैश्च सर्वै: एव सतर्कता सावधानता च परिलक्षणीया। छात्रा: स्वयम् अपि स्वस्य भाविजीवनस्य निर्माणम् अतीव सतर्कतया सावधानतया च कुर्यु:। इदमेव तेभ्य: सर्वेभ्य: अपेक्षते यत् ते स्वराष्ट्रं, स्वसमाजं, स्वधर्मं स्वसंस्कृतिञ्च प्रति अहर्निशं जागरूका: भवेयु: यत: तेषां संयमितेन उत्कृष्टेन जीवनेन राष्ट्रं बलं गतिं च प्राप्तुं शक्नुयात् । येषां छात्राणां जीवनं राष्ट्रिय-भावनया परिपूर्णं न भवति तेषां जीवनं तस्मै राष्ट्राय समाजाय च भारायते। विद्यार्थिनां लक्ष्यं विद्योपार्जनेन सह चरित्रनिर्माणम् अपि भवेत्। विद्योपार्जनं कृत्वा चरित्रवन्त: छात्रा: एव राष्ट्रम् उन्नतिपथं नेतुं समर्था: भवन्ति।

**(अ) एकपदेन उत्तरत-**

1. राष्ट्रस्य विकासे केषां महत्त्वपूर्णा भूमिका वर्तते?
2. कीदृशा: छात्रा: राष्ट्रम् उन्नतिपथं नेतुं समर्था: भवन्ति?
3. छात्रा: कस्य निर्माणं सतर्कतया सावधानतया च कुर्यु:?

**(आ) पूर्णवाक्येन उत्तरत-**

1. राष्ट्रोन्नते: नायका: के सन्ति?
2. कीदृशा: छात्रा: राष्ट्राय समाजाय वा भारभूता: एव भवन्ति ?
3. छात्रेभ्य: किम् अपेक्षते ?

**(इ) उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।**

**(ई) निर्देशानुसारं शुद्धम् उत्तरं विकल्पेभ्य: चित्वा लिखत-**

1. अनुच्छेदे 'छात्राणाम्' इत्यस्य क: पर्याय: आगत:?

(क) तेषाम् (ख) भारतस्य (ग) विद्यार्थिन: (घ) विद्यार्थिनाम्

2. 'शक्नुयात्' क्रियापदस्य कर्तृपदं किम्?

(क) तेषाम् (ख) राष्ट्रम् (ग) बलम् (घ) जीवनेन

3. 'असमर्था:' इत्यस्य पदस्य क: विपर्यय: अनुच्छेदे आगत:?

(क) समर्था: (ख) समृद्धा: (ग) नायका: (घ) जागरूका:

4. 'राष्ट्रस्य उत्थानं पतनञ्च तान् एव आश्रयत:।' अत्र 'तान्' इति सर्वनामपदं केभ्य: प्रयुक्तम्?

(क) सर्वेभ्य: (ख) विद्यार्थिभ्य: (ग) शिक्षकेभ्य: (घ) नागरिकेभ्य:

**8.** एकदा एक: वैदेशिक: प्रथमराष्ट्रपते: श्रीमत: राजेन्द्रप्रसादस्य गृहं प्राप्तवान्। राष्ट्रपते: परिचारक: तम् आतिथ्यगृहे प्रतीक्षितुम् अकथयत् तम् असूचयत् च यद् राष्ट्रपतिमहोदया: सम्प्रति पूजां कुर्वन्ति इति। स: अतिथि: ज्ञातुम् ऐच्छत् यद् राष्ट्रपति: कथं करोति पूजाम्? परिचारकस्य मार्गदर्शनेन सङ्कोचं कुर्वन् स: अन्त: पूजागृहं प्राविशत्। स: आगन्तुक:

राष्ट्रपतेः समक्षं विद्यमानं मृत्पिण्डम् अवन्दत श्रद्धया च तत्र उपाविशत्। पूजां परिसमाप्य राष्ट्रपतिमहोदयः ससम्मानं तम् आतिथ्यगृहस्य अन्तः अनयत्। श्रीराजेन्द्रमहोदयः तस्य कौतूहलं विज्ञाय तस्मै समबोधयत् – एतत् मृत्पिण्डं भारतस्य भूम्याः प्रतीकम् अस्ति। वयं मृत्तिकायाः कणेषु अपि ईश्वरस्य दर्शनं कुर्मः। अस्माकं चिन्तने तु मानवेषु पशुपक्षिषु, वृक्षेषु, पाषाणादिषु सर्वेषु चेतनाचेतनेषु अपि ईश्वरस्य सत्ता अस्ति।

**(अ) एकपदेन उत्तरत–**

1. श्रीराजेन्द्रप्रसादस्य गृहं कः प्राप्तवान्?
2. चेतनाचेतनादिषु कस्य सत्ता अस्ति?
3. राष्ट्रपतेः परिचारकः वैदेशिकं कुत्र प्रतीक्षितुम् अकथयत् ?

**(आ) पूर्णवाक्येन उत्तरत–**

1. अतिथिः किं ज्ञातुम् ऐच्छत्?
2. श्रीराजेन्द्रमहोदयः आगन्तुकं किं समबोधयत् ?
3. भारतीयचिन्तनानुसारम् ईश्वरस्य सत्ता कुत्र अस्ति?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।**

**(ई) निर्देशानुसारं शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत–**

1. 'एकदा एकः वैदेशिकः प्रथमराष्ट्रपतेः श्रीराजेन्द्रप्रसादस्य गृहं प्राप्तवान्।' अत्र कर्तृपदं किम् अस्ति?
   (क) वैदेशिकः (ख) प्रथमराष्ट्रपतेः (ग) श्रीराजेन्द्रप्रसादस्य (घ) गृहम्
2. 'बहिः' पदस्य किं विपर्ययपदम् अनुच्छेदे प्रयुक्तम्?
   (क) समक्षम् (ख) सम्पदम् (ग) अन्तः (घ) विद्यमानम्
3. 'तस्मै' इति सर्वनामपदं कस्मै प्रयुक्तम्?
   (क) परिचारकाय (ख) आगन्तुकाय (ग) राजेन्द्रप्रसादाय (घ) मृत्पिण्डाय
4. 'एतत्' इत्यस्य पदस्य किं विशेष्यपदं प्रयुक्तम्?
   (क) प्रतीकम् (ख) महतीम् (ग) भारतीयाः (घ) मृत्पिण्डम्

9. श्रुतिपरम्परया समागताः प्राचीनतमाः ग्रन्थाः वेदाः सन्ति। ते चत्वारः सन्ति – ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्च। वेदाः मानवकल्याणाय पथप्रदर्शकाः ग्रन्थाः सन्ति। वैदिककालीनं जीवनम् आदर्शभूतम् आसीत्। तदा मानवाः प्रमादरहिताः उद्योगशीलाः आसन्। वेदानां सन्देशः अस्ति यत् समाजे एकता भवेत्, जनेषु परस्परम् उच्चनीचभावः न भवेत् इति। 'सङ्गच्छध्वं संवदध्वम्' इति सङ्गठनसूक्तम् एतदेव उपदिशति यत् जनानां मनसि समानभावनाः स्युः। यदा सर्वे मिलित्वा कार्यं कुर्वन्ति, तदा समाजः उन्नतिशीलः भवति। अस्माभिः वैदिकजीवनमूल्यानि एव आचरणीयानि येन समाजे कश्चन दीनः दुर्बलः च न भवेत्। समाजघातकानि दुर्व्यसनानि सर्वथा त्याज्यानि भवेयुः। वेदेषु दुर्व्यसनानां निन्दा उद्योगस्य च प्रशंसा कृता वर्तते। उद्योगशीलाः जनाः एव स्वस्य, समाजस्य राष्ट्रस्य च उद्धारकाः भवन्ति इति उपदिशन्ति वेदाः।

**(अ) एकपदेन उत्तरत–**

1. वेदेषु कस्य प्रशंसा कृता?
2. वेदकालीनं जीवनं कीदृशम् आसीत्?
3. 'उच्चनीचभावः न भवेत्' इति केषां सन्देशः?

(आ) पूर्णवाक्येन उत्तरत-

1. उद्योगशीलाः जनाः कीदृशाः भवन्ति?
2. वेदाः के सन्ति?
3. सङ्घटनसूक्तं किम् उपदिशति?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।

(ई) निर्देशानुसारम् उत्तरत-

1. 'भवेयुः' इति क्रियापदस्य कर्तृपदं किम्?
2. 'उद्योगशीलाः' इति विशेषणस्य विशेष्यं किम्?
3. 'यदा सर्वे मिलित्वा कार्यं कुर्वन्ति।' अत्र सर्वे इति सर्वनामपदं केभ्यः प्रयुक्तम्?
4. 'मानवानाम्' इति अर्थे अनुच्छेदे किं पदं प्रयुक्तम्?

10. कदाचित् केचन चौराः कस्यचित् साधोः कुटीरम् आगच्छन्। ते चौराः कुटीरम् आगत्य तस्य धेनुं चोरयित्वा नयन्ति स्म। तस्मिन् समये साधुः ईश्वर-स्तुत्यां रतः आसीत्। यदा धेनुः उच्चैः अरम्भत तदा उन्मीलितनेत्रः साधुः अपश्यत् यत् केचन जनाः तस्य धेनुं नयन्ति । साधुः तान् शान्तभावेन अवदत् - 'तिष्ठत भ्रातरः! एतं गोवत्सम् अपि नयत अन्यथा मातृ-वियोगेन एषः स्वप्राणान् त्यक्ष्यति।' साधोः हृदयस्य करुणभावनया चौराणां मनः परिवर्तितम् अभवत्। ते साधोः चरणयोः अपतन्, भविष्ये च चौरकर्म त्यक्त्वा उद्यमेन धनम् अर्जयितुम् प्रेरिताः अभवन्।

(अ) एकपदेन उत्तरत-

1. केषां मनः परिवर्तितम् अभवत्?
2. चौराः कां चोरयित्वा नयन्ति स्म?
3. साधुः कस्यां रतः आसीत्?

(आ) पूर्णवाक्येन उत्तरत-

1. उन्मीलितनेत्रः साधुः किम् अपश्यत्?
2. साधुः चौरान् किम् अकथयत्?
3. चौराणां मनः कथं परिवर्तितम् अभवत्?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।

(ई) निर्देशानुसारम् उत्तरत-

1. 'नयन्ति स्म' इति क्रियापदस्य कर्तृपदं किम्?
2. 'निमीलितनेत्रः' इति पदस्य विलोमपदम् अनुच्छेदे किम्?
3. 'तस्य धेनुम् अनयन्।' इति वाक्ये 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?
4. 'साधोः' इति पदस्य विशेषणपदम् अनुच्छेदे किम्?

# नवमः अभ्यासः

# रचनात्मककार्यम्

## (क) पत्रलेखनम्

- **पत्रलेखने अवधातव्याः बिन्दवः–**

**(अ) शीर्षकम्**

(i) प्रारम्भे यस्मात् स्थानात् पत्रं लिख्यते तस्य स्थानस्य नाम/सङ्केतश्च लेखनीयः

(ii) स्थाननाम्नः अधः तस्य दिनस्य तिथिः दिनाङ्कः वा लिख्यते।

**(आ) सम्बोधनं कुशलवृत्तञ्च**

वैयक्तिकपत्रेषु विविधानि सम्बोधनानि भवन्ति यथा मान्ये! पूज्ये! प्रियबन्धो! प्रियसखि! नमस्कारः आशीर्वादः च (गुरुजनेभ्यः नमस्कारः, कनिष्ठेभ्यः आशीर्वादः)

सम्बोधनानन्तरं वैयक्तिकपत्रेषु कुशलनिवेदनं कुशलप्रश्नः च लेखनीयः।

**(इ)** पत्रस्य प्रतिपाद्यविषयः विस्तरेण लेखनीयः।

**(ई) समाप्तिः**

पत्रस्य विषयप्रतिपादनानन्तरं वैयक्तिकपत्रेषु नमस्कारनिवेदनादिकं भवति। अन्ते 'इति' शब्दोत्तरलेखितुः स्वीकर्तुः च सम्बन्धम् अवलम्ब्य एकं पदं पदद्वयं वा भवति, यथा इति भवदीयः/त्वदीयः विश्वासी आदयः।

**(उ)** तदनन्तरं लेखकः स्वस्य हस्ताक्षरं करोति।

**(ऊ)** वाणिज्यपत्रेषु कार्यालयीयपत्रेषु च लेखकस्य हस्ताक्षरानन्तरं स्वस्य पदनाम, सङ्केतः निर्देशः च भवेत्।

पत्रसङ्केतस्य प्रारूपम्–

सविधे




**प्रो. सतीश आनन्दः**
बी/डी 38, गान्धीनगरम्
जम्मूतवी–180001
जम्मू–काश्मीर–राज्यम्

**उदाहरणं दृष्ट्वा स्वस्य पत्रसङ्केतं लिखत–**



## 1. अधोलिखितानि पत्राणि ध्यानेन पठत अवगच्छत च।

प्रतिष्ठायाम्

प्रधानाचार्यमहोदय:

केन्द्रीय-विद्यालय:

अरमापुरम्

उत्तर-प्रदेश:

विषय: - शुल्कक्षमापनार्थं निवेदनम्।

श्रीमन्!

सविनयं निवेदनम् अस्ति यत् अहं भवत: विद्यालये नवमकक्षाया: छात्र: अस्मि। मम पिता एक: श्रमिक: अस्ति। तस्य मासिकं वेतनं पञ्चदशसहस्ररूप्यकाणि मात्रमेव अस्ति। मम एक: भ्राता अष्टमकक्षायां भगिनी च पञ्चमकक्षायां पठति। अस्माकं कुटुम्बस्य निर्वाह: अतीव काठन्येन भवति।

अहं कक्षायां प्रतिवर्षं प्रथमं स्थानं प्राप्नोमि। अत: शुल्कक्षमापनार्थं भवन्तं प्रार्थये। आशासे अत्रभवान् मम एतां प्रार्थनां स्वीकृत्य अनुग्रहीष्यति।

सधन्यवादम्।

भवतां विनीत: शिष्य:,

सौम्य:

नवमकक्षास्थ:, अनुक्रमाङ्क:-षोडश

दिनाङ्क : ..............................

## 2. स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति पत्रम्-

रामाकृष्णपुरम् सैक्टर-2

89/5, सोमविहार: नवदिल्लीत:

दिनाङ्क : ..............................

प्रिय वयस्य श्रीनिवास!

सप्रेम नमस्ते

पितु: स्थानान्तरणवशात् वयं सकुटुम्बा: सकुशलं दिल्लीं प्राप्ता:। अहम् अत्र एकस्मिन् प्रख्याते विविधशैक्षिक-उपकरणसम्पन्ने 'नवजीवनम्' इति नाम्नि विद्यालये प्रवेशं लब्धवान् प्रवेशं प्राप्य च भृशं प्रसन्न: अस्मि।

यद्यपि अत्र आङ्ग्लभाषामाध्यमेन शिक्षा प्रदीयते तथापि संस्कृतपठनपाठनस्य विशिष्टा व्यवस्था वर्तते। अस्मिन् विद्यालयभवने त्रय: विभागा: सन्ति - प्राथमिक:, माध्यमिक:, वरिष्ठमाध्यमिक: च।

अस्य विद्यालयस्य प्रमुखानि आकर्षणानि सन्ति - विशालानि क्रीडाक्षेत्राणि, निर्मलजलोपेतं तरणतालम्, विविध-कलाकौशल - प्रशिक्षणार्थं कार्यशाला:, विज्ञानप्रयोगशाला:, समृद्धा: सङ्गणकप्रयोगशाला:, व्यायामशाला, बृहत्पुस्तकालय: इत्यादीनि।

एष: सहशिक्षाविद्यालय: अस्ति। प्रधानाचार्य: अतीव विनम्र: परिश्रमी, कर्मठ:, सद्व्यवहारशील: च अस्ति। शिक्षिका: शिक्षका: च अतीव सुयोग्या: शिक्षणप्रवीणा: च सन्ति।

विद्यार्थिन: सुसभ्या: अनुशासनप्रिया: परिश्रमिण: च वर्तन्ते। प्रतिवर्षं दशम-द्वादशकक्षयो: परीक्षापरिणाम: शतप्रतिशतं भवति।

भवान् स्वाध्यायविषये विस्तरेण पत्रं लिखतु। स्वगृहे सर्वेभ्य: मम वन्दनं निवेदयतु।

तव अभिन्नं मित्रम्,

वैभव:।

**पत्रसङ्केत:**

| |
|---|
| सेवायाम् ............ |
| श्रीनिवास: |
| द्वारा डॉ० राघवेन्द्र: |
| 56, त्यागराजनगरम् |
| बैङ्गलूरु: (कर्णाटकम्) |

### 3. पर्वतीय-स्थलस्य भ्रमणार्थं गताया: सुताया: मातरं प्रति पत्रम्-

77, बादामी-उद्यानम्

श्रीनगरम्,

जम्मू-काश्मीर-राज्यम्।

दिनाङ्क : ...............................

श्रद्धेये मातृचरणे!

सादरं प्रणामा:।

भवत्या: आशीर्वादै: परह्य: सर्वे वयं जम्मूत: बसयानेन सकुशलं समागता:। यथाश्रुतं श्रीनगरं नूनं वसुन्धरायां नन्दनवनमिव विभाति।

जम्मूत: श्रीनगरस्य सम्पूर्ण: मार्ग: अतीव रमणीय:। ऊधमपुरत: ऊर्ध्वम् आरोहणं प्रारभते। मार्गे 'कुद्द' इति नामकं स्थानम् अतीव रम्यं वर्तते। तत्रत्यं च जलं पातुं दूरादपि जना: आगच्छन्ति, स्वस्था: च भवन्ति। तत: किञ्चिद्दूरे एकं 'पटनीटॉप' नामकम् उच्चतमं शिखरस्थं पर्यटनस्थलं यात्रिजनान् आकर्षयतीव।

श्रीनगरे अस्माकं वास: लालचौकस्य समीपे एकस्मिन् यात्रिनिवासे अस्ति।

अत्र शालीमार-चश्माशाही-निशातबाग-हारवन-नामधेयानि कृत्रिमनिर्झरसंवलितानि नाना-कुसुम-शबलानि च चत्वारि उद्यानानि काश्मीरम् अपरं देवलोकं कुर्वन्ति। काश्मीरस्य मध्ये 'डललेक' विद्यते यत्र जलपोतसमाना: सर्वसुविधापूर्णा: गृहनौका: (हाउस-बोट) पर्यटकेभ्य: गृहनिवासानन्दं यच्छन्ति।

नवनववस्त्रै: सुसज्जिता: 'शिकारा:' इति नाम्न्य: लघुनौका: नववधू-समाना: सन्ति यत्र यात्रिण: जलविहारस्य आमोदम् अनुभवन्ति। 'डललेक' इति तडागम्। उभयत: विशालानि विपणनकेन्द्राणि विद्यन्ते। 'चारचिनार' नामकम् एकं कृत्रिमं आमोदस्थलं 'डललेक' इत्यस्य मध्ये वर्तते। समीपे एव नेहरू-उद्यानमपि पर्यटकानां महत् आकर्षणकेन्द्रम् अस्ति। दुर्गानाग-नामकात् निर्झरात् आरभ्य पञ्चाशदधिकत्रिशतम् (350) फुट-उपरि शङ्कराचार्यमन्दिरं काश्मीरं स्वयं गत्वा एव दर्शनीयम्। शेषं भ्रमणानन्तरं विस्तरेण लेखिष्यामि।

पितृचरणयो: मे प्रणामा: कथनीया:।

भवत्या: स्नेहमयी पुत्री,

प्रिया

## 4. पुस्तकप्रेषणविषये प्रकाशकं प्रति पत्रम्

सेवायाम् / प्रतिष्ठायाम्

श्रीमन्तः प्रबन्धकमहोदयाः,

श्रीअक्षरप्रकाशनसंस्था

महात्मागान्धिमार्गः

मुम्बई (महाराष्ट्रम्)

मान्याः,

अहं नवमकक्षायाः छात्रः अस्मि। भवद्भिः सद्यः प्रकाशितानि नवमकक्षायाः पाठ्यपुस्तकानि मया पुस्तकालये दृष्टानि। तेषु अहं कानिचित् क्रेतुम् इच्छामि। अधोलिखितानि पाठ्यपुस्तकानि कोरियर् द्वारा शीघ्रं प्रेषणीयानि–

1. सरलसंस्कृतव्याकरणम्–रचनापद्धतिः
2. मणिका–प्रथमो भागः
3. निबन्ध–प्रकाशः
4. मणिका–अभ्यास–पुस्तकम्– प्रथमो भागः

एभिः पुस्तकैः सह अन्यसन्दर्भग्रन्थसूची अपि यदि प्रेष्यते तर्हि आत्मानम् अनुगृहीतं मन्ये।

सधन्यवादम्।

भवतां विश्वासपात्रम्,

श्रीनाथघोषः

173 नीलगिरिः, अलकनन्दा

दिल्ली–110019

## पत्रलेखनाभ्यासः

### 1. स्वपितरं प्रति लिखितं पत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पत्रं पुस्तिकायां लिखत।

पाणिनिछात्रावासः,

वाराणसीतः।

दिनाङ्कः .................

माननीयाः पितृवर्याः!

सादरं (i) .................

अत्र कुशलं तत्राप्यस्तु। मम (ii) ................. समाप्ता अभवत्। परीक्षापत्राणि अतिशोभनानि जातानि। परीक्षायाः परिणामः (iii) ................. प्रथमसप्ताहे उद्घोषयिष्यते। अत्रान्तरे अस्माकं विद्यालयस्य

(iv) ................ अस्मान् शैक्षिकभ्रमणाय हरिद्वारं नेष्यन्ति। तत्र दक्षप्रजापतिमन्दिरं, (v) ................ 'हर की पैडी' इत्याख्यः प्रसिद्धः गङ्गातटः, मनसादेवी-मन्दिरं शान्तिकुञ्जञ्च इत्यादीनि अनेकानि प्रसिद्धानि स्थलानि सन्ति। अहमपि तत्र गन्तुम् (vi) ................ । एतदर्थं मया पञ्चसहस्रं (vii) ................ दातव्यानि सन्ति। कृपया (viii) ................ धनराशिं यू. पी. आई.-माध्यमेन सम्प्रेष्य माम् (ix) ................ कुर्वन्तु। गृहे सर्वेभ्यः मम (x) ................ निवेदनीयः।

भवतां प्रियपुत्री

शर्मिष्ठा

| |
|---|
| उपर्युक्ताम्, प्रणामाञ्जलिः, अध्यापकाः, रुप्यकाणि, इच्छामि, प्रणमामि, आगामिमासस्य, अर्धवार्षिकपरीक्षा, पतञ्जलियोगग्रामः, अनुगृहीताम्। |

**2. भवान् योगेशः। भवतः विद्यालये एकं संस्कृत-सम्भाषणशिविरम् आयोजितम् आसीत्। तस्य वर्णनं कुर्वन् मित्रं प्रति अधोलिखितं पत्रं मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पुस्तिकायां लिखत-**

राजकीय-संस्कृत-विद्यालयः,

गुरुग्रामतः।

तिथिः - ................।

प्रिय मित्र (i) ................!

सस्नेहं नमस्ते।

अत्र कुशलं तत्रास्तु। गतसप्ताहे अस्माकं (ii) ................ संस्कृत-सम्भाषणशिविरम् (iii) ................ आसीत्। दशदिनानि यावत् वयं संस्कृत-सम्भाषणस्य (iv) ................ अकुर्म। तत्र वयं पर्यावरणसंरक्षणम् इति विषयम् अधिकृत्य एकस्याः लघु नाटिकायाः (v) ................ अपि अकुर्म। दर्शकाः अस्माकम् अभिनयस्य अतीव (vi) ................ अकुर्वन्। अहं तु इदानीं सर्वदा संस्कृतेन एव (vii) ................। भवान् अपि संस्कृत-सम्भाषणाय प्रयासं (viii) ................।

मित्र! संस्कृत-सम्भाषणं कठिनं नास्ति। निरन्तरम् अभ्यासेन भवान् सरलतया एव (ix) ................ समर्थः भविष्यति। पितरौ (x) ................ मम प्रणामाञ्जलिं निवेदयतु।

भवतः मित्रम्,

योगेशः

| |
|---|
| मञ्चनम्, प्रति, प्रशंसाम्, वैभव, वदामि, विद्यालये, करोतु, आयोजितम्, सम्भाषणे, अभ्यासम्। |

**3. भवतः नाम केशवः अस्ति। भवान् स्वमित्रं सोहनं स्वभगिन्याः विवाहे निमन्त्रयितुं पत्रं लिखति। मञ्जूषायाः उचितपदैः रिक्तस्थानानि पूरयित्वा पुस्तिकायां पत्रं लिखत।**

देहलीनगरतः,

तिथिः – .................।

(i) ................. सोहन!

सस्नेहं नमो नमः।

अत्र कुशलं तत्रास्तु। इमां (ii) ................. भवन्तं सूचयित्वा अहम् आनन्दम् अनुभवामि यत् मम (iii) ................. विवाहः अस्य मासस्य दशमे (iv) ................. रविवासरे निश्चितः जातः। वरयात्रा रामनगरात् (v) ...............। त्वं मम प्रियं मित्रम् असि। अतः (vi) ............. ज्ञापयामि येन त्वम् अत्र (vii) ............... पूर्वम् एव आगच्छेः। भवता पितृभ्यां सह अत्र अवश्यमेव (viii) .................। आदरणीयाभ्यां स्वपितृभ्यां मम (ix) ................. निवेदनीयाः।

भवतः (x) .................

केशवः

| |
|---|
| भगिन्याः, आगमिष्यति, प्रियमित्र, प्रणामाः, आगन्तव्यम्, शुभसूचनाम्, पूर्वमेव, त्रिचतुर्दिनेभ्यः, प्रियमित्रम्, दिनाङ्के। |

**4. भवतः अनुजः गोपालः पठनं त्यक्त्वा प्रायः खेलने संलग्नः भवति। तं पठनार्थं प्रेरयितुं लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुस्तिकायां लिखत।**

दिनाङ्कः –

(i) .................।

प्रिय (ii) ................. !

शुभाशिषः।

ह्यः एव मात्रा लिखितं पत्रं (iii) .................। पत्रं पठित्वा ज्ञातं यत् (iv) ................. तव रुचिः पठने न अस्ति। भवान् पठनं (v) ................. खेलने रतः भवति, एतद् तु न (vi) .................। अस्मात् कारणात् एव गत-परीक्षायां भवतः अङ्काः (vii) ................. आसन्। यद्यपि खेलनम् अपि जीवनाय (viii) ................. परं पठनम् अपि तथा एव अनिवार्यम्। ये कालं व्यर्थं नयन्ति ते कदापि सफलतां न प्राप्नुवन्ति। (ix) ................. त्वं मम कथनं मनसि धृत्वा पठने एव ध्यानं दास्यसि। मातापितृभ्यां मे प्रणामाः।

भवतः (x) .................

रामगोपालः

| |
|---|
| प्राप्तम्, उचितम्, अद्यत्वे, छात्रावासतः, मन्ये, अग्रजः, गोपाल, आवश्यकम्, त्यक्त्वा, न्यूनाः। |

**5. भवान् अङ्कितः। अधोलिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुस्तिकायां लिखत।**

50, नन्दन-भवनम्।

(i) ..................

दिनाङ्कः ..................

प्रिय (ii) ..................!

सप्रेम नमस्ते।

अत्र सर्वं कुशलं तत्रापि भवतां कुशलं प्रार्थये। मया अद्य एव भवतः पत्रं (iii) ..................। पत्रेण च ज्ञातं यत् अधुना भवतः विद्यालये (iv) .................. अस्ति। अतः अहं भवन्तं दिल्लीनगरम् (v) .................. आमन्त्रये। श्वः एव स्वभ्रात्रा (vi) .................. मम गृहम् आगच्छतु। वयं दिल्ली-नगरस्य दर्शनं करिष्यामः। मम गृहस्य समीपे एव एकं (vii) .................. अस्ति। वयं मिलित्वा तत्र तरणस्य अभ्यासं करिष्यामः पितृभ्यां मम प्रणामाः (viii) ..................। भवतः आगमनस्य प्रतीक्षायाम्।

भवतः (ix) ..................

(x) ..................

| अभिन्नमित्रम्, ग्रीष्मावकाशः, सह, प्राप्तम्, अङ्कितः, रमेश!, आगन्तुम्, तरणतालम्, दिल्लीतः, निवेदनीयाः। |
|---|

**6. तव नाम उमेशः। तव मित्रं रवीन्द्रः छात्रावासे अस्वस्थः अस्ति। तं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः उचितपदैः पूरयित्वा पुस्तिकायां लिखत-**

गृहसङ्ख्या - 13

रामेश्वरनगरम्

मदुरैतः

तिथिः ..................

प्रियमित्र वीरेन्द्र!

सप्रेम (i) ..................।

तव पत्रात् ज्ञातं यत् त्वं गतसप्ताहात् (ii) .................. असि। अधुना तव स्वास्थ्यं (iii) .................. अस्ति? जीवने (iv) .................. अतीव महत्वपूर्णं भवति। अतः ध्यानेन स्वास्थ्यस्य रक्षां कुरु। औषधेन सह (v) .................. भोजनम् अपि स्वीकुरु। परीक्षा अपि समीपम् आगमिष्यति अतः (vi) .................. एकाग्रता आवश्यकी। यदि स्वास्थ्यम् उत्तमं नास्ति तर्हि पठने कष्टम् अनुभूयते। अतः स्वास्थ्य-विषये ध्यानं यच्छ। परीक्षायाः अनन्तरं विरामः भविष्यति तदा त्वं (vii) .................. गृहम् आगच्छ। मम माता अपि तव विषये सर्वदा पृच्छति। त्वं पत्रस्य (viii) .................. शीघ्रं लिख।

भवदीयं (ix) ..................

(x) ..................।

| उत्तरम्, कथम्, पठने, अस्वस्थः, नमस्ते, उमेशः, स्वास्थ्यम्, मम, पौष्टिकम्, मित्रम्। |
|---|

## अस्माभिः अधीतम्

पत्रस्य निम्नलिखितानि षडङ्गानि भवन्ति–

(अ) शीर्षकम्

(आ) सम्बोधनं कुशलवृत्तञ्च

(इ) प्रतिपाद्यविषयः

(ई) समाप्तिः

(उ) हस्ताक्षरम्

(ऊ) पत्र-सङ्केतः (पत्रं स्वीकर्तुः पत्रं प्रेषयितुः च)

* * * * *

## अभिनन्दनपत्रम्/वर्धापनपत्रम्/निमन्त्रणपत्रम्

अद्यत्वे प्रायः नूतनवर्षस्य शुभारम्भे, दीपावलि-होलिकादि-उत्सवार्थम्, मित्राणां जन्मदिवसे शुभाकाङ्क्षापत्राणि अभिनन्दनपत्राणि च प्रेष्यन्ते। शुभकामनासन्देशाः लिख्यन्ते। एतेषां निर्माणे मौलिक-प्रतिभायाः प्रदर्शनार्थं पर्याप्तः अवसरः लभ्यते। पृष्ठस्य उपरि सज्जा कलाप्रदर्शनार्थं भवति। अन्तः स्वकीय-मनोभावनानुसारं काश्चन सूक्तयः अपि लिख्यन्ते। प्रायः तत्र विशिष्टाः औपचारिकताः न भवन्ति। अधः प्रेषकस्य नाम लिख्यते।

यथा–

### वर्धापनपत्रम्




**वसन्ति हि गुणाः**
**प्रेम्णि न वस्तुनि।**

स्वस्थः निरामयः च भूत्वा शतं वर्षाणि यशः कीर्तिं च लभस्व।
कोटिशः वर्धापनानि।

प्रेषकः

..............................................................

..............................................................

## वर्धापनपत्रम्

सर्वे सन्तु निरामयाः

भवतां ............................ पावने जन्मदिने

कोटिशः वर्धापनानि।

## वर्धापनपत्रम्

प्रियमित्र,

दशमकक्षायां शोभनाङ्कैः समुत्तीर्णाय

भवते हार्दिकानि वर्धापनानि

प्रेषकः

............................

............................

दूरभाषः ............................

## निमन्त्रणपत्रम्

(जीवेम शरदः शतम्)

कार्यक्रमः

दिनाङ्कः ................ चिरञ्जीवस्य ............ षोडशे जन्म-दिवससमारोहे श्रीमन्तः सादरं सस्नेहं च आमन्त्रिताः सन्ति।

समयः ................ अस्मिन् अवसरे समुपस्थाय शुभाशिषः प्रदानेन अनुगृह्णन्तु।

स्थानम् ................

दर्शनोत्सुकाः,

.................................

दूरभाषः ............................

## निमन्त्रणपत्रम्

**नमो भगवते**

मान्याः,

मम अनुजस्य चि. ............................ उपनयन-संस्कारस्य

कार्यक्रमः पावनावसरे सकुटुम्बं भवताम् उपस्थितिः सम्प्रार्थ्यते।

दिनाङ्कः ................ भवदागमनस्य प्रतीक्षायाम्-

समयः ................ आमन्त्रकः

स्थानम् ................ भवनसङ्ख्या .................... उपनगरम्.....................

नगरम् ................................

दूरभाषः ...........................

## अभिनन्दनपत्रम्

सेवायाम् / प्रतिष्ठायाम्

नववर्षं सुखदं, मङ्गलमयं

सौभाग्यकरं च भूयात्।

प्रेषकः

..............................

# अभिनन्दनपत्रम्

ज्योतिर्विहगो विहरतु गगने
इयं दीपमालिका
सौभाग्यदायिनी
मङ्गलकारिणी
सुखदायिनी
समृद्धिकारिणी च
भूयात्।

प्रेषकः

..............................

## शुभाशंसा / शुभकामना

*शरीरमाद्यं खलु धर्मसाधनम्।*
श्रुतं मया रुग्णो भवान्।
भगवतः
अनुग्रहेण शीघ्रं स्वास्थ्यलाभं करोतु भवान्!

शुभैषी

..........................



## शुभाशंसा

**शुभास्ते सन्तु पन्थानः**

भवतां विदेशगमनं विज्ञाय प्रसन्नता जाता।
यात्रेयं निर्विघ्ना सुखदा शुभदा च भूयात्॥

## ( ख ) चित्रवर्णनम्

**मञ्जूषायां प्रदत्तपदानां सहायतया चित्रम् आधृत्य प्रतिचित्रं पञ्चवाक्यानि संस्कृतेन लिखत–**




**मञ्जूषा**

लोकयानम्, सम्मर्दः, बसस्थानकम्, सपरिवारम्, स्यूताः, वस्तूनि, गमनागमनम्, यातायातस्य साधनम्, नगरम्, हस्ते, बालः।

**मञ्जूषा**

चिकित्सालये, रुग्णशय्या, परिचारिकाः, औषधम्, आसन्दे, रुग्णः, वातायनम्, चषकः, विद्युत्पिञ्जाः, अवकरपात्रम्, पश्यति, उपविशति, उत्पीठिका, सञ्चिका।





**मञ्जूषा**

मार्गस्य, सूचनादीपः, कारयानानि, लोकयानम्, जनः, बालिका, गृहाणि, मार्गदीपाः, समीपे, भवनानि, विशालानि, महानगरम्, सङ्केतकः।



**मञ्जूषा**

क्रीडाक्षेत्रस्य, क्रीडकाः, पादकन्दुकेन, वृक्षाः, क्रीडन्ति, परितः, सन्ति, हरीतिमा, ध्यानेन, उपवेशनाय स्थानानि, तिष्ठतः।



**मञ्जूषा**

यात्रिणः, रेलस्थानकम्, आसन्दाः, जनाः, रेलयानम्, तिष्ठति, उपविशन्ति, प्रतीक्षाम्, स्वच्छम्, दृश्यते, प्रमुखं साधनम्, विक्रेतारः।



**मञ्जूषा**

शाकापणः, जनाः, शाकानि, आपणिकः, वृक्षाः, गृहाणि, फलानि, क्रयणम्, वार्तालापः, कुर्वन्ति, महिलाः, मूल्यम्, पृच्छति, सम्मर्दः।



**मञ्जूषा**

निर्वाचनप्रचारपत्राणि, लेपितानि, ग्रामः, जनाः, गृहाणि, समाचारपत्रम्, वार्तालापं कुर्वन्ति, विशालः वृक्षः, चत्वरे, विद्युत्स्तम्भाः, मार्गः, हरीतिमा, आपणः।

**मञ्जूषा**

महिलाः, नारिकेलवृक्षाः, जलपात्राणि, गृहाणि, सुन्दरं दृश्यम्, मार्गः, स्वच्छता, हरीतिमा, नयन्ति, तिस्रः, ग्राममार्गः, शाटिकाः, धारयन्ति, दूरतः, नद्याः।





**मञ्जूषा**

साधुः, महिले, जनाः, वातायनम्, बालिका, माला, नमस्करोति, तिष्ठति, हस्ते, कण्डोलः, वृक्षः, फलानि, जपति, सेवकः, दण्डः।

**मञ्जूषा**

परिश्रमः, कर्षति, कृषिक्षेत्रम्, हलम्, भूमिम्, वृषभौ, गृहाणि, जनौ, हरीतिमा, कृषकः, अन्नदाता, मेघाः, सुन्दरम्, दृश्यम्।





**मञ्जूषा**

विपणिः, फलापणः, ग्राहकाः, आपणिकाः, फलानि, छत्रम्, महिला, स्यूतः, स्कन्धे, बालकः, मूल्यम् पृच्छति, जनाः, क्रीणन्ति।

**मञ्जूषा**

चायम्, आपणः, विक्रेत्री, जनौ, पिबतः, वृक्षाः, हरीतिमा, चषकाः, दुग्धं मेलयति, युवकः, नयति, वार्तालापम्, ग्रामस्य।





**मञ्जूषा**

| |
|---|
| नकुलः, जनः, गृहस्य, दण्डेन, ताडयति, अन्तः, द्वारम्, कोपेन, घटः, लम्बते, शिशुः, शय्या, चित्रम्, भित्तौ। |

**मञ्जूषा**

| |
|---|
| मार्गे, जनः, पर्वतम्, आरोहति, गच्छति, हस्ते, दण्डः, वृक्षाः, पृष्ठतः, स्यूतः, अस्ति, वनमार्गः, पथिकः। |






**मञ्जूषा**

| |
|---|
| ध्यानेन, राजसभा, राजभवनस्य, नृपः, मन्त्रिणः, चर्चाम्, कुर्वन्ति, जवनिकाः, निर्णयं करोति, पण्डितः, वादम्, शृणोति, सिंहासने, स्तम्भः। |

* * * * *

## ( ग ) अनुच्छेदलेखनम्

### जन्तुशाला

- **विजया एका छात्रा अस्ति। सा स्वसंस्कृतपाठ्यपुस्तके जन्तुशालायाः विषये इमानि वाक्यानि अपठत्–**

जन्तुशालायाम् अनेके पशवः सन्ति। कच्छपः शनैः शनैः चलति। मृगाः वेगेन धावन्ति। सिंहः हिंसकः जीवः अस्ति। वानरौ कूर्दतः। चटका अन्नकणान् चिनोति। कोकिलः मधुरं कूजति। व्याघ्रः वृक्षच्छायायां शेते। चित्रकाः गतागतं कुर्वन्ति। शूकरः भूमिं उत्खनति। बकः जले मत्स्यं खादति। मयूरः मेघगर्जनं श्रुत्वा नृत्यति। वनमानुषः कृष्णवर्णः भवति। वर्तिकाः कोलाहलं कुर्वन्ति।

उपरिलिखितपङ्क्तिषु जन्तुशालायाः पशूनां कश्चित् परिचयः अस्माभिः प्राप्तः। कस्यचिद् विषयस्य एकं केन्द्रीयभावं विचारं वा आश्रित्य कृतं लघुनिबन्धात्मकं चित्रणम् अनुच्छेदः कथ्यते।

- **अनुच्छेदस्य सामान्याः विशेषताः–**
  - अनुच्छेदे एक एव भावः विचारो वा प्रस्तोतव्यः।
  - अनुच्छेदलेखने भूमिका उपसंहारो वा न भवति। विषयस्य सद्यः एव आरम्भः क्रियते।
  - अनुच्छेदस्य वाक्यानि परस्परं सम्बद्धानि भवेयुः। रोचकतागुणः अनुच्छेदस्य विशिष्टता।
  - अस्य भाषा सरला सुबोधा प्रवाहमयी च भवेत्।
  - अनुच्छेदे प्रस्तुतविषयस्य केन्द्रीयभावः प्रारम्भे वा अन्ते वा अवश्यं दातव्यः।
  - अनुच्छेदः अतिविस्तृतः अति लघुः वा न स्यात्। प्रायः सप्त अष्ट वा वाक्यानि पर्याप्तानि भवन्ति।

1. **'मार्गसुरक्षा'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

यातायातसङ्केतान्, रक्त-पीत-हरित-विद्युत्सङ्केतान्, अवधानेन, वाहनचालनसमये, पदयात्री, जीवनघातकाः, परिणामाः, इतस्ततः, दृष्ट्वा, वामतः, दक्षिणतः, पालनीयः।

2. **'वृक्षाः अस्माकं मित्राणि'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

वृक्षाः, सत्पुरुषाः, परोपकारम्, पक्षिभ्यः, वासः, फलानि, छाया, पुष्पाणि, गृहाणां कृते, काष्ठम्, आतपम् सहन्ते, पथिकाः, विश्रामं सम्यक्, वृष्टिः, भूमेः, संरक्षणम्।

3. **'शाकापणस्य वर्णनम्'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पदानि चित्वा पञ्च वाक्यानि संस्कृतेन रचयत।

गृञ्जनम्, पलाण्डुः, करण्डकम्, जनाः, विक्रेतारः, क्रीणन्ति, क्रेतारः, मूल्यं पृच्छन्ति, जनसम्मर्दः, मरीचिकम्, शाक-आपणस्य, एककिलोमितम्, कोलाहलम्, उच्चैः, आह्वयन्ति, अस्वच्छता, कारवेल्लम्।

4. **'परिवारेण सह भ्रमणम्'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

| |
|---|
| मम, पिता, माता, भगिनी, भ्राता, एकत्र समययापनम्, उपवनम्, सहभोजनम्, मिलित्वा खेलनम्, गायनम्, नर्तनम्, आनन्दप्रदम्, मनोरञ्जकम्, कारयानेन, शीतलपेयम्, कन्दुकेन, हरीतिमा। |

5. **'क्रीडाः'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

| |
|---|
| क्रिकेट-क्रीडाम्, बालकाः, महिले, क्रीडाक्षेत्रे, वृक्षाः, भ्रमतः, क्रीडन्ति, गृहाणि, कारयानानि, प्रसीदन्ति, बहिः, देशे, आई.पी.एल. क्रिकेट्, भवति, पश्यति, आनन्दं जनयन्ति। |

6. **'समयस्य सदुपयोगः'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

| |
|---|
| समयः, नष्टः, न, विद्या, महत्त्वम्, वृथायापनम्, कष्टदायकम्, अमूल्यम्, प्रत्येकम्, क्षणम्, पुनः न प्राप्यते, करणीयः, कुर्वन्ति, अन्ते पश्चात्तापम्, जीवनं बहुमूल्यम्, सदुपयोगः, समयस्य, करणीयः। |

7. **'सन्तुलित-आहारस्य महत्त्वम्'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

| |
|---|
| भोजनम्, रोटिका, सूप-ओदनम्, दुग्धम्, शाकाहारी, शाकम्, जनाः, अधुना, स्वच्छ-जलम्, सम्पूर्ण-खनिजाः, विटामिन्स इत्यादयः, भोजनात् पूर्वम्, स्वच्छीकृत्य, हस्तौ अपि, एव। |

8. **'अस्माकं विद्यालयः'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

| |
|---|
| छात्राः, कक्षा, वर्गः, अध्यापिका, कृष्णफलके, सुधाखण्डः, पुस्तकानि, आसनानि, विद्युद्दीपाः, जलपात्रम्, पाठयन्ति, रक्षति, स्नेहः, उपरि, हरीतिमा। |

9. **'परिश्रमस्य महत्त्वम्'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

| |
|---|
| मानवस्य, परिश्रमिणः, उन्नतिम्, स्वजीवने, बन्धुः, प्रधानतमः, अस्ति, विपत्तिम्, दूरीकरोति, प्राप्नोति, विना, सुखम्, विद्याम्, छात्रः, सफलता, न, लभते। |

10. **'शिक्षायाः महत्त्वम्'** इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि संस्कृतेन रचयत।

| |
|---|
| अधुना, जनाः, अतिमहत्त्वपूर्णम्, अस्ति, सफलाः भवन्ति, पालनम्, समयः, करोति, करणीयम्, अत्र, अपि, ज्ञातवान्, जानन्ति, पठन्ति, कार्याणि, निरक्षरः। |

# पर्यावरणरक्षा

- **पर्यावरणरक्षायै 'किं किं कर्तव्यम्' 'किं किं न कर्तव्यम्' एतादृशाः केचन उपायाः अधः लिखिताः सन्ति। एतेभ्यः समुचितानाम् उपायानां सङ्कलनं कृत्वा एकम् अनुच्छेदं लिखत–**

1. गृहस्य प्राङ्गणे पुष्पपादपाः रोपणीयाः।
2. प्रत्येकं नगरम् उपनगरं वा यन्त्राणां ध्वनिना गुञ्जितं भवेत्।
3. राजमार्गम् उभयतः छायावृक्षाः भवेयुः
4. इन्धनाय द्रुमाः छेदनीयाः।
5. प्रत्येकं गृहं काष्ठनिर्मितैः मञ्चैः आसन्दिकाभिः मञ्जूषाभिश्च सुशोभितं स्यात् ।
6. गृहं स्वच्छं सुप्रकाशितं च भवेत्।
7. शयनकक्षे दुग्धदाः पशवः निबद्धाः भवेयुः।
8. गृहस्य अवकरः प्रवेशद्वारस्य समीपे एव स्थापनीयः ।
9. गृहस्य प्रत्येकं सदस्यः स्वस्ववाहनेन बहिः गच्छतु।
10. सर्वे प्रदूषण-प्रसार-पराः उद्योगाः नगराद् ग्रामाद् वा दूरे स्थापनीयाः।
11. दूषितानि जलानि गङ्गादिनदीषु न पतेयुः ।
12. तैल-रहितवाहनानां सङ्ख्या न्यूना भवेत्।
13. कर्मस्थलानि प्राकृतिकसौन्दर्येण विभूषितानि स्युः।
14. सर्वे हिंसकाः जीवाः हन्तव्याः।
15. पर्यावरणस्य विनाशकः दण्डितः स्यात्।
16. प्रत्येकं नरः निवासपरिसरे तरूणां रोपणम् अभिरक्षणं च कुर्यात्।

.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................

.......................................................................................................

## (घ) कथापूर्तिः

◆ **अधोलिखिताः कथाः मञ्जूषायाः सहायतया पूरयित्वा उत्तर-पुस्तिकायां लिखत–**

1. एकदा भीषणे ग्रीष्मकाले सर्वत्र शुष्कम् अभवत्। वने एकः काकः (1) ............... आसीत् । सः जलस्य अन्वेषणाय (2) ............... भ्रमति स्म। सः कुत्रापि (3) ............... न अपश्यत्। जलम् अन्विष्यन् सः (4) ............... बहुदूरम् अगच्छत्। तत्र सः एकं (5) ............... अपश्यत् । घटं दृष्ट्वा सः प्रसन्नः अभवत्। किन्तु घटे जलम् (6) ............... आसीत्। सः अचिन्तयत् – जलं कथं पिबामि? सः एकम् (7) ............... अचिन्तयत्। सः काकः (8) ............... आनीय एकम् एकं शिलाखण्डं घटे अक्षिपत्। शनैः शनैः जलम् (9) ............... आगच्छत्। एवं जलं पीत्वा सः काकः (10) ............... अभवत्।

| जलम्, घटम्, उपरि, पिपासितः, प्रसन्नः, उपायम्, शिलाखण्डान्, इतस्ततः, अल्पम्, वने। |
|---|

2. गङ्गातटे कश्चन (1) ............... वसति स्म। सः सर्वेषां प्राणिनां सदा उपकारं करोति स्म। यः कश्चन तस्य अपकारं करोति तमपि सः उपकरोति स्म । सः प्रतिदिनं (2) ............... स्नानं करोति स्म। एकदा सः स्नानार्थं (3) ............... गतवान्। सः नद्याः प्रवाहे प्रवहन्तम् एकं वृश्चिकं दृष्टवान्। सः तं वृश्चिकं हस्तेन (4) ............... गङ्गातटे च तं स्थापयितुं प्रयत्नम् अकरोत्। किन्तु (5) ............... साधोः हस्ते अदशत्। यदा साधुः वृश्चिकम् अत्यजत् तदा वृश्चिकः (6) ............... पतितः। पुनः साधुः हस्तेन गृहीत्वा तं गङ्गातटे स्थापयितुं प्रयत्नम् अकरोत्। वृश्चिकः पुनः हस्ते (7) ............... अकरोत्। एवं प्रकारेण साधुः बहुवारं वृश्चिकं गृहीतवान्। वृश्चिकः अपि (8) ............... दशनं कृतवान् । गङ्गातटे कश्चन पुरुषः आसीत्। सः एतत्सर्वं पश्यति स्म। सः उक्तवान् – 'महाराज! एषः वृश्चिकः (9) ............... अस्ति अतः पुनः पुनः दशति। भवान् किमर्थं वारं वारम् एतं (10) ............... इच्छति? एतं वृश्चिकं त्यजतु।' इति। साधुः प्रत्यवदत् – यदा एषः क्षुद्रजीवः स्वस्य दुष्टप्रकृतिं न त्यजति तर्हि अहं किमर्थं स्वस्य स्वभावं त्यजेयम्?

| जले, दुष्टः, साधुः, दशनम्, गङ्गानद्याम्, रक्षितुम्, नदीम्, गृहीतवान्, पुनः-पुनः, वृश्चिकः। |
|---|

3. एकः बालकः आसीत्। सः पठने बहुकुशलः नासीत्। परन्तु सः स्वभावेन (1) ............... आसीत्। एकदा तस्य वार्षिकी परीक्षा आसीत्। सः परीक्षायै विद्यालयं गच्छति स्म। विद्यालयं गच्छन् सः मार्गे एकं (2) ............... अपश्यत्। सः वृद्धः रुग्णः आसीत्। बालः तं वृद्धं (3) ............... नीतवान्। यद्यपि तस्य परीक्षायै विलम्बः भवति स्म तथापि सः (4) ............... समीपे एव अतिष्ठत्। तं वृद्धं चिकित्सालयं प्रापय्य किञ्चिद् विलम्बेन सः विद्यालयं प्राप्तः। अतः तस्मिन् दिने तस्य (5) ............... नाभवत्। सः गृहम् आगतवान्। सः कमपि किञ्चिदपि न अकथयत्। (6) ............... दिवसे यदा सः विद्यालयं गतः तदा प्रधानाचार्यः तम् आहूतवान्। प्रधानाचार्यः तस्य (7) ............... धन्यवादम् अकरोत्। सः बालम् अकथयत् यत् ह्यः त्वं यस्य वृद्धस्य सहायतां कृतवान् सः मम (8) ............... अस्ति। सः केनापि कारणेन ममोपरि रुष्टः आसीत्। सः रुग्णः अपि (9) ............... बहिः निर्गतः। चिन्तां मा कुरु, तव परीक्षा पुनः भविष्यति। अग्रिमे दिवसे सः बालः प्रार्थना-सभायां (10) ............... अभवत्।

| पिता, दयालुः, वृद्धम्, गृहात्, परीक्षा, सम्मानितः, बालकस्य, अन्यस्मिन्, वृद्धस्य, चिकित्सालयम्। |
|---|

4. एकस्मिन् ग्रामे एकः (1) ............... आसीत्। सः प्रतिदिनं पर्वतेषु (2) ............... चारयति स्म। सः उदण्डस्वभावेन प्रतिदिनम् उच्चैः (3) ............... "भो मित्राणि एकः (4) ............... आगच्छत् सः मम (5) ............... अनयत्।" यदा (6) ............... तत्र प्राप्तवन्तः तदा सः हसन् वदति स्म यद् अहं तु उपहासं कुर्वन्नासम् इति। एकदा तस्य कथनं सत्यम् अभवत्। तत्र वस्तुत एव एकः शृगालः आगच्छत्। सः बालकः पुनः पुनः उच्चैः (7) ............... अकरोत् । परन्तु कोऽपि तस्य (8) ............... न अकरोत्। शृगालः तस्य (9) अजाम् ............... । अन्ते सः मूर्खः (10) ............... अकरोत्।

| अजाः, शृगालः, पश्चात्तापम्, ग्रामवासिनः चीत्कारम्, अजाम्, बालकः, अखादत्, वदति स्म, विश्वासम्। |
|---|

5. एषः समुद्रतटः। अत्र जनाः (1) ............... आगच्छन्ति । केचन तरङ्गैः क्रीडन्ति केचन च (2) ............... जलविहारं कुर्वन्ति। तेषु केचन कन्दुकेन (3) ............... । बालिकाः बालकाः च बालुकाभिः (4) ............... रचयन्ति। मध्ये मध्ये तरङ्गाः बालुकागृहं प्रवाहयन्ति। एषा क्रीडा प्रचलति एव। (5) ............... न केवलं पर्यटन-स्थानानि एव सन्ति अपितु अत्र मत्स्यजीविनः अपि स्वजीविकां चालयन्ति। अस्माकं देशे (6) ............... समुद्रतटाः सन्ति। एतेषु मुम्बई-गोवा-कोच्चि- कन्याकुमारी-विशाखापत्तनम्-पुरी इत्येताः प्रमुखाः समुद्रतटाः (7) ............... प्रसिद्धाः सन्ति। गोवातटः वैदेशिक-पर्यटकेभ्यः समधिकं रोचते। विशाखापत्तनम् इति (8) ............... वैदेशिक-व्यापाराय (9) ............... अस्ति। कोच्चितटः नारिकेल-फलेभ्यः ज्ञायते। मुम्बई-नगरस्य जुहू-तटे सर्वे (10) ............... स्वैरं विहरन्ति। चेन्नई-नगरस्य मेरीना-तटः देशस्य सागर-तटेषु दीर्घतमः अस्ति।

| प्रसिद्धः, जनाः, बहवः, क्रीडन्ति, नौकाभिः, बालुकागृहम्, पर्यटनाय, अतीव, तटः, समुद्रतटाः। |
|---|

6. एकदा दश बालकाः (1) ............... नदीम् अगच्छन्। ते नदीजले चिरं स्नानम् (2) ...............। ततः ते तीर्त्वा पारं गताः। तदा तेषां (3) ............... अपृच्छत् अपि सर्वे बालकाः (4) ............... उत्तीर्णाः? तदा कश्चित् बालकः (5) ............... एकः, द्वौ, त्रयः, चत्वारः, पञ्च, षट्, सप्त अष्टौ, नव इति। सः आत्मानं न अगणयत्। अतः सः अवदत् – नव एव (6) ............... दशमः न अस्ति। पुनः अपरः (7) ............... अपि आत्मानं त्यक्त्वा अन्यान् (8) ............... अगणयत्। तदा अपि (9) ............... एव आसन्। अतः ते निश्चयम् अकुर्वन् यत् दशमः (10) ............... निमग्नः । अतः ते दुःखिताः अभवन् । पश्चात् यदा नायकः एव स्वयं बालकानां गणनाम् अकरोत् तदा सर्वे दश बालकाः उपस्थिताः आसन्।

| नव, नद्याम्, सन्ति, नायकः, स्नानाय, अकुर्वन्, नदीम्, अगणयत्, बालकः, बालकान्। |
|---|

7. मुखे रोटिकाखण्डं गृहीत्वा एकः काकः एकस्मिन् (1) ............... उपविष्टः आसीत्। किञ्चित् कालानन्तरम् एकः (2) ............... तत्र आगच्छत्। रोटिकां (3) ............... खादितुम् इच्छन् शृगालः तं काकं दृष्ट्वा (4) ............... भो मित्र! खगेषु भवान् एव सुन्दरः, चतुरः, (5) ............... च अस्ति । अतः कृपया किमपि गीतं गायतु । श्रोतुं मे महती (6) ............... अस्ति । परन्तु काकोऽपि चतुरः आसीत्। (7) ............... पादयोः अधः स्थापयित्वा काकः अवदत्-रे! नाहं (8) ............... मूर्खः अस्मि। गताः ते दिवसाः। इतः गच्छतु (9) ............... इति । काकस्य उत्तरं श्रुत्वा (10) ............... शृगालः शिरः नत्वा ततः पलायितः ।

| भवान्, शृगालः, वृक्षे, लज्जितः, अवदत्, मधुरगायकः, पूर्ववत्, छलेन, इच्छा, रोटिकाखण्डम्। |
|---|

8. अहं पुस्तकम्। यः एषः (1) ............... उपरि शिरः प्रस्थाप्य स्वपिति, मम स्वामी अस्ति। अहं तु अतीव सन्त्रस्तम् अस्मि। स्थाने-स्थाने मम पृष्ठेषु लेखन्या (2) ............... कारिताः। मम पृष्ठानाम् अधिकांशाः कोणाः तु परिवर्तनेन (3) ............... जाताः । नानावर्णैः (4) ............... मम चित्राणि अस्य द्विवर्षीयभ्रात्रा नष्टीकृतानि। सः माम् (5) ............... स्थापयित्वा क्रीडामग्नः भवति। तेन (6) ............... मम मुखम् एव कृष्णमसीं (7) ............... दूषितम्। मया श्रुतं यत् बालकेषु कृतान् अत्याचारान् अधिकृत्य मानवाधिकारदिवसाः (8) ...............। अहं कथयामि यत् (9) ............... अपि आयोजनीयः, येन मदीयबन्धुबान्धवानाम् अपि (10) ............... स्यात् ।

| पुस्तकाधिकारदिवसः, भग्नाः, मम, शिशुना, जीवनरक्षा, व्रणाः, इतस्ततः, आयोज्यन्ते, पातयित्वा, अलङ्कृतानि। |
|---|

9. एकः भिक्षुकः आसीत्। (1) ............... सः ग्रामं ग्रामं नगरं नगरं च सर्वत्र अटति स्म। एकदा सः कस्यचित् धनिकस्य गृहं प्राप्तवान्। (2) ............... बहिः स्थितः सः कञ्चित् अस्पष्टं शब्दं श्रुतवान्। पुनः समीपं गत्वा सः अशृणोत् यत् तस्य गृहस्य (3) ............... ईश्वरं प्रार्थयन् वदति स्म- 'हे देव! मह्यं (4) ............... ददातु।' भिक्षुकः 'अहो! अयं तु स्वयमेव (5) ...............' इति चिन्तयित्वा अग्रे (6) ...............। अग्रे गत्वा सः अपश्यत् यद् (7) ............... गृहे एकः व्यापारी प्रार्थयते स्म-'भगवति! मम (8) ............... लाभः भवतु। भिक्षुकः चिन्तितवान् अरे! एते तु महत्तरां (9) ............... याचन्ते। अहं तु केवलं भोजनं याचे। अहम् एव (10) ............... यतः अहं सन्तुष्टः अस्मि इत्येव चिन्तयन् सः तद्गृहं विहाय अग्रे अगच्छत्।

| भिक्षाम्, व्यापारे, भाग्यवान्, अगच्छत्, गृहात्, स्वामी, अन्यस्मिन्, भिक्षाटनाय सन्तानम्, याचकः। |
|---|

10. एकदा अमेरिकादेशे (1) ............... आवासार्थं भवनानां निर्माणकार्यं प्रचलति स्म। तत्र एकः विशालः (2) ............... भवननिर्माणकार्ये बाधकः आसीत्। केचन (3) ............... तं विशालं काष्ठखण्डम् उत्थापयितुं प्रयत्नशीलाः आसन्। काष्ठखण्डस्य भारः (4) ............... आसीत् तस्मात् ते तं काष्ठखण्डम् किञ्चिदपि उत्थापयितुम् (5) ............... आसन्। तेषां सैनिकानां नायकः अपि तत्र (6) ............... आसीत्। परं सः दूरतः एव तान् अधिकबलप्रयोगाय वारं वारम् (7) ...............। तस्मिन्नेव काले एकः अश्वारोही तत्र आगच्छत्। सः अश्वात् अवतीर्य सैनिकानां (8) ............... संलग्नः अभवत्। काष्ठखण्डः वाहने आरोपितः। अश्वारोही (9) ............... अवदत् - पुनरपि यदा आवश्यकता भवेत्, स्वदेशस्य राष्ट्रपतिं वाशिङ्गटनं मां स्मरत। सेनानायकः तु इदं श्रुत्वा (10) ............... पतित इव अभवत्।

| सैनिकाः, असमर्थाः, आदिशति स्म, आकाशात्, सेनानायकम्,<br>सहायतायाम्, सैनिकानाम्, उपस्थितः, अत्यधिकः, काष्ठखण्डः। |
|---|

11. आम्रवृक्षस्य अधः उपविष्टः एकः नरः (1) ............... लतासु विशालफलानि दृष्ट्वा (2) ..............., "मूर्खः ईश्वरः लतासु विशालानि फलानि (3) ..............., विशाले वृक्षे तु लघूनि फलानि। (4) ............... वेगेन सहसा एकम् (5) ............... तस्य शिरसि अपतत्। सः अचिन्तयत् यदि वृक्षे विशालफलं स्यात् तर्हि मम शिरः तु भग्नम् एव भवेत्। ननु अहमेव मूर्खः, ईश्वरः तु बुद्धिमान् अस्ति।

| आम्रफलम्, पवनस्य, कोमलासु, अकथयत्, रोपयति। |
|---|

✱ ✱ ✱ ✱ ✱

## ( ङ ) संवादलेखनम्

**( 1 )**

**चिकित्सकः** – रमेश! अधुना का स्थितिः तव? .............................. अस्ति वा?

**रमेशः** – इदानीं ज्वरः नास्ति वैद्यवर्य! परं .............................. अनुभवामि।

**चिकित्सकः** – कासः?

**रमेशः** – कासः अस्ति, पीनसः अस्ति। .............................. पीडा अपि अस्ति।

**चिकित्सकः** – किं भक्षितं ह्यः?

**रमेशः** – ह्यः आपणात् .............................. आलुकस्य पिष्टिकाः खादिताः।

**चिकित्सकः** – अहो! आपणात् क्रीत्वा आलुकस्य पिष्टिकाः खादिताः? ईदृशः प्रमादः। न जानाति वा यदा कासः पीनसः च भवति तदा आम्लं न ..............................। एतत् चूर्णं ददामि।

**रमेशः** – कथं खादनीयम्?

**चिकित्सकः** – पञ्चदिनानि .............................. त्रिवारम् उष्णजलेन खादनीयम्।

**रमेशः** – चूर्णः कटुः अस्ति वा?

**चिकित्सकः** – अरे! नहि, .............................. नास्ति। औषधस्य स्वादः न गणनीयः।

**रमेशः** – अस्तु महोदय! पुनः कदा .............................. ?

**चिकित्सकः** – पुनः .............................. आवश्यकता न भविष्यति।

**रमेशः** – अस्तु, धन्यवादः महोदय! अहं भवतः .............................. औषधं स्वीकरिष्यामि।

> क्रीत्वा, कटुः, निर्देशानुसारमेव, ज्वरः, खादनीयम्, उदरे,
> आगमनस्य, आगन्तव्यम्, दुर्बलताम्, प्रतिदिनम्।

**( 2 )**

**पुत्री** – अम्ब! अभिमन्युः कः आसीत्?

**अम्बा** – अभिमन्युः .............................. पुत्रः आसीत्।

**पुत्री** – .............................. कः आसीत्?

**अम्बा** – भीष्मः कौरवानां .............................. च पितामहः आसीत्।

**पुत्री** – पितामहः कः भवति?

**अम्बा** – पितुः .............................. पितामहः भवति।

**पुत्री** – .............................. किं श्रीआर्यवीरः तव भ्राता?

**अम्बा** – आम्, मम .............................. तव मातुलः।

| | | |
|---|---|---|
| पुत्री | – | लवकुशौ .............................. कौ आस्ताम्? |
| अम्बा | – | लवकुशौ .............................. पुत्रौ .............................. । |
| पुत्री | – | अस्तु, अम्ब! धन्यवादः। |

रामस्य, पाण्डावानाम्, अर्जुनस्य, आस्ताम्, रामस्य, अम्ब!, भ्राता, पिता, भीष्मः।

(3)

| | | |
|---|---|---|
| आपणिकः | – | आलुकं .............................., हरितानि शाकानि, अधुनैव क्षेत्रात् अनीतानि। |
| महिला | – | भोः आपणिक! पटोलः कति .............................. ददाति? |
| आपणिकः | – | भगिनि! त्रिंशत् रुप्यकैः ..............................। |
| महिला | – | नहि भोः। महार्घं वदति भवान्। आर्द्रकस्य मूल्यं वदतु। |
| आपणिकः | – | .............................. अशीति-रुप्यकैः पावमितं, शतं रुप्यकैः अर्धकिलोमितं वार्तकीं, सप्तति-रुप्यकैः किलोमितं कारवेल्लम् अस्ति। वदतु किं ददानि? |
| महिला | – | किलोद्वयम् .............................., पावमितम् आर्द्रकम् अर्धकिलोमितं वार्तकीं च ददातु। भिण्डिनकानि सम्यक् सन्ति खलु? |
| आपणिकः | – | उत्तमानि .............................. सन्ति ददानि किम्? केवलं पञ्चाशत् रुप्यकैः अर्धकिलोमितम् अस्ति। |
| महिला | – | अस्तु ददातु, किन्तु मूल्यं .............................. योजयतु। |
| आपणिकः | – | चिन्ता मास्तु .............................. अपि करोमि। |
| महिला | – | अस्तु सम्यक् अपकर्षं करोतु, अन्यथा पुनः न आगमिष्यामि। |
| आपणिकः | – | एवं मा वदतु भगिनि! स्वीकरोतु .............................. अभवत्। भवती सार्धद्विशतं ददातु। |
| महिला | – | अस्तु स्वीकरोतु, परिवर्तं ददातु। |
| आपणिकः | – | अस्तु स्वीकरोतु .............................. धनम्। धन्यवादः पुनः आगच्छतु। |
| महिला | – | अस्तु उत्तमानि शाकानि आनयतु। राम! राम! |

अपकर्षम्, सप्तत्यधिक-द्विशतम्, स्वीकरोतु, रुप्यकैः, आलुकम्,
गोणीस्यूते, अवशिष्टम्, अर्धकिलोमितम्, आर्द्रकम्, सम्यक्तया।

(4)

| | | |
|---|---|---|
| माता | – | पुत्रि! पुत्रि! कुत्र अस्ति? अत्र ..............................। |
| पुत्री | – | आगच्छामि अम्ब! .............................. तिष्ठतु। |
| माता | – | किं करोति यत् निमेषद्वयं तिष्ठामि। अधुनैव आगच्छ। |
| पुत्री | – | (अहो! न जाने किम् अस्ति?) अस्तु आगच्छामि। वदतु अम्ब! किं कार्यम् अस्ति? |
| माता | – | पुत्रि! भवत्याः .............................. कदा समाप्यते? |
| पुत्री | – | किमर्थम्? कः विशेषः? |

माता – अरे! भवती न जानाति। भवत्याः मातुलः आगच्छति।

पुत्री – मातुलः आगच्छति! सः .............................. कदा आगतवान्?

माता – नहि पुत्रि! अग्रिमे सप्ताहे .............................. इति भवत्याः मातामह्याः दूरवाणी आगता।

